
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥श्रीगणेशायनमः॥श्रीबालकृष्णायनमः॥लक्ष्मीपादयुगंप्रणम्यपितरंश्रीबालकृष्णाभिधंभारद्वाजकुलांबुधौ।
पुण्णिनश्रीगौरवास्यां बुजानः॥शास्त्राशेषमतंमितेनवचसासिद्धांतमुक्तावलीगूढार्थंस्तनुतेयथामतिमहादे
वःपरेषांकृते॥१॥भाषापरिच्छेदव्याख्यानंचिकीर्षुःश्रीविश्वनाथपंचाननोनिर्विघ्नपरिसमाप्तिसिद्धयेकृ
तस्येश्वरनिर्देशरूपमंगलस्यशिष्या अप्येवंकुर्युरितिशिष्यशिक्षायैनिबंधंकुर्वन्नीश्वरंप्रार्थयते॥चू
डामणीकृतेति॥ ॥लीलेति।इदंचविशेष्यंनातःपुनरुक्तत्वंदोषः।वस्तुतस्तु।विधोःकिमितिचूडाकरणमि
त्यर्थनाखुकेयंलयाकरणंइत्याकांक्षयानिराकांक्षाप्रतिपत्तिर्नभवतीतिलीलेत्यादिविशेषणानुक्तौविवक्षिता
न्वयबोधाभावान्नायमत्रदोषःउत्थाप्याकांक्षयाविशेषणान्वयएवतत्प्रसरादिति।लीलयातांडवंनत्वंतत्रपरि
तःअभिज्ञइत्यर्थः।अनेनचन्द्रस्यविशिष्टतयास्मृतिविषयात्प्रार्थितार्थाभवत्वेवेतिसूचितं।नन्वाकर्षणरहि
तेकथंनत्वंतत्राह॥चूडामणीकृतेति।अचूडामणिश्चूडामणिःसंपद्यतइतिचूडामणीकृतश्चूडामणीकृतोविधु
र्येनसतथेत्यर्थः।वलयीकृतेति।अवलयंवलयंसंपद्यतइतिवलयीकृतोवलयीकृतोवासुकिर्येनसतथेत्य
र्थः।शिष्यावधानायप्रतिजानीते॥निजनिर्मितेति।निजेनस्वेननिर्मितारचितायाकारिकावलीतां।अत्यंतसंक्षेपः
शब्दसंक्षेपोयासुता।अतिसंक्षिप्तास्ताइत्यर्थः।तासुचिरंतनानांकणादप्रभृतीनांउक्तयोवचांसिवचःप्रतिपाद्यायु
क्तयस्ताभिःकृत्वाहंविशदीकरवाणिप्रकटीकरोमीत्यर्थः।नन्वाकारिकावल्यादिप्राचीननिबंधाध्ययनेनैवकारिका
वलीप्रतिपादितोर्थोबोद्धव्यइतिकिमनेनभवत्कृतविशदनिबंधेनेत्यतउक्तमतिसंक्षिप्तेति।तथाचलीला

(margin:) समाप्त

Acc. NO. ~~456~~ M-1754
Title - मुक्तावलि प्रकाश
Author - दिनकर भट्ट
Date - ३
Subject - न्याय
folio - 115
Xerox - 228

प्राचीननिबंधेषुग्रंथबाहुल्येनबहुतरदुःखहेतुप्रतिपत्तिकतयानबालानांप्रवृत्तिरितिभावः।स्वोत्प्रेक्षामूलक
ताप्रयुक्तानादरणीयतांनिरसितुंचिरंतनेसुक्ते।नन्विसवधारणे।तथाचकुतुकादेवेत्यर्थः।एतेनस्वस्यग्रंथ
करणेक्लेशाभावःसूचितः।स्वस्यग्रंथकरणप्रवृत्तौनिमित्तमाह॥राजीवेति॥राजीवेयादयारूपातयावक्त्रां
वदस्तदधीनइत्यर्थः।ननुग्रंथादौश्रोतृप्रवृत्तयेप्रयोजनादिवक्तव्यंभवतितस्यचेहानुक्तत्वादुपेक्षणीयतेत
ग्रंथस्यस्यादित्यत्रास्यविषयप्रयोजनसंबंधाधिकारिणःसूचयन्नतिसंक्षिप्तत्वादेतद्ग्रंथस्यसकलपदार्था
प्रतिपादकतयाकथंबालस्यव्युत्पत्तिरितीमांचत्रांकामेतद्ग्रंथस्यसकलपदार्थप्रतिपादकत्वसंप्रदर्शनेनपरिहर
न्यत्करोषियदश्नासियज्जुहोषिददासियत्।यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमितिभगवदुक्तेर्मुक्तावलीस
मेस्वकीयग्रंथंश्रीभगवतिचार्पयन्शिष्याणांस्वस्मिन्प्रामाणिकताबोधायग्रंथस्यस्वस्यचनामनीनिबध्नाति।
सद्रव्येति।द्रव्यैःसहितायुक्ताप्रतिपादकतया।गुणैरपिगुंफितायुक्ता।सतामुत्क्षेपणादीनांपंचानांकर्मणांज्ञापिका
बोधिका।सज्जातिरूपंसामान्यंविशेषानित्यःसमवायस्तैर्मण्डिता।यद्वासंतिसामान्यविशेषनित्यमिलितानि
यस्यां।नित्यमिलितंनित्यसंबंधः।अभावप्रकर्षःप्रागभावादिभेदेनवैलक्षण्यंतस्योज्ज्वलाप्रकाशिकेत्यबुद्धिस्था
सिद्धांतमुक्तावली।सिद्धांताएवमुक्तास्तासांआवलीपंक्तिर्विष्णोर्नारायणस्यवक्षसिवक्षःस्थलेविन्यस्ताविशेषतो
ऽर्पितासुकृतिनांपंडितानांमनसःमुदंसंतोषंचिरंबहुकालंवितनुतांविस्तारयत्वित्यर्थः।ननुयुक्तीनामत्रासत्वा
त्कथंविदुषांसंतोषस्तत्राह।सद्युक्तिरिति।सत्योयुक्तयोयस्यांसातथा।मुक्तावलीसादृश्यंचग्रंथेद्रव्यादिपदार्थवत्तया।

मु०
२

टी०

तथाहि। मुक्तावली सङ्ख्यासाध्य त्तयाङ्ख्यवती। ङ्ख्यसाध्येतियावत्। नानाविधङ्ख्यघटितावा। गुणेन सूत्रेण गुंफि
तानिर्मिता। सुकृतिनां पुण्यवतां यानि समीचीनानि भगवद्भजनादिरूपाणि कर्माणि तेषां बोधिका। सत्सामान्यं समी
चीनाजातिः विशेषो महत्त्वनिर्मलत्वादिस्ताभ्यां नियमनवरतं मिलितासंबद्धा। अभावे तेजोभावेंऽधकारे सतिप्र
कर्षेणोज्वलाऽर्थप्रकाशिकेति द्रव्यादिसकलपदार्थवतीतथायंग्रंथोपीति। अत्र च मुक्तावलिस्तो [illegible] तया निर्दोषत्वं
सूचितं। अत्र द्रव्यादिपदार्थप्रतिपादकत्वप्रदर्शनेन द्रव्यादयो विषया उक्ताः। पदार्थतत्वावधारणं च प्रयोजनं सूचितं।
संबंधश्च प्रतिपाद्यप्रतिपादकभावः। पदार्थतत्वावधारणकामोऽधिकारीति। ग्रंथारंभसमये कृतस्य मंगलस्य तन्नि
बंधस्य च वैयर्थ्यमाशंक्य फलं दर्शयति। विघ्नविघातायेति। प्रारिप्सुमिष्टस्य ग्रंथस्येति शेषः। यद्यप्यत्र घातपदस्यो
त्पत्तिमद्भावपरतया विपदमनर्थकमिति प्रतिभाति। तथापि विशिष्टवाचकानां पदानां सति पृथग्विशेषणवाचक
पदसमवधाने विशेष्यमात्रपरतायाः सकलचक्रैर्मारुतपूर्णरंध्रैः [illegible] कीचकावेणवस्तेस्युर्ये स्वनंत्यनिलोद्धता
इति कोशान्मारुतपूर्णरंध्रत्वविशिष्टवेणुबोधककीचकपदे दृष्टत्वाद्घातपदमभावमात्रपरं द्रष्टव्यं। ननु निष्फल
त्वान्मंगलाचरणमयुक्तं न च निष्फलत्वमेवासिद्धं। तस्य फलविशेषस्यान्यस्य रूपहेतुनां साधनादित्यभिप्रायेणा
शंकते नन्विति। मंगलस्य कारणत्वाभावे व्यतिरेकव्यभिचाररूपहेतुमाह। विनापीति। निर्विघ्नपरिसमाप्तीति। वि
घ्नध्वंससर्वकसमाप्तिरित्यर्थः। न च तत्र जन्मांतरीयमंगलकल्पनान्न व्यभिचार इति वाच्यं। भोगादिनापि नास्तिका
लनिर्विघ्ननाशसंभवेन जन्मांतरीयमंगलसंदेहेन व्यभिचारसंशयसंभवात्। अत्र कादंबर्यादिग्रंथे मंगलसत्वे
पि समाप्त्यदर्शनेनान्वयव्यभिचारोपि दोषो बोध्यः। व्यभिचारसंदेहस्य [illegible] संशयरूपतया कारणताप्रसक्षस्व

२

७५

3

समा॥ प्र   आ॥ ३   पद्य प्र ३

विलक्षणक्रियाप्रयोजकज्ञानं १

प्रतिबंधकत्वं न त्वनुमितौ तत्रैतस्यानुकूलत्वादित्यभिप्रायवानेव मंगलं समाप्तिफलकं समाप्त्यन्यफलकत्वे सति सफल
त्वादिति परिशेषानुमानेन मंगलस्य फलकतां व्यवस्थापयिष्यन् प्रथमतो विशेष्यासिद्धिनिरासाय फलवत्त्वं साधयति
अविगीतेति। विषयत्वं च ज्ञानविषयसुखेऽतिप्रसक्तमतो आचारेति। आचारश्चात्र क्रियैव तथापि विषयत्वश्रुतेः कृतिरे
व विवक्षिता। तद्विषयत्वं च विधेयतया बोध्यं। तेन फलेन व्यभिचारस्तस्योद्देश्यतया कृतिविषयत्वात्। विधेयतया कृति
विषयत्वं चैत्यवंदनादावपीत्यतः शिष्टेति। शिष्टत्वं च फलसाधनतांशे भ्रांतिरहितत्वं। ननु वेदप्रामाण्याभ्युपगंतृत्वं तेन व्यु
त्क्रमेण कृते दर्शादौ निष्फले न व्यभिचारः। शिष्टाचारविषयत्वं स्येनयागादावप्यस्यतोऽवगीतेति। अवगीतत्वं च बलवदनि
ष्टाननुबंधित्वं तेन स्येनादौ परस्त्रुपयुक्तबलवदनिष्टाननुबंधीष्टसाधनत्वरूपसाध्याभावेपि न व्यभिचारः। सिद्धे अनुमि
ते। तत्रैव मंगले। फलजिज्ञासायां विशेषतः फलजिज्ञासायां। ननु कथं तर्हि गंगास्नानादीनामदृष्टार्थकत्वं यतः संभवतीति तथा
च तत्र दृष्टासंभवेनादृष्टकल्पनेति भावः। ननु तथापि विश्वजिन्न्यायात्स्वर्ग एवैष कल्प्यतामत आह। उपस्थितत्वादिति। आ
रब्धं कर्म निर्विघ्नं मे समाप्यतामिति ग्रंथादौ प्रवृत्तपुरुषकामनाविषयत्वेन परिशेषानुमाने प्रवर्त्तमानपुरुषस्योपस्थितत्वा
दित्यर्थः। कल्प्यते। अनुमीयते। अनेन च मंगलस्य समाप्तिहेतुत्वेऽनुमानमेव प्रमाणं। ननु शिष्टाचारानुमिता श्रुतिः। इदानीं
मानुपलब्धविशेषनिर्णयाभावेन तस्या [illegible] अबोधकत्वादिति स्वचितं। व्यापकत्वघटितकारणताग्रहप्रतिबंधकज्ञानविष
य[illegible]व्यतिरेकव्यभिचारमुद्धरति। [illegible]चेति। मंगलस्य समाप्तिफलकत्वे चेत्यर्थः। तत्रापि। नास्तिकादिग्रंथेपि। तत्। मंग
लं कल्प्यते। अनुमीयते। कार्यरू[illegible]पसमाप्त्येति शेषः। ग्राह्यसंदेहपर्यवसन्नस्य प्रवोक्तव्यभिचारसंशयस्य कारणतानुमिता
व प्रतिबंधकत्वाद्व्यभिचारनिर्णयस्य चाभावादिति भावः। नन्वेवमन्वयव्यभिचारज्ञानं कारणताग्रहविरोधि भवत्येवेत्यात्र

फलं उ

ब्यान्वय व्यभिचारं निरस्यति। यन्न्वेति। तत्रं कादंबर्यादौ बलवत्तरत्वं वैजात्यं। नन्वेवमपि कादंबर्यादौ कुतो न विघ्नध्वंसः स तत्रा
ह। प्रचुरस्येति। प्रचुरस्यैव मंगलस्य सर्वथा। बलवत्तर विघ्ननिवारणे बलवत्तरादि विघ्ननिवारणे। तेन प्रचुर विघ्नध्वंसस्यापि प
रिग्रहः। तथा च मंगलस्य विघ्नसमसंख्य मंगलत्वेन नाशकतया न तत्र विघ्ननाश इति भावः। ननु तथापि कादंबर्यादौ विघ्न
ध्वंसो माऽस्तु तथापि समाप्तिः परं जायतां मंगलरूपहेतोः सत्वादित्याशंक्याह। विघ्नध्वंसस्येति। तथा च स्वजन्यविघ्नध्वंससं
बंधेन मंगलाभावान्न तत्र समाप्तिरिति भावः। आकुरिस्य स्वरसोऽभावनं तद्बीजं तु विघ्नध्वंसद्वारा मंगलस्य हेतुत्वं न संभव
ति। नास्तिक ग्रंथसमाप्तौ व्यभिचारो जन्मांतरीयसमाप्तिमुद्दिश्य जन्मांतरे शिष्टैर्मंगलाननुष्ठानाज्जन्मांतरे मंगलकल्पन
यापि न निस्तारः। न च स्वजनक विघ्नध्वंसोऽसत्यवच्छेदकतासंबंधेन समाप्तिं प्रति स्वजन्यविघ्नध्वंसावच्छेदकतासंबंधेन मंग
लस्य हेतुत्वात् स्वप्रतियोगि चरमवर्णानुकूलकृतिमत्वसंबंधेन समाप्तिं प्रति आश्रयतासंबंधेन मंगलस्य हेतुत्वाद्वा जन्मां
तरीय मंगलकल्पनया न व्यभिचार इति वाच्यं। तथा सति जन्मांतरीयसमाप्तिमुद्दिश्य जन्मांतरे मंगलकरणापत्तेः। अतः स्वप्र
तियोगि चरमवर्णावच्छेदकतासंबंधेन समाप्तिं प्रति स्वोऽसत्यवच्छेदकजातीयतासंबंधेन मंगलहेतुत्वस्य वाच्यतया नास्तिक
शरीरे व्यभिचारस्य दुर्वारत्वात्। न च पुत्रकामाधिकरण विरोधः। सहकार्यंतरासमवधानेन न ऐहिक पुत्राभावेप्यामुष्मिक पु
त्ररूपफलस्य तत्र सिद्धांतितत्वादिति वाच्यं। तत्र पुत्रमात्रकामनाश्रवणात्। इह तु विशिष्ट शिष्टाचारानुमितश्रुतावैहिक समा
प्तेरेव मंगलफलत्वात्। न च स्वावच्छेदकावच्छिन्न प्रतियोगिकत्व स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन मंगलजन्यवि
घ्नध्वंसविशिष्टसमाप्तित्वस्य मंगलकार्यतावच्छेदकत्वान्न व्यभिचार इति वाच्यं। कारणस्य कार्यतावच्छेदकत्वानभ्युपगमात्।
अत एव काशीमरणान्मुक्तिरिति श्रुतं तर्गत पंचम्याः प्रयोजकत्वोपवर्णनं ग्रंथकृतां संगच्छते। अन्यथा तत्रापि काशीमरणविशि

स्मुक्तिं प्रति काशीमरणहेतुत्वस्य निर्दुष्टतया तथोपवर्णनमसंगतमेव स्यात्। अथ तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यते
ऽयनायेति श्रुत्या तत्त्वज्ञानस्य मुक्तिसामान्यं प्रति हेतुत्वं प्रतिपादितं तच्च काशीमरणस्य मुक्तिहेतुत्वे न संभवति। काशीमरणजन्य
मुक्तौ तत्त्वज्ञानस्य व्यभिचारादतः काशीमरणस्य न मुक्तिजनकत्वमपि तु तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमेवेति ग्रंथकृ
तां तत्त्वस्य पंचम्याः प्रयोजकत्वोपवर्णनं न तु कारणं कार्यतावच्छेदकत्वात्तथोपवर्णनमिति चेदस्तु कारणस्य कार्यतावच्छेदक
त्वमस्तु च सर्वो करीत्या मंगलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य कार्यतावच्छेदकत्वेन नास्ति कृत्शरीरे व्यभिचारवारणं।
एवमपि भोगादिनास्य विघ्नध्वंसस्सर्वत्र समाप्तौ कॢप्तनियतपूर्ववर्त्तिताकेन ध्वंसेनैव मंगलस्थलीयसमाप्त्युपपत्तेर्मंगलस्या
न्यथासिद्धत्वं दुर्वारमेव। न च व्यापारेण व्यापारिणो नान्यथासिद्धिरिति वाच्यं। यत्र व्यापारिणः प्रमाणबोधितकारणता निर्वाहा ७
य व्यापारस्य कारणत्वं कल्प्यते। यथा यागस्य स्वर्गहेतुतानिर्वाहार्थमपूर्वं तत्रैव व्यापारेण व्यापारिणो नान्यथासिद्धिः। अतए
व काशीमरणस्य तत्त्वज्ञानेन मुक्तौ अन्यथासिद्धत्वात्प्रयोजकत्वपरतया श्रुतिसमर्थनं संगच्छते। प्रकृते च प्रतिबंधकाभा
वस्य कार्यमात्रे हेतुतायाः मंगलकारणतां विनापि कॢप्ततया मंगलस्यान्यथासिद्धत्वं दुष्परिहरमेव। किंच विघ्नध्वंसस्य
नियामकत्वेन तत्संबंधावच्छिन्नप्रतियोगिताया अप्रसिद्धत्वेन हेतुत्वं च न स्यात्। विघ्नध्वंसस्य द्वारत्वमिष्टं तोषाचां मते
ऽपि विघ्नध्वंसस्य कार्यत्वाचस्य चतया त्र विघ्नो मा भूदिति कामनया च मंगलाचरणेन विघ्नध्वंस एव फलमिति वदतां चिंताम
णिकृतां मतमाह॥ ॥नव्यास्त्विति॥ ॥विघ्नध्वंस एवेत्येवकारेण समाप्तिव्यवच्छेदः। फलं प्रत्युद्देश्यं। ननु समाप्तिस्त
र्हि कस्य का स्यादित्यत आह॥ ॥समाप्तिस्त्विति॥ बुद्धिज्ञानं प्रतिभा तद्विशेषः स्फूर्त्तिस्त्वयः। प्रतिभादीत्यादिना विघ्नसंसर्गाभा
वपरिग्रहः। अनयैव रीत्या क्वचित्स्थले प्रचयमहानिर्वहेणे सेवफलं दृष्टिस्तस्य कारणादेवेति बोध्यं। एवं मंगलस्य विघ्नध्वं

न१ न३

संप्रतिजनकत्वे। स्वतः सिद्धविघ्नविरहवतेति। विघ्नात्यंताभाववता। ननु निष्फले प्रवृत्तिरेव कथमत आह। विघ्नशंकयेति।
संशयनिश्चयसाधारणविघ्नज्ञानमेव प्रवर्तकमिति भावः। तदाचरणात्। मंगलाचरणात्। ननु विघ्नसंशये मंगलाचरणमे
वास्तिद्धमित्यत आह। तथैवेति। शिष्टाचारादिति। विषयितासंबंधेन मंगल इति शेषः। ननु निर्विघ्नपुरुषानुष्ठितमंगलस्थले
न्वयव्यभिचारेण विघ्नध्वंसंप्रति मंगलस्य कारणता बाधिता तथा च बाधितार्थबोधकत्वादिदस्याप्रामाण्यमितीमोश्रुते
कारणताबोधकत्वमंगीकृत्यैव शंकां निरस्यति। न चेति। तस्य निर्विघ्नपुरुषानुष्ठितमंगलस्य। तद्बोधके [illegible]ति। मंगलविघ्नध्वंसयोः
कार्यकारणबोधकेत्यर्थः। सति विघ्न इति। तथा चोपदर्शितस्थले प्रतियोगिरूपकारणाभावेन विघ्नध्वंसरूपकार्यानुदये
पपत्तौ कारणताया अबाधितत्वेन न कारणताबोधकवेदाप्रामाण्यमिति भावः। अत एव नाशं प्रति प्रतियोगिनः कारणत्वादे
व। तद्बोधकवेदाप्रामाण्यमिति। प्रायश्चित्तस्य पापनाशकत्वबोधकवेदाप्रामाण्यमिति भावः। ननु न मंगलं विघ्नध्वंसे कार
णं विनायकस्तवपाठादिजन्यविघ्नध्वंसे व्यभिचारात्। विनायकस्तवस्य मंगलत्वेपि तदनुकूलकंठाभिघातरूपस्य तत्पा
ठस्य मंगलत्वाभावात्। न च पाठकृतासंबंधेन विनायकस्तव एव विघ्ननाशकः स च मंगलमेवेति न व्यभिचार इति वाच्यं।
सर्वे विघ्नाः शमं यांतीत्यादिना तत्पाठस्यापि विघ्ननाशकत्वबोधनात्। प्रायश्चित्तजन्यविघ्नध्वंसे व्यभिचाराच्चेत्यत आह। मं
गलं चेति। विनायकस्तवपाठादिरित्यादिना प्रायश्चित्तादिसंग्रहः। तथा च मंगलस्य स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधे
न मंगलविशिष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकं। एवं विनायकस्तवपाठस्य उपदर्शितसंबंधेन वि
नायकस्तवपाठविशिष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकमिति न व्यभिचार इति भावः। ननु विघ्न
ध्वंस एव यदि मंगलस्य फलं तदा समाप्तिकामस्य मंगले प्रवृत्तिर्न स्यादतः समाप्तिसाधनविघ्नध्वंससाधनत्वान्मंगले

टी॰ ४

ते२ आ२।५ वा९

प्रवृत्तिर्वा स्या। तत्र न संभवति स्वतःसिद्धविघ्नविरहस्थले व्यभिचारेण विघ्नध्वंसस्य समाप्तिसाधनत्वाभावादित्याशंकां निरस्यति क्व चिदिति। प्रतिबंधकेति। संसर्गाभावस्य संसर्गाभावत्वेन संसर्गाभावस्य। तथा च विघ्नसंसर्गाभावत्वेन हेतुत्वान्न पूर्वोक्तव्यभिचार इति भावः। अत्र च तन्नौं विघ्नाभावत्वेन हेतुता न तु विघ्नाभावकूटत्वेन विघ्नप्रागभावादीनामेकत्रासंभवेन समाप्तिर्न स्यादिति बोध्यं। यत्र मंगलं विनापि समाप्तिस्तत्र विघ्नध्वंसाभाववति समाप्तेर्दर्शनाद्व्यतिरेकव्यभिचारमाशंक्य निषेधति इष्टं चेति। दुरितध्वंसकल्पने तज्जनकीभूतमंगलकल्पने च गौरवात्। स्वतःसिद्धेति। यत्र च मंगले सत्यपि न समाप्तिस्तत्र मंगलादिघ्नध्वंसो भवत्येव समाप्त्यभावस्तु विघ्नान्तरस्य तत्तन्मंगलानंतरोत्पन्नविघ्नादेरेव बोध्यं। अथ समाप्तिविघ्नध्वंसयोः स्वरूपसंबन्धिनोः कथं कार्यकारणभाव इति चेदुच्यते। स्वप्रतियोजनकत्व संबंधेन चरमवर्णध्वंसरूपसमाप्तिप्रतिनिरोषणतासंबंधेन विघ्नसंसर्गाभावत्वेन हेतुत्वमिति। वस्तुतस्तु आकुरित्सनेन सूचितामन्यथासिद्धिं सूचयति। क्व चिदिति। विघ्नासंताभावस्यैवद्वारेण विघ्नध्वंसस्य तद्वारकमंगलस्य च व्यवच्छेदः। समाप्तिसाधनं। समाप्त्यव्यवहितपूर्वक्षणवृत्तितया निश्चितः। तथा च तेनैव मंगलस्थलीयसमाप्तिनिर्वाहे मंगलस्य तज्जन्यविघ्नध्वंसस्य चान्यथासिद्धिः ध्वंस[illegible] आह। प्रतिबंधकसंसर्गेति। प्रतिबंधकसत्वे[illegible] प्रागभावयोरत्यंताभावे न विरोधे मानाभावात्। ध्वंसस्थलेप्यत्यंताभावसत्वादिति भावः। नन्वन्योन्याभावभिन्नाभावत्वेनैव लाघवात् हेतुतास्त्विति आह। प्रतिबंधकसंसर्गेति। प्रतिबंधकसत्वेपि संबंधांतरावच्छिन्नाभावस्य सत्वात्कार्योत्पत्तिवारणाय तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वेनैन हेतुत्वस्य वाच्यत्वेनैन ध्वंसस्य हेतुता। तस्य संसर्गावच्छिन्नत्वे मानाभावादिति भावः॥

न

विघ्नासंताभावेनैव

नचद्वितीयैवकामनाफलविषयिणी ७

दुरित

दुरितध्वंसः दुरितध्वंससामग्री प्रयुक्तः स्वतः सिद्धो दुरितकारणाभावप्रयुक्तः। एतेन विघ्नध्वंसस्य तदसंताभावस्य वास
माप्तिहेतुताविचारस्याप्रस्तुततया तद्यवस्थापनेप्रकृतानुपयोगः। एवं प्रतिबंधकाभावकूटस्य हेतुत्वे ऽतीतानागतव्य
क्ति प्रागभावतध्वंसयोर्युगपदवस्थानासंभवेनैकदा कूटाप्रसिद्धिः। एवोक्तरीत्या प्रतिबंधकात तत्संसर्गावच्छिन्न
प्रतियोगिताकत्वस्य प्रतिबंधकाभावविशेषणत्वेन ध्वंसप्रागभावयोरसंग्रहस्येति दूषणानि निरस्तानि। उक्त
रीत्या प्रतिबंधकासंताभावस्यैव कार्यमात्रहेतुत्वादिति। अन्ये केचित्। निर्विघ्नं यदि समाप्यतामिति कामनये त्वविघ्नो
घ्नोमास्त्विति कामनया च मंगलमाचरंतीति निर्विवादं। तत्राद्या कामना फलविषयिणी। द्वितीयातूपायविषयि
णी। आद्यापि कामनासविशेषणेहीति न्यायेन विघ्नाभावस्यैव फलत्वबोधिकेति वर्द्धमानोक्तं संगतं। तन्न्यायस्य सति वि
रोध्य बाध एव प्रवृत्तेः। नचोपायविषयिणी कामना न हेतुरिति वाच्यं। पुत्रो मे जायतामिति न्यायजइत्यादौ यागसाधन
त्वे तु चोपायविषयिण्याः कामनयाहेतुत्वादाद्या तु कामना नोपायविषयिणीति फलविषयिण्येव। न चोभयवि
षयिण्याद्यकामनयाकथं समाप्तिरेव फलमितिवाच्यं। विघ्नत्वादौ व्यभिचारेण कामनाविषयत्वस्य फलविनिगमका
भावाद्विघ्नाभावस्य फलतावच्छेदकत्वेन कामनया अविषयत्वाच्च। न च स्वत्वनियामकसंबंधस्य प्रतियोगितानवच्छेद
कत्वेन तत्संबंधावच्छिन्नायाः कारणताया अप्रसिद्धिरिति वाच्यं। स्वत्वनियामकसंबंधस्यापि प्रतियोगितावच्छेदक
त्वांगीकारात्। अतएव संयोगेन गगनाभावादीनां केवलान्वयित्वमुपपद्यत इत्याहुस्तन्न। एवोक्तान्यथासिद्धेर्दुरुद्धरतया
मंगले समाप्तिहेतुत्वस्य बाधात्। मूलेन्ततनेसादि। नेतनो यो जलधरो मेघस्तस्य रुचिरिव रुचिर्दृष्टिर्यस्य तत्संबे। एते

वा

= सविशेषणे हि विधिनिषेधौ विशेष्ये विशेषणे च प्रक्रामत इति न्यायेनेति = ८

न यथानन्तनजलधरः शीघ्रं दृष्टिप्रदस्तथायमपि स्वाभिलषितफलप्रदातेति सूचितं। नमस्कार्यस्य भगवतः संस्तुतत्वं सूचयि
तुं विशेषणमाह। ग्लेति। गोपानां वधूयो युवत्यस्तासां दुकूलं यस्तेन तस्य चोरायेत्यर्थः। तस्मा इति तच्छब्दः सामान्य
तः सकलजनप्रसिद्धत्वसूचनाय। श्रीकृष्णाय नम इत्यनेन भगवतो नमस्कारः प्रकारीभूततापकर्षावधिस्वरूपत्वमु
क्तं तद्युक्तं। मानाभावात्। भगवतीत्याशंक्य नैयायिकाभिमतेश्वरसाधकानुमानसूचनाय तत्रैव संसारमहीरुहस्यबी
जायेत्युक्तं। तत्र च संसारस्य महीरुह इति षष्ठीतत्पुरुषभ्रमं व्यावर्तयितुं कर्मधारयसमासमाह। मुक्तावल्यां संसार एवेति। बीज
त्वं समवायिकारणत्वं तच्चेश्वरे बाधितमत आह। निमित्तेति। ननु ईश्वरस्य मंगलत्वान्नमस्काररूपमंगलाचरणमयुक्तं ई
श्वरे मानाभावात्। न हि तत्र प्रत्यक्षं प्रमाणं। अरूपिद्रव्यत्वेन बाह्यप्रत्यक्षाविषयत्वात्। नापि मानसं। परात्मनो परेण
मनसा प्रत्यक्षवारणाय आत्मप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयमनःसंयोगत्वेन हेतुत्वस्यावश्यक[illegible]त्वात्। ईश्वरे
तस्याभावात्। न च द्यावाभूमी जनयन्देव एक इत्यादिश्रुतेरेव प्रमाणत्वं। श्रुतीनामीश्वरोच्चरितत्वेनैव प्रामाण्यादीश्वर
संदेहे श्रुतिप्रामाण्यस्यापि संदिग्धत्वादत आह। एतेनेति। प्रमाणं अनुमानरूपं प्रमाणं। तथाहि क्षित्यंकुरादिकमपीति। नन्व
त्र पक्षतावच्छेदकं न तावत् क्षितित्वं। अंकुरादेरपि क्षितित्वेन पृथगुपादानवैयर्थ्यात्। किं च क्षितित्वसामानाधिकरण्येन सा
ध्यसिद्धेरुद्देश्यत्वे हि अंशे घटादौ वंशतः सिद्धसाधनम् अवच्छेदकावच्छेदेन तथात्वे परमाणौ बाधः। जन्यक्षितित्वस्य पक्षतावच्छे
दकत्वे परमते जन्यपदव्यावर्त्याप्रसिद्धिः। तन्मते जन्यक्षितेरभावात्। जन्यत्वस्यैव तथात्वसंभवेन पक्षतावच्छेदककोटौ
क्षितित्वस्य वैयर्थ्यं। व्यर्थत्वाच्च। न च तदपि संभवति। पक्षतावच्छेदकहेत्वोरैक्यप्रसंगादिति चेन्न। स्वरूपसंबंधवि

तो २ कार्यत्वस्य १ इति १ रापरोक्ष

रोपरूपकार्यत्वस्यैव पक्षतावच्छेदकत्वात्। प्रागभावप्रतियोगित्वस्यैव हेतुत्वेन तयोरैक्याभावात्। साध्यं च नस्योपादानगोचरकृ
न चिकीर्षाकृतिजन्यत्वं। कार्यमात्रं प्रति कृतेरेवान्वयव्यतिरेकाभ्यां हेतुत्वेन तज्जनकज्ञानचिकीर्षयोस्तथात्वान्यथासिद्धेः
नतन्नितयजन्यत्वरूपसाध्यस्य तत्र बाधात्। दृष्टांतपक्षसाधारणस्य स्वत्वस्याभावेन तद्घटितस्वोपादानगोचरत्वादिसा
ध्यस्यासंभवात्। कृतित्वापेक्षयोपादानगोचरकृतित्वस्य गौरवेण कार्यजनकतानवच्छेदकत्वाच्च। किंतु विशेष्यता
संबंधावच्छिन्नकृतित्वावच्छिन्नकारणतानिरूपितकार्यत्वं तेनादृष्टद्वारास्मदीयकृतिजन्यत्वस्य पक्षे सत्वेपि न सिद्धसा
धनं। यदि च कार्यमात्रे कृतित्वेनैवान्वयव्यतिरेकाभ्यां ज्ञानत्वेनेच्छात्वेन च हेतुत्वं स्वीक्रियते तदा तादृशज्ञानजन्यत्वमि
च्छाजन्यत्वं कृतिजन्यत्वं वा साध्यमस्तु। यत्तु। कर्तृजन्यत्वमेव साध्यमिति तन्न। कार्यमात्रे कर्तृत्वेन जनकत्वे मानाभाव
लाघवाच्च कृतित्वेनैव तत्र हेतुत्वात्। ननु कार्यं विशेष्यतासंबंधावच्छिन्नकृतिनिष्ठजनकतानिरूपितजन्यताशालि
प्रागभावप्रतियोगित्वादित्यनुमानं फलितं। तत्र तु ध्वंसे पक्षतावच्छेदकजन्यत्वाक्रांते विशेष्यतासंबंधावच्छिन्नकृ
तिनिष्ठजनकतानिरूपितसमवायसंबंधावच्छिन्नजन्यत्वरूपसाध्यस्याभावाद्बाध इति चेन्न। सत्वविशिष्टजन्य
त्वस्यैव ध्वंसव्यावृत्तस्य पक्षतावच्छेदकत्वोपगमात्। न च हेत्वधिकरणे ध्वंसे उक्तसाध्याभावेन व्यभिचार इति वाच्यं।
सत्वविशिष्टस्य हेतौ विशेषणात्। अथैवं रीत्या व्यभिचारवारणेपि ध्वंसस्य कृतिजन्यत्वे मानाभावेन कार्यमात्रस्य कृ
तिजन्यत्वप्रवादो व्याहन्यतेति चेन्न। तादृशप्रवादस्य निर्युक्तिकत्वेनाश्रद्धेयत्वात्। यद्वा जन्यत्वमात्रं ध्वंससाधारणमे
व पक्षतावच्छेदकं। कृतिजन्यत्वमात्रं साध्यं। एवं च हेतावपि सत्ववैशिष्ट्यं नोपादेयं। प्रयोजनाभावात्। एवं च ध्वंसेपीश्व

री

समवायसंबंधावच्छि-न्न

रकृतिजन्यत्वस्य निराबाधतया कार्यमात्रे कृतिजन्यत्वप्रवादोऽप्युपपद्यत इति। न च कृतिजन्यत्वमात्रस्य साध्यत्वे दृष्ट
द्वारा दृष्टविशदिगोचरासादीयकृतिजन्यत्वमादाय सिद्धसाधनमिति वाच्यं। अदृष्टाद्वारकत्वेन कृतिजन्यताया विशेषण
यत्वादित्यादिक्। एतादृशानुमितौ लाघवज्ञानसहकारेण ज्ञानेच्छाकृतिषु नित्यत्वमेकत्वं च भासत इति नित्यैकत्वासि
द्धिः। अथ ईश्वरज्ञानादौ बुद्धित्वमेकत्वमनुमित्या विषयीक्रियते न तावत्संख्यारूपं गुणे गुणानंगीकारात्। न च नित्य
ज्ञानवृत्तित्वभेदप्रतियोगितानवच्छेदकस्वरूपमेकत्वं तद्विषय इति वाच्यं। ईदृशैकत्वस्य नित्यज्ञानानुमितेः प्रागनु
पस्थितत्वेन तादृशानुमितौ भानासंभवादिति चेदत्र केचित्। सामानाधिकरण्यसंबंधेनैव ज्ञानादावाश्रयगत
मेकत्वमनुमितौ भासते। यद्वा। द्वित्वासामानाधिकरण्यरूपमेकत्वं तद्विषयः। न च जीवेश्वरगतद्वित्वसामानाधिक
रण्यस्येश्वरज्ञानादौ सत्त्वाद्बाध इति वाच्यं। दुःखवदवृत्तित्वेन द्वित्वस्य विशेषणीयत्वात्। न चैवमपि घटेश्वरगतद्वि
त्वसामानाधिकरण्यस्य तत्र सत्त्वाद्बाध इति वाच्यं। आत्मानात्मवृत्तिभिन्नत्वेनापि द्वित्वस्य विशेषणीयत्वादित्याहुः। त
न्न। ईश्वरे ज्ञानद्वयांगीकारेऽप्येतादृशैकत्वभाननिर्वाहेणाहेतुस्यासिद्धेः। वस्तुतस्तु। स्वाधिकरणावृत्तिस्वभिन्नज्ञान
कत्वमेवैकत्वमेवमीश्वरेच्छाकृत्योरपि द्रष्टव्यं। एवं च तादृशज्ञानादिसिद्धावपि गुणत्वेन हेतुना द्रव्याश्रितत्वे साधनीये द्र
व्यांतरस्य बाधादीश्वरसिद्धिरिति दिक्। अप्रयोजकत्वात्। अनुकूलतर्काभावादिति भावः। इदमुपलक्षणं। शरीराजन्य
त्वहेतौ शरीररूपविशेषणस्यासिद्धिवारकस्यापि व्यभिचारावारकत्वेन व्यर्थतया तद्विशेषणावच्छेदेन व्याप्तिग्रहासं

यद्विशेषयोः कार्यकारणभावः असति बाधके तत्सामान्ययोरपीति न्यायेनेति ॥६

भवेन व्याप्यत्वासिद्धेश्च सोपि दृश्यं। न च व्यर्थविशेषणत्वस्याधिक्यो न्यानिग्रहस्थानत्वेपि तज्ज्ञानस्य व्याप्तिज्ञानप्रतिबं
धकत्वे मानाभाव इति वाच्यं। तथापि गुरुधर्मस्यानवच्छेदकतया साध्यसंबंधितावच्छेदकरूपव्याप्तेस्तत्राभावेन व्याप्यत्वा
सिद्धेर्दुर्वारत्वादिति। तदुक्तमाचार्यैः एकाम सिद्धिं परिहरतो द्वितीयापत्तेरिति। कृतत्वेन कार्यत्वेन कार्यकारणभावः
वेति। न चान्वयव्यतिरेकाभ्यां घटत्वावच्छिन्नं प्रति कुलालादिः कृतित्वादिना हेतुत्वादेतादृशकार्यकारणभावे माना
भाव इति वाच्यं। घटत्वपटत्वादिभेदेनानंतकार्यकारणकल्पनापेक्षया कार्यत्वापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वे
न हेतुत्वकल्पनस्यैवोचितत्वात्। यद्विशेषयोरिति न्यायेन कार्यत्वकृतित्वाभ्यां सामान्यकार्यकारणभावस्यावश्यक
त्वाच्च। न च तादृशन्यायो निष्प्रमाण इति वाच्यं। कार्यत्वावच्छिन्नाभावे तत्तत्कूटस्य प्रयोजकत्वकल्पने गौरवा
त्। कृतित्वावच्छिन्नाभावस्यैकस्य प्रयोजकत्वे लाघवात् इति। केचित्तु। मास्तु कार्यत्वं कृतेः कार्यतावच्छेदकं तथापि घ
टत्वावच्छिन्नं प्रति कृतेः कारणतया सर्गाद्यकालीनं घटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्वस्य साध
नेऽजीवानां बाधादीश्वरसिद्धिरस्यान्नु। उपाधिनिकृतस्तु। कार्यत्वावच्छिन्नं प्रति कृतेर्हेतुत्वाभावेपि घटत्वावच्छिन्नं प्र
ति कृतेर्हेतुतया खंडोत्पत्तेः पूर्वं कृतेरावश्यकतया तदाश्रयत्वेनेश्वरसिद्धिमाहुः। नन्वेवं शरीराघटादिकं कुलालादिचे
ष्टयोरन्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति चेष्टात्वादिना हेतुत्वादंकुराद्युत्पत्तेः पूर्वं चेष्टानुरोधेनेश्वरस्य नियत
शरीरमपि सिध्येदिति चेन्न। तादृशान्वयव्यतिरेकाभ्यां क्रियात्वेन हेतुत्वात्तत्र चेष्टात्वेन हेतुत्वे मानाभावात्। आचा
र्यमतानुयायिनस्तु अस्तु चेष्टात्वेन तत्र हेतुत्वं। अस्तु च तदनुरोधेनेश्वरस्य निसंशरीरं तथापि नेश्वरस्यानि

इति सेन २

तिरिक्तशरीरसिद्धिः। परमाणूनामेव तच्छरीरत्वोपगमात्। एवं चेश्वरकृतिजन्यचेष्टावाद्भिः परमाणुरूपशरी
रैरेव तत्कार्याणामुत्पत्तिः। परमाणुक्रियायां चेष्टास्वरूपत्वे आत्मयोगीकारात् शरीरलक्षणं त्वावयवित्वे सति निवेशनीयं। न
परमाणूनां शरीरत्वानुपपत्तिः। न च नानापरमाणूनां शरीरत्वकल्पने गौरवात् लाघवेन तदतिरिक्तशरी
रसिद्धिरिति वाच्यं। तच्छरीरस्य महत्त्वे भग्नस्य तस्य पाषाणादौ प्रवेशासंभवेन पाषाणान्तर्वर्तिभेकशरीरोत्पा
दकत्वानुपपत्तेः। अणुत्वे चेद्दूरस्थकार्योत्पादकत्वानुपपत्तेरित्याकुरित्य... लं पल्लवैरिति। यत्तु पूर्वोक्तस्थापनानुमा
ने शरीरजन्यत्वमुपाधिः। तस्य घटादौ साध्यव्यापकत्वात्। अंकुरादौ साधनाव्यापकत्वाच्च। न चांकुरादौ सकर्तृक
त्वरूपसाध्यसंदेहेनोपाधेः साध्यव्यापकत्वसंशयान्नोपाधित्वनिश्चय इति वाच्यं। तथापि संदिग्धोपाधित्वस्य
दुर्वारत्वात्। न चेदृशोपाधिसंदेहाहितो व्यभिचारसंदेहः पक्षीयसंदेह एव स च न प्रतिबंधक इति वाच्यं। पक्षेतरसम
यो व्यभिचारसंशयस्यापि प्रतिबंधकत्वादत एवानुकूलतर्कविरहदशायां पक्षेतरत्वं संदिग्धोपाधिरिति सिद्धान्तग्र
थकृतां संगच्छत इति। तन्न। कार्यत्वेन कृतित्वेन कार्यकारणभावरूपस्यानुकूलतर्कस्य सत्त्वेन कार्यत्वरूपहेतोः सा
ध्यव्याप्यत्वनिश्चयेन साध्यव्याप्याव्यापकत्वेनोपाधेः साध्याव्यापकत्वनिश्चयादिति। एवं चोक्तानुमानेनेश्वरसिद्धौ
तदुच्चरितत्वेन वेदस्य प्रामाण्यनिश्चयाद्वेदोपीश्वरे प्रमाणमित्याह। द्यावाभूमी इति। इत्याद्य इत्यादिना ईश्वरमुपास्थि
तयः सर्वज्ञः स सर्वविद्यस्य ज्ञानमयं तपः सोऽकामयत इत्यादिना परिग्रहः। कार्यपक्षकानुमानं चोपलक्षणं। सर्गाद्यकाली
:नपक्षः पर्वतादिः। तत्समः महान् साधुः

स्या०२

८

मु.

८

टी.

नंद्व्यणुकप्रयोजकं कर्म। प्रयत्नजन्यं। कर्मत्वात्। गुरुत्ववतां पतनाभावः। पतनप्रतिबंधप्रयत्नयुक्तः। धृतित्वात्। ब्रह्मांडना
शः। प्रयत्नजन्यः। नाशत्वात्। घटादिव्यवहारः। स्वतंत्रपुरुषप्रयोज्यः। व्यवहारत्वात्। आधुनिककल्पितलिप्यादिवत्
वेदजन्या प्रमा। वक्तृयथार्थज्ञानजन्या। शब्दप्रमात्वात्। वेदः। असंसारिपुरुषप्रणीतः। वेदत्वात्। वेदः। पौरुषेयः। वा
क्यत्वात्। द्व्यणुकपरिमाणजनिका संख्या। अपेक्षाबुद्धिजन्या। एकत्वान्यसंख्यात्वात्। इत्यनुमानांतराण्यपि साक्षात्सं
परया वा ईश्वरसाधकानि बोध्यानि। तदुक्तं। कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः॥ वाक्यात्संख्याविशेषाच्च सा
ध्यो विश्वविदव्यय इति॥१॥ ॥आयोजनं कर्म। पद्यते गम्यतेऽनेन पदं व्यवहार इति संक्षेपः॥ फलेशिष्याबधानाय प्रति
जानीते। द्रव्यगुणा इति। निरूप्यंत इति शेषः। संयोगापेक्षया कर्मणोऽतिरिक्तत्वं नास्तीति भूषणमतं निराकर्तुं तथेत्युक्तं॥
यथा गुणः पृथक् पदार्थस्तथा कर्मापीत्यर्थः। अभावोऽधिकरणात्मक एवेति प्राभाकरमतं दूषयितुं पुनस्तथेत्युक्तं। युक्तिश्चा
ग्रे वक्ष्यते। यद्यपि विभागवाक्यस्य न्यूनाधिकसंख्याव्यवच्छेदकतयैव सप्तत्वसंख्या लब्धा तथापि सप्तग्रहणं स्पष्टार्थं
नन्वन्ये पदार्थाः कुतो नोक्ता इत्यत आह। कीर्तिता इति॥ तथा चैतेभ्योऽन्ये पदार्था न संत्येन कणादप्रभृतिभिरनुक्तत्वादि
ति भावः। नन्वितरेषु ग्रंथेषु षडेव पदार्थाः सप्तमस्त्वभाव इति निरूपितं तथैवात्र कुतो न निरूपितमित्याशंक्याह। मुक्ताव
ल्यां सप्तमस्येति। अत्र समवाये स्वार्थसमवायान्यतरसंबंधेन सत्तावत्त्वं भावत्वं तदभावोऽभावत्वमिति। प्राप्तं। अर्थोऽसा
न्तेन प्राप्तत्वेन। पृथगुपन्यास इति। भावत्वेनोपन्यास इत्यर्थः। तेषामिति शेषः। नन्वन्ये पदार्थाः कथं न संतीति न्यायग्रंथे षोड

८

उत्रा

शपदार्थनिरूपणादित्याशंक्य नैय्यायिकानामपि मते सप्तपदार्था इत्यविरुद्धं षोडशपदार्थानां सप्तपदार्थेष्वेवांतर्भावं तत्रादिसू
त्रे एतेनेति । उक्तार्थे भाष्यसंमतिमाह । प्रतिपादितं चेति । एवमेवेति । द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तै
व पदार्थाः । षोडशानामत्रैवांतर्भावादिति प्रतिपादितमित्यर्थः । कथमंतर्भाव इति चेदित्थं । प्रमाणस्येंद्रियादेर्द्रव्ये । व्याप्ति
ज्ञानादेर्गुणे । प्रमेयस्यात्मशरीरेंद्रियस्वरूपस्य द्रव्ये । अर्थस्य गंधरूपस्पर्शशब्दस्वरूपस्य गुणे । बुद्धेर्गुणे । मनसो द्र
व्ये । प्रवृत्तेर्गुणे । दोषाणां मिथ्याद्वेषमिथ्याज्ञानस्वरूपाणां रागद्वेषमोहपदप्रतिपाद्यानां गुणे । प्रेत्यभावस्याभावो जननमि
तिप्रसत्या मरणानंतरजन्मत्वं प्रेत्यभावपदप्रवृत्तिनिमित्तकं । चरमशरीरे प्राणसंयोगध्वंसो मरणं । आद्यः शरीरप्राण
संयोगो जन्म । तथा च मरणानंतरतादृशसंयोगरूपस्य तस्य गुणे । सुखदुःखसंवेदनरूपस्य मुख्यफलस्य गुणे । गौण
मुख्यसाधारणजन्यमात्रस्वरूपफलस्यापि द्रव्यादिषु । पीडालक्षणस्य दुःखस्य गुणेंतर्भावः । अपवर्गस्तु आत्यंतिक
दुःखनिवृत्तिः । दुःखानि शरीरं षडिंद्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेत्येकविंशतिः । तत्र दुःखत्वजाति
शून्ये शरीरादौ दुःखसंबंधितया गौणं दुःखत्वं । स्वर्गादिसुखस्यापि तन्नाशज्ञानेन दुःखसंबंधित्वमव्याहत
मेव । न चैकविंशतिदुःखांतर्गतयोर्मनःश्रवणयोर्नित्यत्वात्कथं तन्नाश इति वाच्यं । यद्रूपविशिष्टस्य श्रवणस्य ज्ञा
नद्वारा दुःखहेतुतया दुःखत्वं । तद्रूपकर्णशष्कुल्याः नाशेन तद्विशिष्टश्रवणेंद्रियरूपदुःखनाशात् । एवमात्मसंयोगरू
पव्यापारविशिष्टस्यैव मनसो ज्ञानद्वारा दुःखरूपतया व्यापारनाशेन तद्विशिष्टमनोरूपदुःखनाशसंभवादिति दुःख

मु०

९

टी०

निवृत्तौ वा स्यादिति चेन्न स्वसमानाधिकरणदुःखासमानकालीनत्वं। नन्वेतादृशदुःखध्वंसस्य मुक्तित्वे कथं तत्वज्ञानसा
ध्यता तस्येति चेदित्थं। तत्वज्ञानेन मिथ्याज्ञानवासनानाशः। वासनानाशे च दोषस्य वासनाविशिष्टरागादेरभावः। वि
शेषणाभावे विशिष्टाभावात्। तादृशरागरूपहेत्वभावे च प्रवृत्तेर्धर्माधर्मरूपाया अभावोऽनुत्पत्तिः। तदनुत्पादे प्रारब्ध
कर्माधीनदेहान्यदेहसंबंधरूपजन्माभावः। भोगतत्वज्ञानाभ्यां प्रारब्धतदन्यकर्मनिवृत्तिरिति। जन्माभावे दुःखानुत्पा
दः। तथा च स्वसमानाधिकरणदुःखासमानकालीनत्वरूपविशेषणं तत्वज्ञानस्य प्रयोजकत्वान्मुक्तेस्तत्वज्ञानसाध्यत्वं।
तथा च सूत्रं। दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतराभावादपवर्ग इति॥ ॥अस्यार्थः। पठितेषु ज
न्मादिमध्ये उत्तरोत्तराणामपाये तदनंतराभावादव्यवहितपूर्वाभावात्। तथा च तत्वज्ञानेन मिथ्याज्ञानस्य नाशः। तेन दोषा
णां नाशः। ~~तेन दोषाणां नाशः~~। तेन प्रवृत्तेरनुत्पादः। तेन जन्मानुत्पादः। तेन दुःखानुत्पाद इति सर्वोक्त एवार्थः पर्यवसितः। ए
कविंशतिदुःखनाशस्तस्य कारणसाध्यो न तत्र तत्वज्ञानस्य प्रयोजकतेति वदंति। नव्यास्तु योग्यविभुविशेषगुणनाशं
प्रति स्वोत्तरवर्तिगुणानां कारणत्वात् स्वोत्तरोत्पन्नगुणेनैव दुःखध्वंसरूपमुक्तिसंभवे न तत्र तत्वज्ञानापेक्षेति। दुःखप
दं दुःखसाधनतयोपस्थितपरं तथा व्याख्येयं। दुरितस्य चायोग्यगुणत्वान्न स्वोत्तरवर्तिगुणनाश्यतेति। तन्नाशमु
क्तेस्तत्वज्ञानसाध्यत्वमेवेत्याहुः। तथा चैतादृशाभावस्याभावे। संशयस्य गुणे। साध्यतया इच्छाविषयरूपस्य प्र
योजनस्य यथायथं इत्यादिषु। साध्यसाधनोभयवन्निश्चयविषयरूपस्य दृष्टांतस्य यथायथं इत्यादिषु। तत्ते सिद्धा

९

शास्त्र॰

र्थरूपस्य सिद्धांतस्य द्व्यादिषु। शब्दस्वरूपप्रतिज्ञाद्यन्यतमरूपाणामवयवानां गुणे। व्याप्यारोपेण व्यापकारोपस्य तर्कस्य

गुणे। निर्णयस्य गुणे। तत्त्वबुभुत्सोः कथा वादरूपस्य गुणे। विजिगीषुकथा रूपस्य जल्पस्य गुणे। स्वपक्षस्थापनहीनवि

तंडायाः गुणे। अनुमितितत्करणज्ञानान्यतरप्रतिबंधकज्ञानविषयरूपाणां हेत्वाभासानां यथायथं द्व्यादिषु। अभि

प्रायांतरेण प्रयुक्तस्य शब्दस्यार्थांतरं परिकल्प्य दूषणाभिधानरूपस्य छलस्य गुणे। असदुत्तररूपजातेर्गुणे। पराजय

हेतुस्वरूपाणां निग्रहस्थानानां यथायथं द्व्यादिषु तत्र भावः। निग्रहस्थानानि। प्रतिज्ञाहानिः१ प्रतिज्ञांतरं२ प्रतिज्ञाविरो

धः३ प्रतिज्ञासन्यासः४ हेत्वंतरं५ अर्थांतरं६ निरर्थकं७ अविज्ञातार्थं८ अपार्थकं९ अप्राप्तकालं१० न्यूनं११ अधिकं१२ पुनरुक्तं१३

अननुभाषणं१४ अज्ञानं१५ अप्रतिभा१६ विक्षेपः१७ मतानुज्ञा१८ पर्यनुयोज्योपेक्षणं१९ निरनुयोज्यानुयोगः२० अपसिद्धांतः२१

हेत्वाभासाश्च२२ अत्र चकारोनुक्तसमुच्चयार्थस्तेन दृष्टांतसाधनवैकल्यादीनां परिग्रहः। तत्रविशिष्य प्रतिज्ञातस्यै

पक्षादेः परित्यागरूपप्रतिज्ञाहानेर् भावे१ परोक्तदोषोद्दिधीर्षया पूर्वानुक्तविशेषणविशिष्टतया प्रतिज्ञातार्थकथनरूपस्य

प्रतिज्ञांतरस्य गुणे। स्वोक्तसाध्यादिविरुद्धहेत्वादिकथनरूपप्रतिज्ञाविरोधस्य गुणे। स्वोक्तसाध्यादेः परेण दूषणे कृतेन

अमाने ३ साध्यापलापरूपप्रतिज्ञासन्यासस्य गुणे। परोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्ट

कथनरूपहेत्वंतरस्य गुणे। प्रकृतानाकांक्षिताभिधानरूपार्थांतरस्य गुणे। अवाचकपदप्रयोगे निरर्थकस्य गुणे। परिषत्प्र रूपस्य

तिवादिबोधानुकूलोपस्थित्यजनकवाचकवाक्यप्रयोगरूपाविज्ञातार्थस्य गुणे। अभिमतवाक्यार्थबोधानुकूलाकांक्षा

वृथात्प

मु.
१०

आदौ न्यायेतदनुमीमांसायां प्रसंगः क्रियत इति समयबंधः ॥ १

अन्यपदरूपस्यापार्थकस्य गुणे। संम्बंधविषयीभूतकथाक्रमविपरीतक्रमेणाभिधानरूपस्याप्राप्तकालस्य गुणे।
यत्किंचिदवयवमन्यावयवाभिधानरूपस्य न्यूनस्य गुणे। अधिकहेत्वाद्यभिधानरूपस्याधिकस्य गुणे। पुनरभिधान
रूपस्य पुनरुक्तस्य गुणे। परिषदाभिरभिहितस्याप्रत्युच्चारणरूपस्याननुभाषणस्याभावे। परिषदविज्ञातार्थस्य वा
दिभिरभिहितस्यार्थविज्ञानरूपस्याज्ञानस्याभावे। उत्तरार्हं परोक्तं बुध्वापि उत्तरस्याप्रतिपत्तिरूपाया अप्रतिभाया
अभावे। असंभवत्कालांतरकार्यव्यासंगमुद्भाव्य कथाविच्छेदरूपस्य विक्षेपस्याभावे। स्वपक्षे दोषमनुद्धृत्य परपक्षे
दोषाभिधानरूपमतानुज्ञायाः गुणे। निग्रहस्थानं प्राप्तवतो निग्रहस्थानानुद्भावनरूपस्य पर्यनुयोज्योपेक्षणस्याभावे
निग्रहस्थानानवसरे तन्निग्रहस्थानाभिधानरूपस्य निरनुयोज्यानुयोगस्य गुणे। कथायां स्वीकृतसिद्धांतप्रच्यवरूप
स्यापसिद्धांतस्याभावे हेत्वाभासानां सर्वेषां लक्षणानां ज्ञानाद्यादिध्वंसं तत्प्रभवतीति॥ ॥मण्यादिसमवधाने सति वह्निना
दाहो सन्निवारणाय मण्यादेः कारणविघटकत्वरूपा प्रतिबंधकता वाच्या। सा च वह्निनिष्ठदाहानुकूलशक्तिरूपकारण
विघटकतयैव निर्वहतीति। मण्यादिप्रतिबंधकतान्यथानुपपत्त्या सिद्धायाः शक्तेः षड्भावेष्वनंतर्भूतत्वादतिरिक्तत्वमिति।
पदार्थाः सप्तैवेति नियमस्खलनमयुक्तमित्यभिप्रायेण आशंकाकरः शंकते। नन्विति। अतिरिक्तेति। कृप्तपदार्थातिरिक्ते सर्वः।
अतिरिक्तपदार्थतामेव व्यवस्थापयति। तथाहीत्यादिना। मण्यादीत्यादिनामंत्रौषध्यादिपरिग्रहः। समवहिते नेति। समीप
स्थितेन। ननु वह्निरूपकारणाभावादेव न दाह इति न मण्यादेः प्रतिबंधकत्वमतः समवहितेन वह्निनेति। दाहो रूपांतरा

भाष्यस्यार्थश्चमाशंक्य गंगेशोपाध्यायानां संमतिमा
ह। अत एवेति। ८

श्री.
व ६
१०

19

शक्तिः रूपपदार्थान्तरसिद्धौ। मण्याद्यतिरिक्तप्रतिबध्यत्वं खंडयति। तच्छून्येनेति। मणिसमवधानशून्येनेत्यर्थः। ननु
वह्नौ यदि दाहानुकूलशक्तिस्तदा मण्यादिसत्त्वे कुतो न दाहस्तत्राह। तत्रेति। स्वीकृतयुक्त्या शक्तिसिद्धावित्यर्थः।
दाहानुकूलेति। अत्र चानुकूलत्वं कारणतावच्छेदकसाधारणं तेन शक्तेः कारणतावच्छेदकत्वेपि न क्षतिः। नास्य
तद्ध्वंसस्य इति कल्प्यतद्ध्वंसे तत्तेनान्वयः। तथा च वह्निनिष्ठशक्तिस्वावच्छिन्नं प्रतिमणित्वेन नाशकत्वस्वीकारेण
मण्यादिसत्त्वदशायां शक्तेरभावादेव न दाह इति भावः। ननु मण्यादेर्यदि शक्तिनाशकत्वं तदा सत्युत्तेजके विशि-
ष्टमण्यादौ अपसारिते वा दाहानापत्तिरित्यत आह। उत्तेजकेनेति। मण्यादिद्व्यपसारणे न चेत्यत्र चकारो वाकारार्थः
न च दाहं प्रति मण्यभावत्वेन हेतुत्वकल्पनान्न मणिसमवधानकाले दाहापत्तिरिति वाच्यं। मण्यभावत्वेन रूपेणास्य
तं प्रति हेतुताकल्पने गौरवात्। विलक्षणशक्तिमत्त्वेन वह्नेः कारणत्वकल्पनस्यैवोचितत्वादित्यभिमानात्। नन्वेवं शक्ति-
सिद्धावपि तस्या अतिरिक्तत्वासिद्धिरिति चेन्न उक्तपदार्थेष्वनंतर्भूतत्वात्। तथा हि। न तावत् द्रव्यात्मिका शक्तिः
गुणादिवृत्तित्वात्। अत एव न गुणात्मिका कर्मात्मिका वा। न च सामान्याद्यन्यतमरूपा उत्पत्तिमत्त्वे सति विनाशित्वा-
दिति। एवमतिरिक्तां शक्तिं प्रसाध्याधुना सादृश्यस्यातिरिक्तपदार्थतां व्यवस्थापयति। एवमित्यादिना। अतिरिक्तमि-
ति। क्लृप्तसप्तपदार्थातिरिक्तमित्यर्थः। षड्भावानंतर्भूतत्वे सति अभावानंतर्भूतत्वादिति हेतुः पूरणीयः। तत्र सप्तत्वासिद्धिं नि

सु.
११

निरुं ८

दर्प(?)णाप्रभा
करेण ८)

रस्यति। तद्धीति। तत्र सादृश्यं। हितेति। सामान्येपीति। सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादि[illegible]मत्सर्थः। ते
न सामान्यत्वेन व्यभिचारः। व्यतिरेकित्वे सतीति विशेषणान्न प्रमेयत्वादौ व्यभिचारः। भावत्वे च द्रव्यादिषु द्र
व्यत्वमन्नरूपे हेतुमति साध्यस्य सत्वान्न व्यभिचार इति। तथेति। यदि सादृश्यं द्रव्यादावंतर्भूतं तदा द्रव्यादेः सा
मान्यावृत्तित्वेन यथा गोत्वं तथा श्वत्वमित्यबाधित प्रतीतिर्न स्यादित्यर्थः। अभावेंतर्भावमात्रस्य निरस्तत्वे
नापीति। यद्यप्यतिरिक्ताभावमनंगीकुर्वतः प्राभाकरस्य मतेऽभावेंतर्भावचिंतानसंभवति तथापि परमतम
भ्युपेत्येदं निराकृतमिति भावः। सत्वेनेति। भावत्वेन प्रतीयमानत्वात्। मणिसमवधानकालीनवह्निना दाहवार
णाय प्राभाकरेण साधितां शक्तिं दूषयति। मण्याद्यभावेति। अतिरिक्तशक्तिकल्पनां सर्वोक्तनाव्यनाशकभावकल्प
नो चापेक्ष्य लाघवाद्दाहत्वावच्छिन्नं प्रति मण्यभावत्वादिनैव हेतुताकल्पनमुचितमिति भावः। दाहादिकमित्यादिपदे
न वह्निसंग्रहः। मणिसत्वेपि रक्षणानुपपत्तेः। तथा च मणिरूपे सद्भावान्न दाहवह्नी इति भावः। ननु यदा कदाचिन्मण्य
भावविशिष्टवह्नेः दाहापत्तिः। कारणतावच्छेदकावच्छिन्न कारणसत्वस्यैव कार्योत्पत्तिनियामकत्वात्। मण्यभाव
विशिष्टवह्नित्वं वह्निविशिष्टमण्यभावत्वं वा कारणतावच्छेदकमित्यत्र विशेषणविशेष्यभावे विनिगमनाविर
हेण गुरुभूतकार्यकारणभावद्वयापत्तिश्चेत्यत आह। मण्याद्यभावादेरिति। तथा च प्रतिबंधकत्वं न कार्यानुकूल

१०

प्रमीयमान
त्वात् ८

प्रतिबंधक ४
११

21

धर्मविघटकत्वं। बाधज्ञानस्यानुमितिप्रतिबंधकत्वाभावापत्तेः। किंतु कारणीभूताभावप्रतियोगित्वं। तच्च मण्यभाव
स्य हेतुत्वे एवोपपद्यते। न त्वतिरिक्तशक्तिसत्त्वे इति भावः। ननु प्रतिबंधकस्य हेतुत्वे कारणीभूतवह्निरूपाभावप्रति
योगि वह्न्यभावेऽतिव्याप्तिः। स्वप्रागभावप्रतियोगिनि घटादौ चेति चेन्न। तादात्म्यातिरिक्तसंबंधावच्छिन्नाया का
रणता तदाश्रयीभूतायाऽभावभिन्नोऽयं ताभावस्तत्प्रतियोगित्वस्य विवक्षितत्वात्। कारणताविशेषोपादान
स्यायं ता भाग प्रत्यक्षे स्वस्य प्रतिबंधकत्वापत्तिः परास्ता। विषयस्य तादात्म्यसंबंधेनैव प्रत्यक्षे हेतुत्वात्। ननु
वह्निमण्यभावयोर्द्वयोर्हेतुतापेक्षयाऽतिरिक्तशक्तेरेकस्यैव हेतुता युक्ता लाघवादित्यत आह। अनेनैवेति।
दाहादिकं प्रति मण्यभावादेर्हेतुत्वकल्पनेनैवेत्यर्थः। सामंजस्ये। मणिसमवधानदशायां दाहवारणे प्राग
भावेऽभावमानाभावादाह। ध्वंसेति। इदमुपलक्षणं। प्रतियोगिध्वंसयोः शक्तिनाशमण्योः सत्त्वे शक्तिमण्यपसार
णयोः कार्ये कारणभावकल्पनापि स्यादित्यपि बोध्यं। उत्तेजकाभावेति। तथा च केवलं मणिर्न प्रतिबंधकः
किंतु उत्तेजकाभावविशिष्टस्तदभावश्चोत्तेजकसमवधानकालेऽपि तिष्ठतीति न व्यभिचार इति भावः। अथ मण्या
दिस्वरूपस्य दाहं प्रत्युत्तेजकस्यैव हेतुतास्त्विति चेन्न। तस्याऽननुगतत्वात्तावदभावकूटविशिष्टमण्यभावस्याननुग
तत्वात्। अत्रेदं बोध्यं। अभावीयविशेषणतासंबंधेन दाहत्वावच्छिन्नं प्रति उद्देश्यतादैशिकविशेषणतान्यतरसंबं
धावच्छिन्नप्रतियोगिताकानां तत्तदुत्तेजकाभावानां सामानाधिकरण्यरूपं यद्वैशिष्ट्यं तदवच्छिन्नस्य मण्यादेर्दैशिकवि

= व्याप्तिग्रहप्रतिबंधकव्यभिचारशंकाविपक्षपदेनोच्यते = ५

६०

मु
१२

शेषणतासंबंधावच्छिन्नप्रतियोगिताकाभावस्याभावीयविशेषणतासंबंधेनहेतुत्वमिति।तेनसंयोगसंबंधावच्छिन्नप्र
तियोगिताकमण्यभावस्यतत्संयुक्तेपिसत्वान्नदोषापत्तिः।नन्वनुमानमेवशंकाप्रमाणं।तथाहि।वह्निःदाहानुकूला
दृष्टातीन्द्रियधर्मसमवायी।दाहजनकत्वाद्दासवदिति।वह्निघणुकेकत्वमादायभर्जनकपालस्थवह्निनिष्ठानुद्भूत
रूपमादायवासिद्धसाधनवारणायसाध्येदाहानुकूलेति।वह्निघणुकेधनसंयोगमादायादृष्टवदात्मसंयोगमा
दायवातद्वारणायादृष्टेति।वह्निनिष्ठस्पर्शमादायतद्वारणायातीन्द्रियेतीति चेन्न।विपक्षेबाधकतर्कविरहेणास्या
नुमानस्याप्रयोजकत्वात्।केचित्तु।वह्निंप्रतितृणफूत्कारसंयोगादीनांतृणफूत्कारसंयोगत्वादिरूपेणकारणता
याव्यभिचारेणासंभवाद्दतिरिक्तशक्तिसिद्धिः।नचतृणफूत्कारयोररणिनिर्मथनयोर्मणितरणिकिरणयोश्च
संबंधस्यजन्यतावच्छेदकंवह्नित्वंतिवैजात्यत्रयंकल्प्यमितिनव्यभिचारइतिवाच्यं।तज्जन्यतावच्छेदकवैजात्यत्रयक
ल्पनामपेक्ष्यतत्तत्संबंधानामेकशक्तिमत्वेनकारणत्वकल्पनायाएवलघुत्वेनन्याय्यत्वादित्याहुस्तन्न।तत्तत्संबंध
साधारणैकजातेरेवानुपगमात्।नचयोग्यव्यक्तिजातेर्योग्यत्वापत्तिरितिवाच्यं।दोषविशेषणशक्तेरिवायोग्यत्वक
ल्पनात्।नचनोदनात्वादिनासंकरः।तस्यादोषत्वात्।अन्यतमत्वेनकारणतासंभवाच्च।नचान्यतमत्वघटकभेदानां
मिथोविशेषणविशेष्यभावेविनिगमनाविरहेणकारणतावच्छेदकभेदःकारणताबाहुल्यमितिवाच्यं।कारणतावच्छेद
कानांसमनियतानांभेदानामैक्येनकारणतावच्छेदकैक्यसंभवात्।नचभेदानांस्वरूपतोवच्छेदकत्वासंभवेनतृणफू
त्कारसंयोगभेदविशिष्टारणिनिर्मथनसंबंधभेदविशिष्टमणितरणिकिरणसंबंधभेदावच्छिन्नप्रतियोगिताकभेदत्वा

१२

दिनाऽवच्छेदकत्वं वक्तव्यं। तथा चावच्छेदकतावच्छेदकभेदादवच्छेदकताभेदस्तद्भेदे च कारणताभेद इति वाच्यं। स्वरूप
संबंधरूपतया अतिरिक्ततया वा कारणताया अवच्छेदकभेदे भेदप्रसंगादेः संन्यस्य विस्तरः। परे तु तृणादिसंबंधकालीनवायु
संयोगादीनामेकशक्तिमत्त्वेन हेतुतामादाय विनिगमनाविरहान्न शक्तिसिद्धिमाहुः। यदा त्वोक्तं सादृश्यमथाति
रिक्तः पदार्थ इति तदपि निराकरोति। सादृश्यमपीति। तद्भिन्नत्वे सतीति। इदं च सादृश्यनिरूपके इति व्याप्तिवारणाय।
अनुयोगितासंबंधेन विवक्षणे तु मदेयमेव। तद्गतभूयोधर्मवत्त्वमिति। तत्रासाधारणेन विद्यमाना ये भूयांसो
धर्मास्तद्वत्त्वमित्यर्थः। नन्विदं गगनं गगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिवेत्यादावव्या
प्तमिति चेन्न। तद्गति धर्ममात्रस्य तत्राविवक्षितत्वात् धुगभेदविवक्षया भेदसत्त्वाद्वा। अत एव युगभेदविवक्षाया
मिहोपमालंकारोऽन्यदानन्वयालंकार इत्युक्तमालंकारिकैः। सादृश्यघटकधर्मश्च क्वचिज्जातिरूपो यथा घटस
दृशः पट इत्यादौ। क्वचिदुपाधिरूपो यथा गोत्वं तथाश्वत्वमपीत्यादौ। यथा वा चंद्रसदृशं मुखमित्यादावाह्लाद
कत्वादि अतिरिक्तत्वेन गौरवादिति। नव्यास्तु। सादृश्यमतिरिक्तमेव। न चातिरिक्तत्वे पदार्थविभागव्याघा
त इति वाच्यं। तस्य साक्षात्परंपरया वा तत्त्वज्ञानोपयोगिपदार्थमात्रनिरूपणपरत्वात्। एवमधिकरणत्वमपि
तस्य संयोगादिस्वरूपत्वे बदरकुंडसंयोगस्य द्विष्ठत्वेन कुंडे बदरमितिवद्बदरे कुंडमित्यपि प्रयोगः स्यात्।

रविभागस्य

पु
१३
न३

एवंप्रतियोगित्वमपीत्याहुः। सादृश्यलक्षणंलक्ष्ये योजयति। यथेति। स्त्रियां क्तिन्निति सूत्रविहित क्तिन्प्रत्य-
यांत क्षितिशब्दस्य क्षयवाचकत्वात् क्षितिपदस्य प्रकृतोपयोगिनमर्थमाह। क्षितिः पृथिवी। अपशब्दस्य अ-
प्त्वृन्तृजसादि पाणिनीयसूत्रे शब्दपरत्वादाह। आपो जलानीति। प्रतापस्यापि तेजःशब्दवाच्यत्वात् प्रकृते तेजः
पदार्थं दर्शयन्ति वह्निरिति। वह्न्यादिरित्यर्थः। देवविशेषस्यापि मरुच्छब्दवाच्यत्वात् प्रकृतोपयोगिनमर्थमाह। मरुद्वा-
युरिति। व्योमशब्दस्य वेदे ब्रह्मणि प्रयोगादाह। व्योम आकाश इति। अंतकस्यापि कालशब्दवाच्यत्वात् प्रकृतो-
पयोगिनमर्थमाह। कालः समय इति। देहविशिष्टार्थकेऽनंतदेहिशब्दाद्देहावयवानामुपस्थितेराह। देही
आत्मेति। अथेश्वरस्य देहे नामधेयेऽनंतभोगा कथं द्रव्यत्वमिति चेन्न। रुद्राः। भूतावेशान्यायेनेश्व-
रस्य शरीरमिच्छंति। संसारे दृष्टशरीरमित्यन्ये। इतरथा स्वरसादात्मेति। पृथिव्यप्तेजोवाय्वात्मा-
न इति पंचैव द्रव्याणि। व्योमादेरीश्वरात्मन्येवांतर्भावात्। मनसश्चात्मसमवेतत्वे तेंऽतर्भावादिति नवी-
ना आहुः तन्मतं निराकर्तुं संख्याबोधकपदस्मरणे नार्थमाह। एतानि नवैवेति। व्योम्नस्तावच्छब्दाश्रय-
तया सिद्धिः। न च भगवत एव शब्दाश्रयत्वं। प्रत्येकं जीवमादाय विनिगमनाविरहात्। न च जीवानामाश्र-
यत्वे शब्दवानहमिति प्रत्यक्षापत्तिः। अदृष्टवद्योग्यत्वस्यैव कल्पनात्। कालदिशोस्तु एतस्मिन् काले
पटः एवं स्यादिति घटइत्याद्यनुगताकारप्रत्ययात्। मनसश्चात्मसमवेतत्वे तत्ते पार्थिवादि त्रसरेणुना

१२
१३

25

दायविनिगमनाविरहस्याशयः। अधिकमग्रे व्यक्तीभविष्यति। सकलेद्रव्याणीति। द्रव्यपदं द्रव्यत्वरूपजातिवि
शेषार्थकं। ननु गुणत्वाश्रयविशेषार्थकं गौरवात्। मुक्तावल्यां क्षिप्यमाणमिति किं शब्दः प्रश्ने। ननु द्रव्यं द्र
व्यमित्यनुगतप्रतीतिरेव जातिसाधिका भविष्यतीत्यत आह। नहीति। तत्र द्रव्यत्वजातौ। घृतेति। तथा
च घृतादिषु पामराणां द्रव्यत्वज्ञानाभावेन सकलद्रव्यसाधारणद्रव्यत्वजातिसिद्धिर्न भवतीति भा
वः। कार्येति। कार्यत्वं प्रागभावप्रतियोगित्वं। न च ध्वंससाधारण्यं सत्वेन विशेषणीयत्वात्। अत्र च
कार्यस्य समवायः प्रत्यासत्तिः। कारणस्य तादात्म्यं। यत्र समवायेन कार्यं तत्र तादात्म्येन द्रव्यमिति निय
मात्। ननु जन्यसत्वरूपकार्यत्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणत्वे मानाभावः। न च नीले नीलो
त्पत्तिवारणाय तत्प्राहेतुत्वमावश्यकमिति वाच्यं। समवायेन नीलं प्रति स्वाश्रयसमवेतद्रव्यत्वसंबं
धेन नीलं हेतुतया तत्कारणात्। कार्यत्वस्य कार्यतावच्छेदकत्वे गौरवात्। कालिकसंबंधेन घटत्वादेस्समारा
यविनिगमनाविरहश्चेत्यत आह। संयोगस्येति। अत्र च रूपादिगुणानां सकलद्रव्यसाधारण्याभावे
न द्रव्यकार्यतया परित्यागः। सकलद्रव्यवृत्तिसंख्यादित्रयस्य च। गगनादिवृत्तिसंख्यादित्रयस्य नित्यत्वा
त्। न च संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वे मानाभावः। तत्तद्व्यक्तिसमवेतसत्तामात्रं
प्रति तत्तद्व्यक्तित्वेन समवायिकारणत्वस्यावश्यकतया गुणादौ तदुत्पादासंभव इति वाच्यं। कार्यमात्रप्र

=अर्थांतरं=२ कपाले ४

निजाते: कार्यतावच्छेदकत्वनियमेनतादृशकारणत्वस्यावश्यकत्वात्। नित्यसंयोगांगीकर्तृमतसाधार
ण्येनाह। विभागस्यचेति। द्रव्यत्वसिद्धः। जातिरूपद्रव्यत्वसिद्धः। क्वचित्तथैवपाठः। अत्रयद्यपिगुण
वत्वेनान्यथासिद्धिः संभवतितथापिसाक्षात्संबद्धधर्मबाधेसत्येवानुमितेःपरंपरासंबंधविषयत्वमि
तिभावः। इदमुपलक्षणं। द्रव्यवतिद्रव्यांतरानुत्पत्त्यासमवायेनद्रव्यस्यप्रतिबंधकत्वेकल्पनीयमितिप्रति
बंधकतावच्छेदकतयाद्रव्यत्वसिद्धिः। प्रतिबध्यतावच्छेदकंच पृथिव्यादिचतुष्टयमात्रवृत्तिभूतत्वमेवनि
रुव्यापकत्वान्। भूतत्वस्यप्रतिबंधतावच्छेदकत्वेतुमूर्तत्वस्यतथात्वमादायविनिगमनाविरहापत्तिः
द्रव्यत्वस्यप्रतिबंधतावच्छेदकत्वंतुधर्मिग्राहकमानसिद्धं। नचतस्यगगनादिवृत्तित्वेमानाभावइतिवाच्यं
भूतत्वेनतुल्यवृत्तिकव्यापकस्यविनिगमनाविरहेणगगनादिपंचवृत्तित्वाभ्युपगमात्। नचभूतत्वेनतु
ल्यव्यक्तिवृत्तित्ववारणायमनोवृत्तित्वमेवद्रव्यत्वेकल्प्यतांगगनादिवृत्तित्वकल्पनेगौरवात्। गगनादिवृ
त्तित्वकल्पनेपिमूर्तत्वेनसांकर्यवारणायमनोवृत्तित्वावश्यकत्वादितिवाच्यं। तथासतिमूर्तत्वजात्या
द्रव्यत्वस्यतुल्यव्यक्तिवृत्तित्वापत्तेरिति॥ ॥ननुदशमद्रव्यस्यतमसःसत्वान्नवद्रव्याणीत्ययुक्तमित्यभि
प्रायेणमीमांसकः शंकते। नन्विति। ननुतमसिमानाभावादेवनायुक्तमित्याशंक्यतमःसाधकप्रत्यक्षप्र
माणमाह। तद्धीति। तमोहीत्यर्थः। प्रत्यक्षेण। चक्षुरिंद्रियेण। ननुतमसःसिद्धावपितस्यद्रव्यत्वेकिंमानमित्या

गु०

१४

क

भतिः६

२

द्रव्यत्वस्य

१८

27

प्रतियोगिवैयधिकरण्याभावात् नचैवं स्वरूपासिद्धिः अधिकरणभेदेनाभावभेदाभ्युपगंतृमते तमसि तस्य प्रतियोगिव्यधिकरणत्वात् एवं च पृथिवीवृत्तेः संयोगेन गंधाभावस्य निरूक्तप्रतियोगिव्यधिकरणतया व्य ... त्यादि २ भिचारः तत्कारणाय समवायसंबंधावच्छिन्न प्रतियोगिताकत्वं अभावविशेषणं = ७ उत्तरत्र

रात्यानुमानप्रमाणमाह। तस्येति। तमस इत्यर्थः। चक्षुरादेर्द्रव्यत्वमित्यनेनान्वेति। तथा च तमो द्रव्यं। रूपवत्त्वा
दित्यनुमानेन तमसो द्रव्यत्वे प्रमाणं सूचितं। इदमुपलक्षणं। परत्वापरत्वाश्रयत्वस्यापि बोध्यं। इदं तमः पर
मिदमपरमिति प्रतीतेः। ननु तमसि रूपे मानाभावः। न च नीलं तम इति प्रतीत्या तत्सिद्धिरिति वाच्यं। प्रती
तेर्भ्रांतत्वादतो हेत्वंतरमाह। कर्मवत्त्वादिति। कर्मवत्त्वं च समवायसंबंधेन विवक्षितं। तेन जन्यमात्रस्य कालि
कसंबंधेन कर्मवत्त्वेपि न व्यभिचारः। न च स्वरूपासिद्धिः। चलति छायेति प्रतीत्या कर्मवत्त्वसिद्धेः। तमसः
कृप्तद्रव्येष्वंतर्भावं निराकुरुते। तद्धीत्यादिना। गंधेति। गंधाभावस्य हेतुत्वोक्तौ पटगतगंधप्रतियोगि ताभा
वमादाय घटे व्यभिचारोऽतः शून्यत्वमुक्तं हेतुश्च प्रतियोगिव्यधिकरणः। समवायसंबंधावच्छिन्नप्रति
योगिताकश्च बोध्यः। तेन नोक्तकाली नसंयोगसंबंधावच्छिन्नगंधाभाववति वा घटे व्यभिचारः। नीलरू
पेति। अनुवृत्तेनैव नीलरूपेण हेतुना जलाद्यष्टभेदसिद्धेः। स्नेहाभावभास्वररूपाभावादीनामननुगतानां नहे
तुतयोपन्यासः। जलादिकमित्यादिना तेजःप्रभृतिद्रव्यसंग्रहः। तथा च नवसु द्रव्येष्वंतर्भावासंभवेन प
रिशेषेण तमसोऽधिकद्रव्यत्वसिद्धिरिति भावः। तदुक्तं। तमः खलु चलं नीलं परापरविभागवत्। प्रसिद्धधर्म

= प्रतियोगिवैयधिकरणं च न प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणवृत्तित्वविशिष्टत्वं पृथिवीपरमाणौ कालिकसंबंधावच्छिन्नप्रतियोगि
गंधाभावमादाय व्यभिचारात् अपितु प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिसमानाधिकरणयत्किंचिन्नत्वं एवं च पृथिवीगंधाभा
व्यभिचारः। तस्य कालिकप्रतियोगिसमानाधिकरणत्वात् तथा च उत्पत्तिकालावच्छेदेन गंधाभावस्य पृथिवीवृत्तित्वेपि न व्यभिचारः तत्

Margin (left): पि ४ / ग ३

Margin (right): गंधाद्विरूपसाधारणधर्माभावात् = ॥ ७

= सुवर्णवारणायानभिभूतेति। चक्षुर्वारणायउद्भूतेति। परमाणुवारणाय महत्त्वेति। त्रसरेणुवारणायप्रकृष्टेति = ५

मु॰ १५

वैधर्म्यान्तर्वायोर्मेतुमर्हतीति। ननु तमसो द्रव्यत्वे आलोकनिरपेक्षेण चक्षुरिंद्रियेण ग्रहो न स्यात्। द्रव्यग्रहे त्वालोक
सापेक्षचक्षुरिंद्रियस्य हेतुत्वादित्यत आह। तमःप्रत्यक्षे चेति। तमः प्रत्यक्षे चेत्यर्थः। तमोभिन्नद्रव्यचाक्षुषत्वावच्छिन्ने
प्रत्येव संयोगसंबंधेनालोकत्वेन कारणत्वावधारणादिति भावः। आवश्यकतेजोभावेनेति। प्रकृष्टमहत्त्वउद्भू
तानभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावेनेत्यर्थः। अंधकारे तादृशतेजः किं न स्यादिति तु न सम्यक्। उद्भूत
र्भास्वरत्वं धृतेरनुपपत्तेरिति सूचनायावश्यकपदं। उपपत्तौ। तमोव्यवहारोपपत्तौ। ननु तमसस्तेजोभावरू

रू.प.५

पत्वे रूपवत्ताप्रतीतिः कथं अभावे रूपाभावादित्यत आह। रूपवत्तेति। ननु रूपवत्त्वप्रतीतेर्भ्रांतत्वेपि चलतीतिप्र
यस्मिन् कर्मवत्त्वहेतुना तमसि द्रव्यत्वं सेत्स्यतीत्यत आह। कर्मवत्ताप्रतीतिरपीति। नहि द्रव्येऽन्योपाधिकी
कर्मप्रतीतिरिति भावः। ननु प्रतीतेर्भ्रांतत्वं तत्र स्वीक्रियते यत्रोत्तरकाले बाधज्ञानं। प्रकृते च तमो न चलतीत्युत्तरका
ले बाधज्ञानाभावात् कथं प्रतीतेर्भ्रांतत्वमित्यतो दूषणांतरमाह। तमइति। अनयवारीत्यादिना उत्पत्तिध्वंसपरिग्रहः।
यत्यारोपितं नीलं रूपं तमइति कंदलीकारमतं तन्न। इह अंधकार इति प्रतीतेरपि भ्रमत्वापत्तेः। तमो नीलं ननु नीलि
मेति प्रत्ययात्। ननु तमसोऽनतिरिक्तत्वेपि सुवर्णस्यातिरिक्तद्रव्यस्य सत्त्वान्नवत्वव्याघातस्तदवस्थ एवेत्यत आह।

१५

सुवर्णस्येति। वक्ष्यमाणइति तेजोनिरूपणावसर इति शेषः। कंठतइति। रूपरसगंधस्पर्शाः संख्याः परिमाणानि पृथ

ॐ संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखेच्छाद्वेषो प्रयत्नाश्च गुणा इति विभागस्तत्र सप्तदश कंठोक्ताः ।
चशब्देन । रसत्र रूप च शब्देन गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः सप्त समुच्चिताः । ते च सर्वे एकत्वया
चतुर्विंशति गुणा इत्यवहृताः । ननु चतुर्विंशतौ किं नाम गुणत्वं । न च जातिविशेषः । तत्र प्रमाणाभावादित्य
त आह । तत्रेति । तेषु गुणेष्वित्यर्थः । अग्रे गुणनिरूपणावसरे । वक्ष्यते इति । द्रव्यकर्मभिन्ने सामान्यवति या कार
णता सा किंचिद्धर्मावच्छेद्या कारणतात्वात् इत्यनुमानं गुणत्वजातौ प्रमाणमिति भावः । एतत्तत्त्वं तत्रैव स्फु
टी भविष्यति । प्रत्यक्षसिद्धेति । चलनाकारानुगतप्रत्ययवेद्येत्यर्थः । अधिकृतयेति । कर्मविभाजकोपाधिभिर्भ्र
मणत्वादिभिः । भ्रमणगमनादेवेति । अथैवमुत्क्षेपणादीनामपि गमनादेव लाभे उत्क्षेपणत्वादिभिरपि विभागो
नुचितः । नहि उत्क्षेपणादौ गमनत्वं नानुभाविकं । ऊर्ध्वमधश्च प्रक्षिप्तो लोष्टादिरूर्ध्वं गच्छत्यधो गच्छतीति
प्रत्ययादिति चेन्न । स्वतंत्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वादिति । तल्लक्षणं त्विति । लक्षणप्रयोजनं त्वि
तरभेदस्य व्यवहारस्य वा सिद्धिः । सामान्यमितरेभ्यो भिद्यते सामान्यमिति व्यवहारविषयो वा नित्यत्वे सत्यने
कसमवेतत्वात् । यन्नैवं तन्नैवं । यथा द्रव्यमिति । एवं लक्षणांतरेष्वपि ह्यं ।। समवेतत्वघटकसमवायफलमाह । नि
त्यत्वे सत्यनेकवृत्तित्वमिति । न चैवं नित्यसंयोगे ऽतिव्याप्तिरिति वाच्यं । तस्य निरस्तत्वात् । कुतो निरास इति चेन्न ।

द्रव्यादिषो ३

अन्यत्र

सु १६

द्रव्यानिरूपितसंयोगनिष्ठकार्यतावच्छेदककोटौ निवेशगौरवात्। नियतसंयोगांगीकर्तृनये संयोगत्वस्य नियतवृत्ति
त्वेन कार्यतावच्छेदकत्वानुपपत्तेः तथा नियतविभागसिद्ध्यापत्तेश्च। नन्वाकाशत्वरूपजातौ व्याप्तिस्तस्यानेक
समवेतत्वाभावात् इत्याशंक्य लक्ष्यत्वेनोत्तरमाह। एकमात्रेति। व्यक्त्यभेदरूपबाधकसत्वादिति शेषः।
अनुगतधियो जातिकल्पिकाया अभावादिति भावः। ननु व्यक्त्यभेदस्य जातिबाधकत्वमेवासिद्धं। निःसा
मान्यत्वे सति विशेषान्यत्वे सति समवेतत्वस्य जातिलक्षणत्वादित्यतः संमतिमाह। तथा चोक्तमिति। [illegible]कि
रणावल्यामुदयनाचार्यैरिति शेषः। बहुत्वसंख्यकधर्मस्यैव सामान्यतया सर्वसिद्धत्वादेकव्यक्तौ जातिर्नेत्युप
यतिभावः। व्यक्तेरभेदः एकव्यक्तिकत्वमाकाशादिजातित्वबाधकं। तुल्यत्वं। तुल्यव्यक्तिवृत्तित्वं। घटत्वक
लशत्वादीनां जातिभेदे। वस्तुतः तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं स्वभिन्नजातिसमनियतत्वमिति यावत्। तच्च जाति
त्वबाधकमेवेति बोध्यं। संकरश्च परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः। भूतत्वादे
र्जातित्वे भूतत्वं विहाय मनसि वर्तमानस्य मूर्तत्वस्य मूर्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य च पृथिव्यादि
चतुष्टये सत्त्वात्। ननु सांकर्यस्य जातिबाधकत्वे किं मानमिति चेत्स्वसामानाधिकरण्यस्वाभावसामा
नाधिकरण्योभयसंबंधेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगित्वाभाववत्त्वम
स्य भंगप्रसंग एवेति। एतादृशनियमे मानाभावान्न सांकर्यं जातिबाधकमिति तु नव्याः। अनवस्था तु जातेर्जाति

(सा)
नो६

सामान
चत्वा
घटत्वंताव
किरनिकल
शत्वंइतिताम्
यीर्थः=१

१६

31

मत्वे। यद्यपि निखिलजातिबाधकवैजात्यांगीकारेऽपि तद्वैजात्येन वैजात्यांतरमेकव्यक्तिकत्वात् तथापि निखिलजा
तिबाधकं वैजात्यं तद्वैजात्यसतदाश्रयजातिषु पुनर्वैजात्यमेवमन्येऽपीत्यनवस्था बोध्या। रूपहानिः। निःसामान्यं ग प्र२
र्भलक्षणव्याघातरूपा विशेषस्य जातिमत्त्वे। रूपस्य स्वतो व्यावर्त्तकत्वस्य हानिः। तत्र जातिस्वीकारे तयैव व्या
वर्त्तकत्वं वाच्यं। सामान्याश्रयस्य सामान्यरूपेणैव भेदसाधकत्वनियमात्। नच सामान्यरूपेण विशेषाणां
भेदकत्वं संभवति। व्यभिचारात्। तादृशनियमानंगीकारे परमाणुगतैकत्वानां तत्तद्व्यक्तित्वेनैव परमाण्वंतर दी५
भेदसाधकत्वसंभवेन विशेषस्य वैयर्थ्यप्रसंगादिति तु ज्यायः। असंबंधः। प्रतियोगितानुयोगितान्य
तरसंबंधेन समवायाभावः। समवायाभावयोर्जातिमत्त्वे। तदपेक्षयाचेति। सत्तापेक्षयाचेत्यर्थः। सत्ता
जातिश्च द्रव्यं सत् गुणः सन्नित्याद्यनुगतप्रतीत्यैव सिद्ध्यति। अत्र नव्याः। सन्निति प्रतीतिविषयो भावत्वमे
व। अतएव सामान्यादिष्वपि सदिति व्यवहारः। न त्वतिरिक्ता द्रव्यादित्रिकवृत्तिनी सत्ताख्या जातिरिति तेन
परमपरं द्विविधं सामान्यं परं सत्तेति वैशेषिकविभागो निर्युक्तिकत्वादनादेय इत्याहुः। तन्न सत्। ध्वंसकार
णतावच्छेदकतया सत्ताजातिसिद्धेः। यत्र प्रतियोगितासंबंधेन ध्वंसोऽस्ति तत्र तादात्म्यसंबंधेन सदिति सामानाधि
करण्यप्रत्यासत्त्या कार्यकारणभावात्। नच प्रागभावे व्यभिचारः प्रागभावे सत्ताविरहादिति वाच्यं प्रागभाववृत्ति
प्रतियोगिताभिन्नप्रतियोगितायाः कार्यतावच्छेदकसंबंधत्वादिति। यत्सत्तत्। ध्वंसावच्छिन्नं प्रति तादात्म्येन द्रव्य घटादि

= स्वेतरद्व्यावर्तकत्वेन = ७

कपालादेरिति पूरणीयं १

मु.
१७

त्वेनकारणतायाअन्यतावच्छेदकतयासत्ताजातिसिद्धिः। तादृशकार्यकारणभावेमानाभावइतितु न। स्वाश्र
यसमवेतत्वसंबंधेननीलादिनः आदावपिसत्त्वात्तत्रनीलापत्तिवारणायतादृशकार्यकारणभावस्यावश्य
कत्वात्। नन्वेवं स्वाश्रयसमवेतत्वविशिष्टद्रव्यत्वसंबंधेननीलादेर्हेतुतयैवनतदापत्तिरितिवाच्यं। तादृशासम
वेतत्वद्रव्यत्वयोर्विशेषणविशेष्यभावेविनिगमनाविरहेणकारणताबाहुल्यापत्तेः। आलिकसमवायाभयसं
बंधस्यकार्यतावच्छेदकतावच्छेदकत्वात्सत्तायानित्यसाधारण्येपि नैक्षतिर्विरहादित्यन्यत्रविस्तरः। स्वतएवे
ति। स्वतोव्यावृत्तत्वंचस्वभिन्नलिंगजन्यस्वविशेष्यकस्वसजातीयभेदानुमितिविषयत्वं। साआत्यंचपरा
थेविभाजकोपाधिरूपेणतेनघटादेस्तादात्म्येनव्यावृत्तत्वेपिविशेषस्यगुणादिभ्यस्तन्यत्वेनेतरभेदानुमितिवि
षयत्वेपिद्रव्यादेरपिप्रमेयत्वादिनाविशेषजातीयत्वेपिनक्षतिः। नित्यद्रव्यवृत्तिरिति विशेषाणांस्थानकथ
नंनतुलक्षणप्रविष्टं। प्रयोजनाभावात्। नचैवंतत्परमाणुत्वादयोव्यावर्तकाभविष्यन्तिकिंविशेषेणेति
वाच्यं। अव्यावृत्तधर्मस्यव्यावर्तकत्वाभावात्। तत्रव्यावर्तकान्तरापेक्षायामनवस्थानात्। ननुविशेषेप्येवंप्र
संगइतिचेन्न। तस्यधर्मिग्राहकमानेनस्वतोव्यावृत्ततयैवसिद्धेः। एवंचनित्यद्रव्येषुविशेषाःसिद्धास्तद्गुण
स्तुनविशेषवन्तः। आश्रयरूपेणविशेषेणैवतेषांव्यावृत्तत्वात्। आश्रयस्यचविशेषवत्तयाव्यावृत्तत्वेनवि
शेषत्वसंभवादितिभावः। ईश्वराकाशयोःनित्यज्ञानशब्दाभ्यांव्यावृत्तेःसंभवान्नतत्रविशेषइत्याहुः॥

सं६

इतरभेदज्ञानकाः =

ष्वे

१७

तन्नविशेषव्या
...नो ७

= व्यावर्तकत्वसंभवात् = १

स्ता४ = स्वतोव्यावर्तकत्वाभावात् = ४

= स्वतोव्यावृत्तधर्मस्येत्यस्य ४

नचैतास्ति। विशेषे अतिरिक्तमाना भावः। यथैव विशेषाणां व्यावर्त्तिधर्मं विना व्यावृत्तत्वं तथा नित्यद्रव्याणामपी
त्याहुः। घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः। तेषु जातेश्च संबंध इति मूलं। तत्र घटपदं कपालपदं चावयव्यव
यवपर इत्याह। अवयवावयविनोरिति। जातेश्चेति चकारेण नित्यद्रव्येषु विशेषसंबंधः समुच्चीयत इत्याह। नित्य
द्रव्यविशेषयोरिति। समवायस्य लक्षणमाह। नित्यसंबंधत्वमिति। संबंधश्चात्र संबंधिभिन्नो ग्राह्यस्तेन नित्या
भावादिस्वरूपसंबंधे नातिव्याप्तिः। ननु समवायसंबंधत्वे किं प्रमाणमित्याशंक्याह। तत्प्रमाणं त्विति। गुणक्रि
यादीत्यादिना जातिपरिग्रहः। संयोगादीति। द्रव्ययोरेव संयोग इति नियमादिति भावः। अत्र समवायसंबंधे
न पटत्वावच्छिन्नं प्रति तादात्म्यसंबंधेन तंतुत्वेन हेतुत्वात् कार्यतावच्छेदकसंबंधविधया समवायसिद्धिः। न च स
मवायस्थाने स्वरूपसंबंधं निवेश्य कार्यकारणभावः कल्पनीय इति वाच्यं। तथा सति यत्समवेतं कार्यमुत्पद्यते
तत्रासमवायिकारणव्यवस्था न स्यात्। ननु यत्संबद्धं कार्यमुत्पद्यते तत्समवायिकारणमित्येवास्त्विति वाच्यं। क
पालसंबद्धघटध्वंसं प्रति कपालस्य समवायिकारणत्वप्रसंगादित्यपि द्रष्टव्यं। सिद्धसाधनमिति। अयुतसि
द्धयोः स्वरूपसंबंध इति वदतः परस्येति शेषः। अर्थान्तरं चेति। समवायसाधने प्रवृत्तानां नैयायिकानामि
ति शेषः। ननु तथापि समवायस्यैकत्वे किं मानमत आह। लाघवादिति। तथा च यथा क्षित्यादिजनकतयेश्वर
स्य लाघवादेकत्वं सिद्ध्यति। तथा समवायोऽपीत्यर्थः। रूपवत्ताबुद्धीति। रूपवत्ताबुद्धेः प्रमात्वप्रसंग इत्यर्थः। स्पर्श
समवायरूपसमवाययोरैक्यादिति भावः। तत्र। वायौ। रूपाभावादिति। न च रूपसमवायसत्त्वे तेन संबंधेन
तत्र कथं रूपाभावः। संबंधसत्त्वस्य तेन संबंधेन संबंधिसत्त्वव्याप्यत्वादिति वाच्यं। रूपनिरूपितत्वविशिष्टस

मु०
१८

समवायस्येव रूपसंबंधतया वायो तदभावात्। न च विशिष्टस्य अनतिरिक्ततया विशिष्टसमवायोपि वायावस्तीति वाच्यं। रूपनिरूपितत्वविशिष्टसमवायनिरूपिताधिकरणताया स्वरूपसंबंधस्य तत्र स्ववायावभावात्। पृथिव्यां गंधस्य समवायो नजलादावित्यादिप्रतीतेः। समवायस्य नानात्वमिति तु न वाच्यः। संबंधांतरे। अतिरिक्तपदार्थतयेति शेषः। सिध्येदित्यस्य भूतलादाविसादि॥ यदि वैशिष्ट्यमतिरिक्तमुररीक्रियते तदा तान्नित्यमनिसंबंति विकल्प्याद्यं दूषणमाह। तस्येति। ननु वैशिष्ट्यस्य तत्र सत्वेपि घटानयनदशायां तत्र घटाभावादेव न घटाभावबुद्धिरत आह। घटाभावस्येति। तत्र। घटवति भूतले। तस्येति। घटाभावस्येत्यर्थः। अन्यथा घटाभावस्यानित्यत्वे। देशांतरेपि। घटशून्यदेशेपीत्यर्थः। घटत्वावच्छिन्नाभावस्यैकत्वादिति भावः। वैशिष्ट्यस्येति। वैशिष्ट्यस्यानित्यत्वाभ्युपगमपक्ष इत्यादिः। तत्र। घटानयनेन घटवति। न च घटवति न घटाभावबुद्धिर्घटवत्ताज्ञानस्य प्रतिबंधकस्य सत्वादिति वाच्यं। घटवत्ताज्ञानविरहदशायां घटाभावबुद्धेरापाद्यमानत्वात्। अप्रमात्वप्रसंगादित्यत्रतात्पर्यात्। ननु सिद्धांतिनोपि मते पाकेन रक्ते घटे श्याम रूपसमवायस्य सत्वात् श्याममेव रूपवत्ताधीप्रसंगइत्यत आह। ममत्विति। द्वितीये दूषणमाह। वैशिष्ट्यस्येति। ननु वैशिष्ट्यानंगीकारे घटाभावभूतलयोः कः संबंधः स्वरूपमिति चेत्तथा सति घटशून्यतादशायामिव घटवत्तादशायामपि भूतले घटाभावबुद्धिस्त्वन्मतेपि स्यात् घटाभावभूतलयोस्तत्स्वरूपसंबंधस्य तत्र सत्वादत आह। एवं चेति। तत्तत्कालीनमिति। घटाभावे भूतलमिति ज्ञानकालीनमित्यर्थः। तत्तद्भूतलादिकमिति। यत्र भूतले घटाभावबुद्धिस्तद्भूतलादिकमित्यर्थः। तत्तदभावानामिति। यस्य यस्याभावस्य बुद्धिस्तस्येत्यर्थः। तथा च न स्वरूपमात्रं संबंधः किंत्वीदृशस्वरूपविशेष इति न दोष

वन्न३

भावा५

१८

त्यातिप्रसंग इति भावः। नव्यास्तु। वैशिष्ट्यं पदार्थान्तरमेव। भूतलं घटाभाववदिति प्रत्ययात्। स्वरूपसंबंधाभ्युपग
मे च अभावाधिकरणस्य खंडशो भेदतावन्मात्रविषयकज्ञानादिकमादाय विनिगमनाविरहस्याहुः। इत्या
दिपदं भावान्योन्याभाव इति। इह च द्रव्यत्वादिनप्रतियोगितावच्छेदकं। अननुगमात्। किंतु तत्तत्पदं संख्ये
यादिप्रतियोगिताकभेदस्य द्वित्वमिवेति ध्येयं। वस्तुतो भावत्वमेव तथा बोध्यं। अत्र केचित्। भावभिन्नत्वस्या
भावत्वे भावत्वरूपविशेषणज्ञानं विना काले घटो नास्तीति प्रतीत्यनापत्तिः। एवमन्योन्याभावत्वस्याभाव
त्वगर्भत्वे स्यादेवमन्योन्यतयाऽभावत्वस्यान्योन्याभावत्वगर्भत्वेऽन्योन्याश्रयापत्तिः। एवमभावत्वस्य भावभि
न्नत्वरूपत्वेऽभावो न भाव इति वाक्याच्छाब्दबोधानुपपत्तिश्च। उद्देश्यतावच्छेदकविधेययोरैक्यादिति। त
स्मादखंडोपाधिरनुयोगिताविशेषो वा। अभावत्वमिति वदंति। तत्र न्याः। अभावत्वस्याखंडोपाधित्वे
प्रमाणाभावः। किंतु भावभिन्नत्वं। समवायसामानाधिकरण्यान्यतरसंबंधावच्छिन्नप्रतियोगिताकसत्ता
भावरूपं। तच्च पूर्वोनुपस्थितमपि प्रकारः। एवं च घटाभावपटाभावप्रतीतीनामभावांशेऽनुगतत्वमेवो
पपद्यते। न च विषयिता न वस्था सत्ताभावत्वं केः स्वरूपत एव प्रकारत्वोपगमात्। अत एव सत्तारूपप्रतियोगि
ज्ञानं विनापि घटो नास्तीति बुद्धेः सप्रकारः। अभावत्वप्रकारकप्रत्यक्ष एव प्रतियोगिधियो हेतुत्वात्। अन्य

पु॰
१९

धाऽयं तमऽइति प्रतीत्यनापत्तेः। न च सत्ताभावरूपस्याभावत्वस्यानुपपत्तिः तस्य प्रकारत्वे विशेषणधियो हेतु
त्वे व्यभिचार इति वाच्यं। विशेषणभेदेन हेतुताया भिन्नत्वेन तत्र तद्धेतुत्वानुपगमात्। फलानुरोधित्वात्कल्प
नाया इति प्राहुः। संसर्गान्योन्याभावभेदत इति मूलादेकः संसर्गाख्योऽपरोऽन्योन्याभावाख्य इति प्रतीतेः। तच्चा
युक्तं। संसर्गस्याभावत्वानंगीकारादित्यत आह। संसर्गाभावेति। क्रमेण लक्षणद्वयोर्लक्षणमाह। संसर्गाभाव
त्वमिति। अन्योन्याभावेऽतिव्याप्तिवारणायान्योन्याभावभिन्नेति। घटादावतिव्याप्तिवारणायाभावपदं।
एवमग्रेऽपि। तादात्म्येति। तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वं प्रतियोगितायां विवक्षितं। तेन संयोगावच्छिन्नप्र
तियोगिताके संयोग्यत्यंताभावे नातिव्याप्तिः। प्रागभावस्य लक्षणमाह। विनाश्यभावत्वमिति। अत्र ध्वं
सेऽतिव्याप्तिवारणाय विनाशीति। ननु प्रागभावसत्त्वे किं मानमिति चेदत्रोत्पन्नपुनरुत्पादाभियात्सिद्धिरि
ति प्रांचः। केचित्तु। आतो घट इति वदुत्पन्नो घटध्वंस इति प्रत्यक्षबलेन नाशोऽतिरिच्यते। ननु प्रागभावः। इ
हेदानीं घटप्रागभाव इति लोकानां प्रत्ययाभावात्। न च तद्धटोपधायकतत्कपालतत्संयोगादीनां तत्तद्धटोत्पत्ति
कालेऽपि सत्त्वात्पुनरपि तत्तद्धटोत्पत्त्यापत्तिः। प्रागभावांगीकारे च तदभावादेव न पुनस्तदुत्पत्तिरिति वाच्यं। अन्यद्रव्य
त्वावच्छिन्नं प्रति जनकतया क्लृप्तस्य समवायसंबंधावच्छिन्नप्रतियोगिताकद्रव्याभावस्य विरहेणैव तदापत्तेः सं

१९

=प्रागभावस्य प्रतियोगिसमानदेशकत्वमितिनियमात् =६

भवात्। नन्वजन्यद्रव्याभावस्यजन्यद्रव्योत्पत्तिकालीनोत्पत्तिक ध्वंसाभावस्यवा हेतुत्वमित्यत्र विनिगमनावि
रहेण तादृशद्रव्याभावस्य तादृशध्वंसाभावानां च कारणतामपेक्ष्य लाघवादेकएव प्रागभावोहेतुः क
ल्प्यतइति वाच्यं। प्रागभावकल्पनेपि तत्कालोत्पत्तिकानंतपदार्थप्रतियोगिकानामनंतानां प्रागभावानां
विनिगमनाविरहेण हेतुताया दुर्वारत्वात् तथाच प्रागभावरूपधर्मिकल्पनागौरवं परमतिरिच्यतइत्याहुः।
सहस्रतंतु ५ अत्रवदंति। स्वानधिकरणेषुतंतुषु पटोत्पत्तिवारणाय सहस्रतंतुकपटस्थले बहूनां तंतूनां तत्संयोगानां च तत्त्व
त्त्वेन हेतुत्वकल्पनापेक्षयैक प्रागभावस्य हेतुता लघीयसी। अथैवमपि द्वित्रिचतुर्षु तंतुषु सहस्रतंतुकपटोत्प
त्त्यापत्तिः। न च चरमसंयोगव्यक्तेस्तद्व्यक्तित्वेन हेतुत्वान्नापत्तिरिति वाच्यं। तथासति स्वानधिकरणतंतुष्वपि सहस्रतंतुष्वपि
चरमसंयोगाभावादेव पटोत्पत्तिवारणसंभवे प्रागभावकल्पना नोचितास्यादिति चेन्न। चरमसंयोगस्य समवा
वायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुत्वे तंत्वंतरेपि समवायेन पटोत्पत्त्या तत्र समवायेन चरमसं
योगाभावेन व्यभिचारापत्त्या कालिकसंबंधेन तत्पटत्वावच्छिन्नं प्रति चरमोत्पन्नसंयोगव्यक्तेः कालिक
संबंधेन हेतुता वाच्या। तथा च स्वानधिकरणतंतुष्वपि कालिकतया चरमसंयोगसत्त्वात्पटोत्पत्तिवारणाय प्रा
गभावस्य हेतुत्वस्यावश्यकत्वादिति। एवमप्युक्तकल्पनातिरिक्तः पदार्थस्तथापि तस्य सप्रतियोगिकत्वे प्रमा

=सहस्रतंतुष्वपि २

मु॰
२०

णाभाव इति तु तत्त्वं। ध्वंसस्य लक्षणमाह। जन्याभावत्वमिति। प्रागभावेऽतिव्याप्तिवारणाय जन्येति। अत्यंता
भावस्य लक्षणमाह। नित्येति। ध्वंसादिवारणाय नित्यपदं। ननु अत्यंताभावस्य नित्यत्वे घटानयनानंतरमपि भूत
ले घटो नास्तीति प्रतीत्यापत्तिरित्यत आह। यत्रेति। तथा च संबंधाभावादेव घटानयनानंतरं घटात्यंताभा
वबुद्धिर्नेति भावः। कालविशेषविशिष्टस्वरूपस्य संसर्गत्वोपगमादेव घटवति घटो नास्तीति प्रतीत्यभावोप
पत्तौ चतुर्थसंसर्गाभावे मानाभावश्च इत्यस्वरसः केचिदित्यनेन सूचितः। ननु मास्तु घटवत्काले घटात्यंताभाव
बुद्धिः घटोत्पत्तेः प्राक्काले तु स्यादित्याशंक्याह। अत्रेत्यादिना। ननु तर्हि रक्तरूपप्रागभावाधिकरणे श्यामघटे श्या
मरूपध्वंसाधिकरणे च रक्तघटे कथं रक्तो नास्ति श्यामो नास्तीति प्रतीतिः ध्वंसप्रागभावयोरधिकरणेऽत्यंताभा
वस्यासत्त्वादित्यत आह। श्यामघट इति। तत्रेति। ध्वंसप्रागभावयोरित्यर्थः। अत्यंताभावेन सहेति शेषः। तथा च
नव्यमते सर्वपक्षिल्लखितशंकाया मिश्रापत्तिरेवेति भावः। युक्तं चैतत्। कथमन्यथा सर्वमतेऽपि रक्ते मध्ये श्यामे घटे रक्तं
रूपं नास्तीत्याकारप्रत्ययः तस्य सामान्याभावावगाहित्वात्। न चेदृशप्रत्ययो रक्तिमध्वंसाद्यवगाही पूर्वापररक्तिमध्वंस
प्रागभाववति रक्तेऽपि तादृशाकारप्रत्ययप्रसंगादिति। न च रक्तत्वावच्छिन्नप्रतियोगिताकत्वं ध्वंसप्रागभावयो
रप्यापन्नमिति तेनांतरा श्यामे रक्तं नास्तीति प्रत्ययस्तदा ध्वंसप्रागभावयोः सामान्यावच्छिन्नप्रतियोगि   २०

59

=घटाभावे घटो नास्तीत्याकारकअभावाधिकरणकाभावस्य= ७

तावत्त्वस्वीकारात्। ननु पूर्वापरकालिकध्वंसव्यतिरिक्ते तत्र तदानीं तदभ्युपगमादिति वाच्यं। विनिगमनाविरहे
ण पदार्थांतरध्वंसप्रागभावयोरपि तत्स्वीकारप्रसंगेन गौरवात्। तदपेक्षया अनंताभावेस्यांतरास्यामा
दौ संबंधकल्पने लाघवादित्यन्यत्र विस्तरः। ननु अभावस्तु द्वेधा इति विभागो नुपपन्नोऽभावस्य माना
भावादित्यभिप्रायेण प्राभाकरः शंकते। नन्विति। अभावस्याधिकरणासमकत्वे गौरवं प्रदर्शयितुमनंतेत्यु
क्तं अतिरिक्तेति। भावातिरिक्त इत्यर्थः। अभावस्याधिकरणासमकत्वे भेदे आधाराधेयभावानुपपत्तिरू
पो दोषः सोऽस्मन्मते नेत्याह एवं चेति। अधिकरणापेक्षया अतिरिक्तत्वं चेत्यर्थः। ननु अभावाधिकरण
काभावे स्याधिकरणासमकत्वे यथाऽऽधाराधेयभावोपपत्तिस्तथा सर्वत्राप्यस्त्विति तो दूषणांतरमाह।
एवं चेति। अन्यथा अभावस्याधिकरणासमकत्वे। एतेन। वक्ष्यमाणदूषणेन। परस्परधर्मतापन्नानां स
प्त पदार्थानामेव परस्परभेदकत्वं प्रापयितुमाह। इदानीमिति। पदार्थनिरूपणानंतरमित्यर्थः। तदनिरू
पणे तत्संसर्गार्थघटितस्य साधर्म्यस्य निरूपणासंभवादिति भावः। समानो धर्मः सधर्मः तस्य भावः
साधर्म्यं। एवं वैधर्म्यमित्यत्रापीति भ्रमवारणाय बहुव्रीहिमाह। समानो धर्मो येषामिति। केवलान्वयि
त्वादिति। विषयभेदेन विषयताया भेदेपि ज्ञाननिष्ठविषयतात्वेन केवलान्वयित्वमस्त्येवेति भावः। एवमये

मु॰
२१

पि॰ ज्ञेयत्वादीत्यत्रादिपदार्थं दर्शयति। एवमभिधेयत्वेति। अभिधेयत्वमभिधाविषयत्वं। अभिधा च संकेतः। प्रमेय
त्वादिकमित्यादिना अस्तित्वपरिग्रहः। तच्च कालसंबंधित्वं। द्रव्यादीनां पदार्थानां भावेतु सो धेर्यै स्पष्टं। अतस्तदुपेक्ष्य
द्रव्यादिपंचानां साधर्म्यम्त्वेऽप्रपंचितं द्रव्यादय इत्यादिना। अनेकत्वे सति भावत्वमिति। एवंच मूले द्रव्यादय
पंचेत्युद्देश्यपदं। भावा अनेक इति विधेयपदमिति बोध्यं। अत एव भाष्ये पंचानामित्युक्तं न तु पंच भावानामि
अनेकभाववृत्तीत्यादि। अत्र चानेकभाववृत्तित्वं स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसंबंधेनाभा
दविशिष्टत्वे सति भाववृत्तित्वं। तेन गुणादौ संख्यारूपस्यानेकत्वस्याभावेपि न क्षतिः। भावत्वरूपता द्रव्यत्वधर्म
मादाय समवायेऽतिव्याप्तिवारणाय पदार्थविभाजकोपाधीति। उपाधिमत्ता च समवायस्वरूपसंबंधान्यतरसंबं
धेन तेन कालिकसंबंधेन ध्वंसस्य तादृशोपाधिमत्त्वेपि न क्षतिः। समवायेनोपाधिमत्त्वविवक्षणे तु सामान्यादावव्याप्तिः
स्यादतस्तन्नोक्तं। अन्यतरघटकस्वरूपं तु कालिकसंबंधभिन्नं ग्राह्यं तेन न ध्वंसेऽतिव्याप्तिः। अत्र च समवेतसमवेतर
त्तिपदार्थविभाजकोपाधिमत्त्वं द्रव्यादिचतुर्णां साधर्म्यं बोध्यं। उद्देश्यवाचकपदस्य चरममुपादानमयुक्तमतो योजन
या तदर्थं प्रदर्शयति। द्रव्यगुणकर्मणामिति। निर्गुणक्रिय इति मूलं। तदर्थश्च गुणक्रियासंताभाववत्त्वं तेन गुणक्रियान्यो
न्याभावमादाय द्रव्ये नातिव्याप्तिः। यद्यपि गुणेति। न च गुणिगुणिनोर्गमविशेषणे द्रक्षिणगोयत्समानकालीनत्वाल्लक्षे
गुणभेत्यत्वमिति वाच्यं। निर्गुणे गुणोत्पत्तिस्वीकारेण तत्संभवात्। न त्वेवं घटादेराद्यक्षणे वास्तुतानस्यादिति वाच्यं। इष्टापत्तेः। २१

H१

४४ स्वरूपोपाधिमत्त्वाच्चेति व्याप्तिग्रहणायत्तसदिति भावः। आसादीनामप्यर्थसमवायसंबंधेन सामा
क्रियाभिन्नस्य समिति। तथापीति। गुणवत्ता च समवायेन तेन कालिकसंबंधेन गुणवद्गुणवृत्तेर्गुणत्वादेरसंग्रहे ऽपि न
क्षतिः। गुणवद्वृत्तित्वं च समवायस्वस्वरूपान्यतरसंबंधेन तेन समवायेन गुणवद्वृत्तित्वाभिधाने तादृशस्य द्र
व्यत्वप्रकारकप्रमाविशेष्यत्वस्य द्रव्ये सत्त्वादतिव्याप्तिरथ तेनैव तद्वत्त्वं वाच्यं। तदा सामान्यादावव्याप्तिरिति परा
स्तं। पदार्थविभाजकपदस्य कृत्यमाह। आकाशत्वादिकमिति। कर्मैव दरत्वाकाशत्वयोर्व्यावृत्ते। सामान्यानधिकरणत्वमि
ति। तथा च सामान्यनिरूपिताधिकरणता न सामान्यादौ। एकार्थसमवायस्याधिकरणतानियामकत्वाभावादिति भा
वः। अप्रसिद्धत्वात् पारिमांडल्यपदार्थं निर्वक्ति। पारिमांडल्यमिति। तद्भिन्नानां। पारिमांडल्यभिन्नानां। ननु द्व्यणुकप
रिमाणस्यापि कारणत्वाभावान्न जातिव्याप्तिरतः पारिमांडल्यपदं द्व्यणुकपरिमाणस्याप्युपलक्षकं तेन तस्यापि लक्ष्य
त्वमित्यभिप्रेत्याह। अणुपरिमाणमिति। परमाणुद्व्यणुकसाधारणमणुपरिमाणमित्यर्थः। पारिमांडल्यस्य कारणत्वे
बाधकमाह। तद्धीति। अणुपरिमाणं हीत्यर्थः। तच्चेति। चकारस्त्वर्थे। तत्र हेतुमाह। परिमाणस्येति। स्वसमानजातीयेति। सा
जात्यं च परिमाणविभाजकरूपेण बोध्यं। अणुजन्यस्येति। उत्कर्षं चाणोरणुतरमेवेति भावः। न चाणुजन्यस्याणुतरत्व
मस्तु किं बाधकमिति वाच्यं। तथा सति त्रुटेरचाक्षुषत्वप्रसंगात्। ननु तर्हि द्व्यणुकादिपरिमाणस्य किं जनकमिति चेत्सं
ख्यैवेत्यवेहि। व्याख्यास्यते चेदिदमुपरिष्टात्। मूलस्य न्यूनतां परिहरति। एवमिति। बोध्या इत्यनेनान्वयः। नन्वकारणा
नीति बोध्या इत्यर्थः। ऐन्द्रियकयोर्महत्त्वसामान्ययोः स्वविषयकलौकिकप्रत्यक्षहेतुत्वात् परममहत्त्वातीन्द्रियत्वे ह इत्यत्र

न्यवत्त्वासा
मान्यपरिहा
ना इति मूलम
युक्तमतो

गुणेति

मु:
२२

षणे। ननु योगिप्रत्यक्षे पारिमाण्डल्यस्यापि विषयविधया कारणत्वात् पारिमाण्डल्यभिन्नानामित्याद्ययुक्तमत आह। इदमपी
ति। यथा योगजधर्मेणातीतविषयकं प्रत्यक्षं तथाविद्यमानविषयकमपीति भावः। ननु ज्ञायमानसामान्यस्य प्रत्यास
त्तित्वेन ज्ञायमानहेतोश्चानुमितिकरणत्वेन पारिमाण्डल्यस्य सामान्यलक्षणाजन्यज्ञानेनुमितौ च कारणत्वात् पारिमा
ण्डल्यभिन्नानामित्य[illegible] संगतमत आह। ज्ञायमानेति। आत्ममानसेति। विषयतयाऽद्यलौकिकप्रत्यक्षे सम
वायेन महत्त्वस्य हेतुत्वादिति भावः। यद्यपि स्वप्रत्यक्षेतु स्वेन वक्तुमुचितं तथापि रीत्यान्तरमते आत्मैकत्वमहत्त्वयोर
योग्यत्वात् प्रत्यक्षं न संभवतीति आत्ममानसइत्युक्तं। केचित्तु। कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्य इत्थं भाष्ये आग्र
हणात् परममहत्त्वं एव न इति वदतामाचार्याणामात्मपरिमाणमपि न कुत्रचित्कारणमित्याशयो लभ्यते। न च तत्र परम
महत्त्वदात्मपरिमाणातिरिक्तपरममहत्त्वपरिमिति वाच्यं। मानाभावादिति वदन्ति तन्मतं दूषयितुमुपन्यस्यति। तस्या
पाति आत्ममहत्त्वस्यापीत्यर्थः। आचार्याणामुदयनाचार्याणां। ज्ञानातिरिक्तं प्रत्येवेति। कारणत्वं च ज्ञात्वधर्मेतरकार्या
पेक्षयेत्याचार्यग्रंथः। आत्मधर्मो ज्ञानादयः तदतिरिक्तभावकार्यं प्रति कारणत्वं पारिमाण्डल्यादिभिन्नानां साधर्म्यमिति
तदर्थः। एवं च पारिमाण्डल्यादीत्यत्रादिपदेन परममहत्त्वं गृहीतामाचार्याणामयमाशयो यत्पारिमाण्डल्यस्य परममह
त्त्वादीनां च ज्ञानातिरिक्तं प्रति न कारणत्वं न तु कारणत्वसामान्याभाव इत्यनुमतं इति भावः। आचार्यैः पारिमाण्डल्यादीत्यादि
पदार्थेषु सुखदुःखादेरजनितावयविरूपादेः पाकजनष्टपरमाणुरूपादेश्चागणनात्तेषां लक्ष्यत्वमनुमतं। एवं चतेषुज्ञा

=अंत्यावयविरूपादेः =१

इ२ आत्म
२= स्वज्ञानं प्रति स्वस्य कारणत्वमिति नियमात् २

प्रमाण ५
२२

नातिरिक्तभावकार्यफलोपधायकत्वरूपस्याचार्यलक्षणस्याव्याप्तिंपरिहरन्तिंससपक्षस्यक्तोग्रंथस्तेतिध्येयं।मूलेऽन्यथा
सिद्धिरिति।दंडत्वादेर्नियतायाः पूर्ववर्त्तितायाः सत्वादतिव्याप्तिरतउक्तमन्यथासिद्धशून्येति।तद्घटत्वावच्छिन्नं
प्रकृतनियतेत्याद्यन्यथासिद्धिमिसपिघटत्वावच्छिन्नेनान्यथासिद्धतद्रासभेतिव्याप्तिवारणायनियतेति।नियतपूर्
ववर्त्तिजातीयत्वेत्यर्थः।तेनारण्यस्थदंडादावपिस्वरूपयोग्यतासंपत्तिः।तज्जातीयत्वंचनियतपूर्ववर्त्तितावच्छेदकदंड
त्वादिमत्वमेवेतिकियंतितानिकारणानीत्याकांक्षायामाह।तस्येति।यत्समवेतमिति।यदवच्छिन्नंस्वकारणतावच्छे
दकयद्धर्मावच्छिन्नेसमवायसंबंधेनोत्पद्यतेतद्धर्मावच्छिन्नस्यतद्धर्मावच्छिन्नमित्यर्थः।घटत्वावच्छिन्नंहिस्वकारण
तावच्छेदककपालत्वावच्छिन्नेसमवायसंबंधेनोत्पद्यतइतिभवतिघटत्वावच्छिन्नंप्रतिकपालत्वावच्छिन्नंसम
वायिकारणं।स्वकारणतावच्छेदकेत्युक्त्यानन्दव्यत्वादेर्घटादिसमवायिकारणतावच्छेदकत्वमिति।तत्रासत्वमिति॥
इदंचसमवायिकारणादावतिव्याप्तिवारणाय।पटसमवायिकारणतंतुसमवेततंतुत्वादावतिव्याप्तिवारणायउक्तम
ति।तंतुत्वेऽन्यथासिद्धत्वेनानन्यथासिद्धनियतपूर्ववर्त्तितायाअभावेननातिप्रसंगः।मुक्तावल्यामत्रयद्यपीति।
तुरीतंतुसंयोगस्यपटंप्रतिकुतोनासमवायिकारणत्वमितितुनशंकनीयंतुरीतंतुसंयोगनाशेपटनाशापत्तेरसमवा
यिकारणनाशस्यकार्यनाशजनकत्वात्।नचासमवायिकारणनाशस्यकार्यनाशकत्वेप्रमाणाभावइतिवाच्यं।द्व्यणुक
नाशान्यथानुपपत्तेरेवमानत्वादिति।नचतंतुपुनष्टेष्वपिनैवसमवायिकारणंक्षणद्वयंद्रव्यस्यस्थितिःस्यादितिवाच्यं।इ
त्याशंकायांतंतुनाशः अनंतरंतंतुतंतुसंयोगनाशः ततः परं पटनाशः तथाच समवायि कारणं विनैव क्षणद्वयं द्रव्यस्य स्थितिः स्या

शापत्तेः कारणांतरकल्पने गौरवात्। न च कार्यासमवायिनाशयोरसमानाधिकरणयोः कथं हेतुतेति वाच्यं। प्रतियोगित
याऽव्यनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवायिसमवेतत्वकालिकविशेषणतोभयसंबंधेन नाशत्वेन हेतुत
या विवक्षितत्वात्। उक्तकालिकसंबंधस्य कारणतावच्छेदकसंबंधत्वेऽपि तृतीयक्षणे घटादेर्नाशापत्तिरतः स्वप्रतियोगिस
मवायिसमवेतत्वनिवेशः। स्वप्रतियोगिजन्यत्वसंबंधश्च दंडनाशाद्घटनाशापत्ते रूपेक्षितः। भाविनाशमादायातिप्र
संगवारणाय कालिकसंबंधप्रवेशः। यदि तु कपालपवनसंयोगनाशात् घटनाशोऽस्त्वेवमपि द्वयोरेवेति विभाव्यते तदा स्व
प्रतियोगिजन्यत्व स्वप्रतियोगिसमवायिसमवेतत्व कालिकविशेषणतेतत्त्रितयसंबंधेन नाशत्वेन हेतुता बोध्या।
न चैवमपि तुरीतंतुसंयोगनाशात्पटनाशापत्तिरिति वाच्यं। तुरीतंतुसंयोगस्य पटं प्रति कारणत्वे तेन न किं तु तुर्येव संयो
गसंबंधेन तंतुनिष्ठा सती पटजनिकेति न तत्रातिप्रसंगशंकापि। एवं च विशेषणेषु तुरीतंतुसंयोगादिभेदानामप्रवेशेन
लाघवमपीति केचित्। वस्तुतः स्वप्रतियोगिनिष्ठासमवायिकारणतानिरूपितफलोपधानात्मकजन्यत्वसंबंधेन न ना
शत्वेन हेतुता। तुरीतंतुसंयोगस्तु निमित्तं न त्वसमवायीति। न तन्नाशेन पटनाश इत्यन्यत्र विस्तरः। वेगादीनामित्यादि
ना स्पर्शपरिग्रहः। अभिघातादीति स्पर्शवद्वेगवत्संयोगः। मनःसंयोगात्मसंयोगयोरतिव्याप्तेरिह स्पर्शवेगपदे।
घटनिष्ठपरमाणुसंयोगो लक्ष्य एव। न च तत्रापि क्रियोत्पत्तिः स्यादिति वाच्यं। विजातीयाभिघातस्य क्रियाजनकत्वात्।
आदिना नोदनापरिग्रहः। नोदना च स्पर्शवत्संयोगः। ज्ञानादीत्यत्रादिना इच्छापरिग्रहः। इच्छादीत्यत्रादिना कृतेः परिग्रहः। तंतुस

प्र

प्रतियोगिताक २ वि॰

मवेतत्वे सति तुरीतंतुसंयोगाद्यन्यत्वे सति पटकारणत्वं पटासमवायिकारणत्वमिति विशेष्यैव लक्षणं वक्तव्यमित्या
ह। तथापीति। वेस्तुतस्तु तुरीतंतुसंयोग[illegible]त्वावच्छिन्नभेदं पटासमवायिकारणलक्षणघटक
तया ग्रंथकृत्तु न। भिप्रेतं अपि तु तंतुभिन्नसमवेतत्वावच्छिन्नभेद एव। अन्यथाहस्ततंतुसंयोगादिभेदानां पृथक् नि
वेशापत्त्या भेदकूटनिवेशेन गौरवादिति ध्येयं। एतेन तंतुमात्रसमवेतत्वनिवेशेनैवोपपत्तौ तुरीतंतुसंयोगान्य
त्वनिवेशनमनुचितमित्यप्यपास्तं। मात्रपदस्याप्यमुक्तार्थकत्वात्। एवमिच्छाद्यसमवायिकारणलक्षणे आत्म
मात्रसमवेतत्वावच्छिन्नप्रतियोगिताकभेदस्यैव निवेश्यो न तु ज्ञानत्वाद्यवच्छिन्नभेद इति बोध्यं। तथा चेति। द्वि
विधप्रत्यासन्नितिलक्षणेचेत्यर्थः। फलितार्थ इति द्विविधप्रत्यासत्त्योरिति शेषः। पर्यवसितं समवायिकारणलक्षण म॰
माह। द्वयं चेति। कार्यैकार्थप्रत्यासत्तिः समवायसंबंधः। कारणैकार्थप्रत्यासत्तिः समवायिसमवेतसंबंधः। तथा स्व॰ त्व॰
स्वसमवायस्वसमवायिसमवेतत्वान्यतरसंबंधेन कारणत्वे सत्यात्मविशेषगुणान्यत्वं सामान्यतोऽसमवायि
कारणत्वमित्यर्थः। अत्र पटासमवायिकारणस्य तंतुरूपस्य च संग्रहाय समवायस्वसमवायिसमवेतत्वयोः प्र
वेशः। घटरूपं प्रति घटस्यासमवायिकारणतावारणाय तादृशान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नत्वे
सं कारणत्वं परित्यज्य तादृशान्यतरप्रत्यासत्त्या कारणत्वपर्यंतानुधावनं। आत्मविशेषगुणान्वारयितुं विशेष्य
भागः॥ ननु सामान्यतोऽसमवायिकारणत्वं दंडादावतिव्याप्तं कपालादिसामानाधिकरण्यसत्त्वात्। अन्यथा दंडादे:
ति २ । स २

त्य

४ तंतुसंयोगस्य पटासमवा यिकारणस्य ४

=असमवायिकारणत्वं २२

= दंड: घटपूर्ववृत्तिरित्यत्र तद्धर्मावच्छिन्नघटत्वावच्छिन्नघटनिरूपितं यन्नियत...
= तत्प्रकारकग्रहं दूरीकृत्य तादृशग्रहविशेष्यतावच्छेदकं दंडत्वं तत्सत्वे सतीत्यर्थः

कारणत्वे वेन स्यात्। समवायसामानाधिकरण्यरूपकारणतावच्छेदकसंबंधभेदादननुगमोपि। अथ कार्यनाश्य जनकनाशप्रतियोगित्वं तत्त्वमिति चेन्न। द्वित्वनाशप्रयोजकनाशप्रतियोगिन्यामपेक्षाबुद्धावतिव्याप्तेरिति। अवयवमात्रसंयोगत्वं द्रव्यासमवायिकारणत्वमित्यादि विशिष्यैव लक्षणं निर्वाच्यं। अखंडोपाधिरेवैतद्वे सम्यैर्भिन्नकारणमिति। अत्रेदं बोध्यं। समवायिकारणत्वासमवायिकारणत्वान्यकारणत्वमेव निमित्तकारणत्वं। तेन तुरीपटसंयोगं प्रति तुरीतंतुसंयोगस्यासमवायिकारणत्वेपि न तस्य पटं प्रति निमित्तकारणत्वमिति। यत्कार्यं प्रतीति। यद्धर्मावच्छिन्नं प्रतीत्यर्थः। येन रूपेणेति। यद्रूपावच्छेदेनेत्यर्थः। इत्थं च तद्धर्मावच्छिन्ननिरूपितनियतपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वे सति तद्धर्मावच्छिन्नं प्रति स्वतंत्रान्वयव्यतिरेकशून्यत्वं तद्धर्मावच्छिन्नं प्रति अन्यथासिद्धत्वं प्रथममित्यर्थः। द्वितीयान्यथासिद्धदंडरूपादिवारणाय सत्यंतं। कपालसंयोगो घटपूर्ववृत्तिः साधि ग्रहे कपालस्यापि तादृशविशेष्यतावच्छेदकत्वात्तत्रातिव्याप्तिवारणाय विशेष्यं। स्वोत्तरेण तत्कार्यनिरूपितान्वयव्यतिरेक शून्यत्वे सति तत्कार्यकारणतावच्छिन्नस्वनिष्ठतत्कार्यनियतपूर्ववृत्तित्वग्रहविशेष्यताकं यत्तत्तत्कार्यं प्रत्यन्यथासिद्धमित्यर्थः। कपालसंयोगो घटपूर्ववृत्तिरित्यादि पूर्ववर्तित्वग्रहविशेष्यतायाः कपालसंयोगनिष्ठायाः कपालावच्छिन्नत्वात्कपालसंयोगे अतिव्याप्तिवारणाय सत्यंतं। दंडत्वादिवारणाय विशेष्यमिति। अत्रेतरान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकशालित्वमित्युक्तौ प्रथमद्वितीयान्यथासिद्धयोः संग्रहेपि भेदेनान्यथासिद्धद्वयप्रदर्शनं शिष्यबुद्धिवैशद्यार्थमिति ध्येयं। किंतु कोरेणमिति। कारण

= स्वनिष्ठं दंडरूपनिष्ठं यत्तत्कार्यनियतपूर्ववृत्तित्वं घटरूपकार्यनिरूपितनियतपूर्ववृत्तित्वं तत्प्रकारको योग्रहः दंडरूपं घटपूर्व...
= विशेष्यता सा तत्कार्यकारणतावच्छिन्ना घटरूपकार्यजनकदंडावच्छिन्ना कुतः उक्तग्रहे दंडस्य विशेष्यतावच्छेदकत्वात् तत्...

= फलाजनकं =

त्वं चात्र पृथगन्वयव्यतिरेकशालित्वं। तेन नासाम्भवेयेः। अन्यं प्रतीति। फलानुगुणमन्यं प्रतीत्यर्थः। तेन नकुलाजनकेत्व
धान्यथासिध्याभावेति व्याप्तिः शंकते। शब्दाश्रयत्वेनेति। अन्यं प्रतीत्यादितृतीयान्यथासिध्यभावादिति भावः। पंचमीतीति
अवश्यक्लृप्तनियतपूर्ववर्तिन इत्यादिकेत्यर्थः। यद्यपि शब्देऽव्यञ्जनत्वेऽजन्यगुणत्वादित्यनुमित्यात्मककार्यकारणभावग्रह
रूपानुकूलतर्कसहकृतेनैव शब्देऽव्याप्तितो गुणत्वादित्यनुमानेन शब्दाश्रयत्वं गगने गृहीत्वा तेन रूपेण घटपूर्वव
र्तित्वं गृह्यते। तथा च शब्दपूर्ववर्तित्वं गृहीत्वैव गगनस्य घटपूर्ववर्तित्वग्रहात्तृतीयैवान्यथासिद्धिः संभवतीति तथा
प्यन्यं प्रतीत्यस्य यथाश्रुतार्थकत्वे अपूर्वं प्रति यागस्य अन्यथासिद्धिः स्यात् स्वर्गं प्रति पूर्ववृत्तित्वं गृहीत्वैव गृहीतत्वात्कार
णत्वान्यथानुपपत्त्या यागव्यापारत्वेनापूर्वकल्पनात्। ततोऽन्यं प्रति पूर्ववृत्तित्वघटितत्वेन रूपेण यस्य यज्जनकत्वं तस्य तेन रू
पेण तं प्रत्यन्यथासिद्धत्वमित्येतावत्पर्यंतं विवक्षणमावश्यकं। यागस्य स्वर्गपूर्ववृत्तित्वघटितस्वर्गजनकत्वेनापूर्वं
प्रति अन्यथासिद्धत्वेपि यागत्वेन हेतुत्वे अन्यथासिद्ध्यभावात्। एवं च शब्दपूर्ववर्तित्वघटितशब्दजनकत्वेन गगन
स्यान्यथासिद्धत्वेपि यागत्वेन हेतुत्वेतदघटितशब्दाश्रयत्वेन हेतुत्वे तृतीयान्यथासिध्यसंभव इत्यभिप्रायः। शब्दा
श्रयत्वाद्यतिरिक्तद्रव्यत्वादिना गगनस्य घटं प्रति हेतुत्वेपि तृतीयैवान्यथासिद्धिः। अन्यं प्रति पूर्ववृत्तित्वानुपस्था
दकं यत्प्रतियोगिस्य पूर्ववृत्तित्वं गृह्यत इत्यर्थात् नापूर्वं प्रति यागस्यान्यथासिद्धिरित्यपि केचित्। कवत्वादित्यमिति। विनिगम
नाभावेन वक्रूनां कारणतावच्छेदकत्वे गौरवात् इति नाम सौर्वकालीनत्वादाह। विशेषपदार्थो नेति। यत्कार्यजनकं
प्रतीति। अत्रापि। अन्यं प्रतीत्यादिपर्यन्ते तृतीयचतुर्थान्यथासिद्ध्योः संग्रहे फलानानुगुण्यात् तदनुगुणत्वयोर्विशि

= अन्यंप्रति २

कारणतावच्छेदकावच्छिन्नासत्त्वाद्यभिधा

तत्र २

= यत्पूर्ववृत्तित्वे

=गंधप्रागभावसहभूत=२

षणयोरुपादानेन तयोर्भेदेनाभिधाने प्रयोजनाभावस्तथापि विनिगमकबुद्धिवैषम्यनिरासायेत्योक्तमिति। अनन्यस्य क्लृप्ते
ति। गंधं प्रत्यवश्यक्लृप्तेन गंधप्रागभावेनैव गंधोत्पत्तिसंभवे तत्सहभूततेरूपप्रागभावादेः पाकजगंधं प्रत्यन्यथासि
द्धमेवं घटजातीयं प्रत्यवश्यक्लृप्तनियतपूर्ववर्त्तिदंडादिभिरेव घटोत्पत्तिसंभवे रासभोऽन्यथासिद्ध इत्यर्थः। न
न्वावश्यक्लृप्तनियतपूर्ववर्त्तिना पाकजरूपप्रागभावेन गंधोत्पत्तिसंभवे रूपप्रागभावेन गंधप्रागभावस्यान्यथा
सिद्धिः स्यात्। एककारणत्वमवश्यक्लृप्तमित्युक्तौ चात्माश्रयः स्यादिति चेदत्राहुः। लघुनियतपूर्ववर्त्तित्वरूपमवश्य
क्लृप्तत्वमिह बोध्यं। लघुत्वं च शरीरकृतमुपस्थितिकृतं संबंधकृतं च तत्र प्रथममनेकद्रव्यसमवेतत्वापेक्षया महत्वे गं
तीयं गंधं प्रति रूपप्रागभावापेक्षया गंधप्रागभावे गंधात्मकप्रतियोगिज्ञानसत्वेन शीघ्रं तदुपस्थितेः। तृतीयं दंडत्व
दंडरूपाद्यपेक्षया दंडे स्वाश्रयदंडसंयोगादिघटितपरंपराया गुरुत्वादिति। ननु निबंधांतरेष्वन्यत्र क्लृप्तेति हस्तेनेतल
थमवश्यक्लृप्तेति। कृतमेतस्य फलमाह। अत एवेति। अन्यथा महत्वस्यानेकद्रव्यत्वादन्यत्र क्लृप्तनियतपूर्ववर्ति
त्वाभावेन तस्यान्यथासिद्धिर्महत्वेन न स्यादिति भावः। अत्रानेकद्रव्यत्वं नानेकद्रव्यसमवेतत्वं। तस्य द्व्यणुकेपि सत्वेन
द्व्यणुकप्रत्यक्षापत्तेः। समवेतसमवेतद्रव्यत्वं तादृत्यपि न। आत्मनि तस्याभावे नात्मप्रत्यक्षानुपपत्तेः। किं त्वणुभिन्नद्र
व्यत्वमितिबोध्यं। अन्येषां दंडत्वदंडरूपाकाशकुलालपितृणां। अनेन पंचमान्यथासिद्धेन चरितार्थत्वं संग्रहः
अनियतरासभादेर्वारणायनियतेत्यादि। न चानियतरासभादेः पंचमान्यथासिद्धत्वात्तेनैव वारणे नियतपदं
व्यर्थमिति वाच्यं। अवश्यक्लृप्तत्वस्यैकस्याभावेन यत्र यत्र प्रामाणिकानां व्यवहारस्तादृशस्य निवेशनीयतया नियत

=क्लृप्तनियतपूर्ववर्त्तिस्वरूपकारणत्वाभावेन=६

मु० २५

...सिद्धस्य

नियतपूर्व = गुणवादे =५

२५

49

नैयत[illegible]देनैव रासभादेर्वारणे तद्भेदस्याप्रवेशादित्यभिप्रायात् । पूर्ववर्तित्वं चाव्यवहितपूर्ववर्तित्वं तेनाव्यवहितपू
र्ववर्तित्वं तु दासः । अत एव च यागादेः स्वर्गकारणत्वानुपपत्त्याऽपूर्वकल्पनया पूर्वसंबंधेनाव्यवहितपूर्ववर्तित्वोपपा
दानं कथं [illegible] संगच्छते । अन्यथा यागस्यापि नियतपूर्ववर्तित्वाबाधेनापूर्वकल्पनं न स्यादिति । न चैतादृशस्य
कारणत्वे व्यतिरेकव्यभिचारज्ञानस्य नियमोऽग्रहे [illegible]भावावगाहितया विरोधित्वेऽप्यन्वयव्यभिचारग्रहस्य
कथं कारणताग्रहविरोधित्वमिति वाच्यं । अवश्यक्लृप्तत्वाद्यन्यथासिद्धिज्ञानप्रयोजनत्वात् । तदितरनिरवच्छिन्न
कार्यकारणभावस्य [illegible] कार्यव्यतिरेकप्रयोज्यव्यतिरेकत्वात् । तेनावश्यक्लृप्तेन नियतपूर्ववर्तिनान्यथासिद्धत्वज्ञानादान
व्यासक्तकारणत्वस्यानन्यथासिद्धनियतपूर्ववर्तितावच्छेदकधर्मत्वे प्रतिबंधकाभावस्य तत्तद्व्यक्तित्वेन हेतुता
पत्तिः । यत्र न कारणत्वव्यवहारस्तत्तद्भेदकूटवत्त्वं तु सर्वज्ञेनैव ज्ञेयं । तत्तद्व्यक्तिभेदकूटवत्त्वसंबंधेन कार्यविशि
ष्टो यो धर्मस्तत्त्वं तदित्यपि न युक्तं । तस्य संबंधत्वसंदेहात् । तस्मात्कारणत्वं पदार्थान्तरमेवेत्याहुः । तदसत् । कारणत्वस्या
तिरिक्तत्वे दंडादौ सर्वदा तत्प्रत्यक्षापत्तेः । न चानन्यथासिद्धत्वे सति यादि धर्मस्तद्व्यंजक इति वाच्यं । तादृशधर्म
ज्ञानस्यावश्यकत्वे तस्यैव कारणतारूपत्वौचित्यात् । अस्तु वा दंडत्वादिकमेव कारणत्वं । घटादिकार्यसंबंधि
तया तद्धेतुक्तधर्मस्य व्यंजकत्वादिति परे तु । कार्यान्वयव्यतिरेककाल पूर्वकालान्वयव्यतिरेकशालित्वमित्यु
[illegible]क्तं । आत्मादौ सुखादिकारणे प्रागभावरूपव्यतिरेकासंभवेनाव्याप्तेः । [illegible]त्वे गुणकर्ममात्रवृत्तिसमवायित्व

= प्राक्[illegible] पूर्वक्षणे = २

=अव्यवहितपू
=र्ववर्तित्वस्य ३

१५

रणत्वमित्युक्तं। तच्चायुक्तं। आत्मविशेषगुणेष्वव्याप्तेरतो वैधर्म्यपरतया मूलं व्याचष्टे। असमवायिकारणत्वमिति। साधर्म्यप्रकरणे मैत्युक्तमित्याशयादाह। अथवेति। सत्ताभिन्नद्रव्यत्वरूपजातिमति द्रव्येऽति व्याप्तिवारणाय इत्युक्तं। तत्रैव सत्ताजातिमादायाति व्याप्तिवारणाय सत्ताभिन्नेति। तत्रैव द्रव्यगुणान्यतरत्वरूपधर्ममादायातिव्याप्तिवारणाय जातीति। वृत्तित्वं जातिमत्त्वं च समवायेन विवक्षितं। तेन न गुणादौ द्रव्यत्वस्य कालिकेन वृत्तित्वात् द्रव्यस्य च कालिकेन गुणत्वादिमत्त्वात् द्रव्येऽतिव्याप्तिः। ननु गगनादिकं सर्वदैवास्तीत्यादिव्यवहारान्नित्यद्रव्येष्वपि कालिकसंबंधेना श्रितत्वसत्त्वादन्यत्र नित्यद्रव्येभ्य इति मूलमयुक्तमत आह। आश्रितत्वमिति। समवायादिसंबंधेन। सर्वाधारतानियामककालिकसंबंधातिरिक्तसंबंधेन। विशेषणतयेति। कालिकविशेषणतयेत्यर्थः। अत्र नित्यद्रव्यातिरिक्तत्वं लक्ष्यतावच्छेदकं। न च संयोगेन परमाणोरपि वृत्तेः परमाणावतिव्याप्तिः। तत्संयोगस्य वृत्त्यनियामकत्वादिति। क्षित्यादीनां नवानामिति। मूलस्थ तु शब्देन सूचितमर्थं प्रकटयति। इदानीमिति। ननु धात्वर्थः क्रियात्वजातिप्रसंग इत्यत आह। कर्मवत्त्वमिति। वेगवत्त्वं वेगसंबंधित्वं। दिक्कृतयोः परत्वापरत्वयोर्हेतुरिदमस्मादिति निरुक्तमितरसापेक्षा बुद्धिः। कालकृतयोः परत्वापरत्वयोर्हेतुरयमस्मादल्पतरसंबद्ध इत्यपेक्षाबुद्धिश्च यत्रनो सत्त्वा तत्र परत्वापरत्वयोरनुत्पादे व्याप्तिमाशंक्य निरस्यति। न चेत्यादिना। आत्मन्यतिव्याप्तिवारणाय समानाधिकरणांतं। तत्रैव सत्तामादायातिव्याप्तिवारणाय द्रव्यत्वव्याप्येति। द्रव्यत्वव्याप्यत्वेनापि जातिर्विशेषणीया। तेन न द्रव्यत्वा

योग्यत्वे बहिरिं। १ लौकिकप्रत्यक्षस्वरूपयोग्यत्वे। बहिरिन्द्रियजन्यलौकिकप्रत्यक्षनिष्ठजन्यतानिरूपितजनकतावच्छे-
दकत्व [illegible] इति यावत् = १० =

व्याप्यद्रव्यसमवायादीतिव्याप्तिः। अपकृष्टेति। अविभुवृत्तिपरिमाणत्वमित्यर्थः। तेन परमाणौ नाव्याप्तिः। क्रियाजनक
तावच्छेदकतया मूर्तत्वं जातिरित्यपि केचित्। तच्चेति। निरुक्तमूर्तत्वं चेत्यर्थः। [illegible] स्वस्य पृथिव्यादिवदिति। परत्वापरत्व
समानाधिकरणे सादिकथितविवक्षितार्थवदित्यर्थः। कालादौ स्पंदाभावेनासंभवमाशंक्याह। सर्वमूर्तेति। अ
हं महानिति प्रतीतिविषयपरममहत्त्वस्य गगनपरिमाणादिसाधारणस्य जातित्वसंभवेप्याल्पपरिमाणमयो
ग्यमिति टीकाकृन्मतमनुसृत्याह। अपकर्षेति। यद्यप्यणुपरिमाणेषु द्व्यणुकपरिमाणमेवापकर्षाश्रयो न परमाणु
परिमाणमिति परमाणावतिव्याप्तिस्तथाप्यपकर्षानाश्रयमहत्परिमाणवत्त्वं तथा बोध्यं। बहिरिन्द्रियेति। आत्मन्य
तिव्याप्तिवारणाय बहिः पदं। बहिरिन्द्रियग्राह्यजातीयसंयोगादिमति कालादावतिव्याप्तिवारणाय विशेषेति। वि
शेषगुणत्वं च गुणनिरूपणे वक्ष्यते। द्रव्यत्वमादायातिव्याप्तिवारणाय गुणेति। लौकिकत्वनिवेशस्य फलमाह।
तेनेति। ज्ञातो घट इति ज्ञानेन प्रकारीभूतज्ञानांशेन लौकिकविषयता चक्षुरादेस्तत्र लौकिकसंनिकर्षाभावा
दिति भावः। स्वरूपयोग्यतानिवेशस्य फलमाह। नचेति। ननु परमाणुरूपादेर्योग्यत्वे कुतो न तस्य प्रत्यक्षमत आह
महत्त्वेति। लौकिकविषयतया द्रव्यसमवेतप्रत्यक्षे सामानाधिकरण्यसंबंधेन कारणस्य महत्त्वस्य परमाणुरूपा
दावभावान्न तल्लौकिकप्रत्यक्षमिति भावः। ननु चक्षुरिन्द्रियादिगतरूपादिविशेषगुणानामनुद्भूतत्वेन बहिरिं
द्रियग्रहणायोग्यत्वे चक्षुरादावव्याप्तिमाशंक्य [illegible] आह। अथवेति। अत्र कल्पे दैशिकपरत्वापरत्वमादाय मनस्य

तं४ १२

सत्वात्

ति व्यभिचारवारणाय विशेषेति। स्पर्शवत्त्वं समवायेन। द्रव्यसमवायिकारणेत्यादि। सत्तादिकमादाय गगनेऽतिव्या
प्तिवारणाय द्रव्यत्वव्याप्येति। आकाशशरीरिणामित्यत्र सले शरीरपदमात्मपरमित्यभिप्रायेणाह। आकाशस्य नामेति।
दी२ लक्ष्ये लक्षणमाहत्यैतु शब्देन नानामव्याप्यत्वमितसंक्षणिकत्वं चोपपादयति। आकाशस्येत्यादिना। क्षणिकस्य विशेष
गुणस्यानभ्युपगमादाह। क्षणिकत्वं चेति। घटादिव्याप्तत्वे तृतीयक्षणवृत्तीति। स्वोत्तरवृत्तीति। स्वपदेनास्यत्य
भिमतपरं। तदुत्तरवर्त्तितृतीयक्षणवृत्तेर्यो विशेषगुणस्तन्नाशस्येत्यादिरर्थः। अत्र च शब्देति येत्र योगितासंबंधेन
योग्यविभुविशेषगुणनाशत्वस्य सामानाधिकरण्यस्वाव्यवहितपूर्ववत्त्वोभयसंबंधेन योग्यविभुविशेष
गुण इति सामानाधिकरण्येन नाशकत्वं बोध्यं। कार्यत्वावच्छेदके योग्यत्वानुपादाने शब्दाश्च नादिजन्यादृष्टनाशे
व्यभिचारः। योग्यत्वं च लौकिकसाक्षात्कारविषयनिर्विकल्पान्यतरत्वमतीन्द्रियजातिशून्यत्वं वा रूपनाशे व्य
भिचारवारणाय विभ्विति। संयोगादिनाशे व्यभिचारवारणाय विशेषेति। कारणतावच्छेदके योग्यविशेषत्वयो
रुपादानान्नाद्वितीयक्षणोत्पन्नादृष्टसंयोगादिनात्तृतीयक्षणेऽपेक्षाबुद्धिनाशः। सामानाधिकरण्यसंबंधनिवेशा
न्नव्याप्तिनाव्यधिकरणानामिच्छादीनां नाशः। स्वाव्यवहितपूर्वत्वनिवेशाच्च न शब्देनोत्पन्नाशुसत्तिक्षणिके[?]
नी२ च्छादिनाशः। केचित्तु। स्वत्वस्य तत्तद्व्यक्तिपर्यवसायितया तत्तद्गुणस्य तद्गुणो नाशकः। अपेक्षाबुद्धेस्तु द्वित्वप्रत्य
क्षमिसात्[?]। एतल्लक्षणोऽसत्त्वयोग्यविभुविशेषगुणत्वेन नाश्यता। एतल्लक्षणोत्तरक्षणवृत्तित्वविशिष्टगुणत्वेन

२७

53

वै०

नाशकता। अपेक्षाबुद्धिनाशे द्वित्वप्रसङ्ग विशेषसामग्र्यां चरमज्ञानादिकं तु उत्तरक्षणवृत्तित्वविशिष्टं स्वयमे
वनाशकं। एतत्क्षणोत्पन्नसकलविशेषगुणसाधारणं चेदमित्याहुः। शब्दस्याव्याप्यवृत्तिक्षणिकत्वे उपपाद्य
ज्ञानादीनामपि तेउपपादयन्ति। एवमिति। क्षणिकपदस्यैव व्यर्थ्यां लक्षणद्वयाभिप्रायेणार्थमाह। इत्थं चेति। अ
व्याप्यवृत्तीत्युक्तमिति। न च रूपादीनामपि कालिकाव्याप्यवृत्तेः कथं तद्वारणमिति वाच्यं। अव्याप्यवृत्तिपदेन
देशिकाव्याप्यवृत्तित्वस्योक्तत्वात्। विशेषगुण इत्युक्तमिति। विशेषगुणाश्च बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सां
सिद्धिको द्रवः अदृष्टभावनाशब्दाः इति वक्ष्यमाणास्तल्लक्षणं गुणनिरूपणे वक्ष्यते। यत्तु। अव्याप्यवृत्तिविशे
षगुणवत्त्वमीश्वरे अव्याप्तं। तद्गुणानां व्याप्यवृत्तित्वादिति। तन्न। अव्याप्यवृत्तिपदेनाव्याप्यवृत्तिगुणसव्या
प्यजातिमत्त्वस्य विवक्षितत्वात्। चतुःक्षणवृत्तीति। चतुःक्षणवृत्तीनि यानि अन्यानि घटादीनि तद्वृत्ति
र्याजातिर्ज्ञानत्वादिस्तद्वान्विशेषगुणो ज्ञानादिस्तद्वत्त्वस्यात्मादौ सत्त्वाल्लक्षणसमन्वयः। अत्र वा वृत्तित्वं स
मवायेन विवक्षितं। तेन जन्यमात्रे कालिकेन ज्ञानत्वस्य वृत्तित्वेपि न क्षतिः। वृत्त्यंतं च ज्ञानादौ जन्यवृत्तित्वादसं
भववारणाय। तदर्थत्वादिति। क्षणिकविशेषगुणवत्त्वार्थत्वादित्यर्थः। ननु त्रिक्षणवृत्तित्वमुपेक्ष्य चतुःक्षण
वृत्तित्वपर्यंतानुधावने प्रयोजनाभावः। न त्रित्वचतुष्ट्वयोर्गौरवलाघवविरहेण चतुर्थोपादाने रक्षेवनियाम

पं०

अत्रेश्वरस्य ज्ञानाद्ययोग्य हाः ५

केतिवाच्यं। प्रथमोपस्थितत्वरूपलाघवस्य नित्यत्वे संभवादत आह। अपेक्षाबुद्धीरिति। तथा च त्रिक्षणवृत्तित्वप्रवेशे
ज्ञानत्वस्य संग्रहो न स्यादिति भावः। चतुःक्षणवृत्तिजन्यावृत्तित्वस्य फलमाह। रूपत्वादिकं [illegible] त्विति। तद्व्युदासः
रूपत्वजातिव्युदासः। तथा च रूपत्वजातिमद्विशेषगुणवति घटादौ चातिव्याप्तिः सा निरस्तेति भावः। अन्यस्य
स्य फलमाह। ईश्वरेति। शरीरिणामित्यत्र मत्वे शरीरीपदस्य यथाश्रुतार्थकत्वाभिप्रायेणाह। यथा जीवात्म
नो रिति। ननु जन्यस्याप्रवेशे ज्ञानत्वेच्छात्वप्रयत्नत्वजातीनां चतुःक्षणवृत्तित्वाभावात् कथं लक्षणसमन्वयः
इत्यत आह। रूपत्वादिकमिति। आदिना शब्दत्वपरिग्रहः। विशेषपदस्य फलमाह। परममहत्त्वस्येति। तादृशगु
णत्वादिति। चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्गुणत्वादित्यर्थः। ननु परममहत्त्वत्वं न जातिः। किं त्वौत्कर्षनाश्रय
परिमाणत्वमित्युक्तं। तथा च तमादायातिप्रसंग इत्यत आह। चतुर्थक्षणे द्वित्वादीनामिति। यद्वा ननु जन्यपदांशे न
परममहत्त्वस्य चतुःक्षणावृत्तित्वान्न परममहत्त्वमादाय कालादावतिव्याप्तिरत आह। चतुर्थक्षणे द्वित्वादी
नामिति। तथात्वादिति। तथात्वात्तादृशजातिमद्गुणत्वादित्यर्थः। प्रथमोपस्थितत्वरूपलाघवमभिसंधायाह। त्रिक्ष
णेति। चक्षुरादीनामित्यादिना घ्राणादिपरिग्रहः। तत्रापि। चक्षुरादिष्वपि। पृथिवीत्वादेरुद्भूतत्वं [illegible] स्तमुपपा
दयति। घटजलेत्यादिना। योग्यप्रत्यक्षविषयत्वं सत्त्वादाह। अतिव्याप्तं चेति। घटो वायुमानिति बाध्यं शेउपनी

१८॰ मु॰ २८ सट५ पध मुपा॰ २८

तभानात्मकपरविशेषकचाक्षुषविषयवायुरूपत्वव्याप्यवायुत्वजातिमतिवायावतिव्याप्तिवारणाय स्पार्शे
क्रियेति। गुरुत्वमिति। गुरुत्वं स्वरूपेण कर्मापकत्वाल्लक्षणादि। इदमुपलक्षणं। पतनवत्वमित्यपि बोध्यं। पतन
त्वं गुरुत्वासमवायिकारणककर्मत्वं। उल्कापततीत्यादिप्रयोगस्तु आक्षिणिकः। वस्तुतस्तु गुरुत्वासमवायिका
रणककर्मवृत्तिपतनत्वं जातिविशेष एव। ननु समानानां साधर्म्ये इत्यत्र तत्तत्स्य वैधर्म्यमित्याशंकायामाह। द्र
वत्वादिकमिति। वाय्वोर्नव एकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश। दिक्कालयोः पंच षडेव चांब
रे महेश्वरेष्टौ मनसस्तथैव चेति॥१॥ प्राचीनमतेनैकैकमनुसृत्य वायोस्तावद्गुणानाह। स्पर्शादयोष्टा
विति। स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वान्यष्टौ वेगाख्यसंस्कारश्चेति वायोर्गुणा इत्यर्थः।
तेजसो गुणानाह। स्पर्शादयोष्टाविति। अपां गुणानाह। स्पर्शादयोष्टाविति। पृथिव्या गुणानाह। स्नेहहीना इ
ति। एते अव्यवहितपूर्वोक्ताः। आत्मनो गुणानाह। बुद्ध्यादिषट्कमिति। बुद्धिः सुखदुःखेच्छाद्वेषप्रयत्नाः संख्यादि
पंचकं संख्यापरिमाणपृथक्त्वसंयोगविभागाः। कालदिशोर्गुणानामैव्यादेशोऽस्येवाह। संख्यादिपंचकमिति।
आकाशस्य गुणानाह। शब्देति। तथा चाकाशे शब्दसंख्यादयः पंचैवं षड्गुणा इत्यर्थः। ईश्वरस्य गुणानाह। सं
ख्यादयइति। अत्र नव्याः। ईश्वरपरिमाणवत्त्वे मानाभावः। न च द्रव्यत्वेन तदनुमानमिति वाच्यं। अप्रयोजकत्वा
त्। ईश्वरे द्रव्यत्वसत्त्वे मानाभावाच्च। अतएव तत्र संयोगविभागयोः सत्त्वेपि मानाभावः। पृथक्त्वस्य च गुणत्वमेव

मु॰
२१

टि

नं ४

निरस्तं। यथा ईश्वरे सुखं तथाग्रे व्यक्ती भविष्यति। एवं च संख्या बुद्धीच्छा प्रयत्नसुखानीति पंचैवेश्वरस्य गुणाः इत्याहुः॥ ॥ ॥इति श्रीभारद्वाजभट्टवासुदेवात्मजमहादेवभट्टकृतौ मुक्तावलीप्रकाशे प्रथमपरिच्छेदः॥ ॥गंधवद्गुणे ... कालादौ गतमतो व्याचष्टे गंधवतीति। गंधवत्त्वं हि द्रव्यत्वस्य व्याप्यजातिमत्त्वमर्थस्तेन सुरभ्यसुरभिकपालारब्धनिर्गंधघटेनाव्याप्तिः। एतेन नजलादावतिव्याप्तिः। द्रव्यत्वव्याप्यत्वेन नैतत्रैव सत्तामादाय सा। न वा जातिपदोपादानाज्जलपृथिव्यन्यतरत्वमादाय गंधवत्त्वं। वृत्तित्वं च समवायेन। तेन कालिकसंबंधेन गंधवति समवायसंबंधावच्छिन्नवृत्तिताकजलत्वादिमति पृथिवीनिरूपितकालिकसंबंधावच्छिन्नवृत्तित्वकजलत्वादिमति जलादौ नातिव्याप्तिः। प्रमाणोपन्यासायेति। यद्यपि पृथिवीत्वस्य प्रत्यक्षतया न प्रमाणांतरापेक्षा तथाप्ययोग्यसाधारण्येन प्रत्यक्षासंभवात्तत्साधारण्येन पृथिवीत्वसिद्ध्यर्थं तदुपन्यास इति भावः। अन्यथा गंधत्वावच्छिन्नं प्रति पृथिव्या हेतुत्वानंगीकारे आकस्मिकत्वापत्तेरिति। नियतकारणानियम्यत्वापत्तेरित्यर्थः। तथा च कार्यमात्रवृत्तेर्गंधत्वस्य कार्यतावच्छेदकत्वानुरोधेन तदवच्छिन्ने पृथिवीत्वेन हेतुत्वमावश्यकमिति भावः। इदमुपलक्षणं। रूपादिनाशकतावच्छेदकतयापि पृथिवीत्वजातिसिद्धिर्द्रष्टव्या। प्रतियोगितासंबंधेनाश्रयनाशजन्यरूपनाशं प्रति स्वसमवायिसमवेतत्वस्वरूपत्वोभयसंबंधेन विलक्षणतेजःसंयोगत्वेन हेतुत्वात् पृथिवीत्वस्य तादृशनाशकतावच्छेदकसंबंधे घटकत्वादाश्रयनाशाजन्यरूपनाशे व्यभिचारवारणाय अजन्यांतं नाशविशेषणं। घटाग्निसंयोगेन पटरूपनाशापत्तिवारणाय समवेतत्वांतस्य नाशकतावच्छेदकसंबंधे प्रवेशः। तेजोवृत्तिरूपे प्रतियोगितासंबंधेन तादृशरूपनाशापत्तिवारणाय तद्घटकत्व

पृथ्वीपरमाणुसाधारणेन
न = ७

पृथिवी
तओ२

२१

...दिना शात
...रूपनाशो २

= नाशकसात = १

अनवस्थाशब्देन रूपं ग्राह्यं =१

नाशो

याः पृथिवीत्वप्रवेशः। स्वसमानाधिकरणरसगंधादौ प्रतियोगितासंबंधेन तादृशरूपोत्पत्तिवारणाय स्वरूप
रूपस्य स्यनाशकतावच्छेदकसंबंधे प्रवेशः। स्ववृत्तित्वं च कालिकविशेषणतया बोध्यं। स्वसमवायि
समवेतत्वविशिष्टरूपत्वस्य संबंधत्वे रूपत्वविशिष्टस्वसमवायिसमवेतत्वमादाय चिनिगमना
विरहेण नाशस्य नाशकभावद्वयापत्तेरिति तत्परित्यागः। एतेन पाकजगंधे तेजःसंयोगः कारणत्वेनापाकजेत्व
[illegible] न पवगतत्वैरूप्यादे नियामकत्वेन गंधत्वेन पृथिवीत्वेन कार्यकारणभावे मानाभावात् पृ
थिवीत्वं न जातिरित्युक्तं। ननु गंधवत्त्वस्य पृथिवीलक्षणत्वे पाषाणादौ गंधभ्रन्येऽव्याप्तिरित्याशंकां निराकु
रुते। न चेत्यादिना। तत्रापि पाषाणादावपि पृथिवीत्वेनेति शेषः। गंधसत्वात्। गंधानुमानात्। ननु पाषाणादौ
गंधसत्वेऽनुपलंभो न स्यादित्यत आह। अनुपलब्धिस्त्विति। अनुत्कटत्वेनानुद्भूतत्वेन। ननु पाषाणस्य पृ
थिवीत्वएवमानाभावो नितरां तद्घान गंधवत्त्वइत्यतस्तत्र पृथिवीत्वसाधनाय भस्मिकामाचरेति। कथम
न्यथेत्यादिना। अन्यथा पाषाणादौ पृथिवीत्वानंगीकारे तद्भस्मनि पाषाणभस्मनि। यद्यपि पाषाणे पृथिवी
त्वाभावेऽलक्ष्यत्वादेव तत्र गंधवत्त्वलक्षणेनाव्याप्तमिति दूषणं तत्र गंधसाधनाय परिश्रमस्तथापि वक्तृस्थि
तिमनुरुध्यतयाव्याप्तमिति ध्येयं। पाषाणभस्मनि गंधप्रत्यक्षसिद्धत्वेन तत्र पृथिवीत्वमंगीकरणीयं। ततश्च भस्मा
रंभकावयवेष्वपि पृथिवीत्वसिद्धिस्ततश्च पाषाणारंभकावयवेष्वपि पृथिवीत्वमंगीकरणीयं। भस्मारंभकावयवानां

१८

२०

पाणावयवयोरैक्याद्वेवंच पाषाणस्यापि पृथिवीत्वसिद्धिरित्यभिप्रायः। तदेतद्विशदयति। भस्मनोहीति। एतेनपाषा
णत्वतद्भस्मन्यपि अनुद्भूतगंधापत्तिवारणाय पाषाणावयवेषु पाकांगीकार आवश्यकः। एवंच पाकोत्पादितगंध
वद्भिः पाषाणावयवैरेव तद्भस्मारंभः। निर्गंधैश्च तैरेव पाषाणारंभ इति। अन्यथा तद्भस्मनी साप्रसंगातिरिति प
रास्तं। तथासत्यपि उद्भूतमनीत्या पाषाणे पृथिवीत्वसिध्यातेन गंधानुमानसंभवादिति। यद्व्यमिति। अत्र घट
ध्वंसप्रसक्ते घटोपादानानुपादेये व्यभिचारवारणाय प्रथमं द्रव्यपदं। अथवा घटध्वंसजन्यरूपध्वंसे [illegible] व्यभि
चारवारणाय तत्। मिथ्याज्ञानध्वंसजन्ये मायस्ये हे नवीनमते दंडस्वरूपदंड प्रागभावध्वंसजन्ये घटे वाव्यभि
चारवारणाय द्वितीयं द्रव्यपदं। प्रतिबंधकद्रव्यात्यंताभावजन्ये द्रव्ये व्यभिचारवारणाय ध्वंसपदं। ध्वंसत्वेन चेहजनक
त्वं विवक्षितं तेन प्राचांमते प्रतिबंधकसंसर्गाभाव[illegible] हेतुत्वेपि न क्षतिः। ध्वंसजन्यत्वं चा हृष्टद्वाराविवक्षि
तं [illegible] ग्रामध्वंसजन्ये नारकीयशरीरे न व्यभिचारः। न च दुग्धध्वंसजन्ये दध्नि दुग्धावयवजन्यस्त्वी
[illegible] पि दुग्धस्यापत्या दुग्धावयवैर्दधिनजन्यतद्संगीकरणीयं। तथा च दध्नि व्यभिचार इति वाच्यं। दध्नो
द्व्यणुकातिरिक्त दुग्धध्वंसजन्यस्त्वीकारात्। द्व्यणुकरूप दुग्धध्वंसजन्यत्वेपि तस्य न व्यभिचारः। तदुपाद तत्र २
न परमाणुजन्यत्वे स्यदध्निसत्वात्। न च दुग्धपरमाणुजन्यत्वेन दध्नोपि दुग्धत्वापत्तिरितिवाच्यं। दुग्धप
माणो दुग्धत्वाभावात्। द्व्यत्वव्याप्यव्याप्यजातेः परमाणुवृत्तित्वेमानाभावात्। अन्यथा परमाणुत्व २०

द्व्यणुकोपादान ३

४ द्रव्यत्वव्याप्येति। द्रव्यत्वव्याप्यजलत्वादिमति जलादावतिव्याप्तिवारणाय ४

रूपउद्भवजन्यत्वेनैं उद्भवत्वापत्तिवारणासंभवात्। उद्भूतस्य दधि स्वयोः परमाणौ जातिसंकरस्यादिति। व्याप्तिबोधार्थं दृष्टांतमाह। दृष्टं चैतदिति। स्वले नानारूपवत्त्वं लक्षणांतरमुक्तं तल्लक्ष्ये प्रतिपादयति। शुक्लत्वादिवाप अलक्ष्ये लक्षणासत्त्वं प्रतिपादयति। नेत्येति। रूपद्वयेति। रूपद्वयवद्वृत्ति सत्तारूपजातिमति गुणादावतिव्याप्तिवारणाय रूपद्वयवद्वृत्तीति। जलपृथिव्यन्यतरत्वादिरूपधर्ममादाय जलादावतिव्याप्तिवारणाय जातीति। अपेक्षाबुद्धिविशेषविषयत्वरूपद्वित्वादिमत्तस्येन गौरवादाह। रूपनाशेति। अत्रापि तिपदव्यावृत्तिः स्वयं बुद्ध्या। षड्विधस्तु रसस्तत्रेति स्वलोके रसषड्विधत्वं प्रकाशयति। मधुरेत्यादिना। ननु यत्र नानारसानो सन्ति तत्र व्याप्तिरिति तत्राह। अत्रापीति। ननु गंधस्तु द्विविधो मत इत्यनेन द्विविधगंधवत्त्वं पृथिव्या लक्षणं प्रदर्शितं। तच्चायुक्तं। द्वैविध्यांशस्य वैयर्थ्यादित्यत आह। वस्तुस्थितिरिति। वस्तुगत्या गंधो द्विविधस्तिष्ठतीति स्वचयितुमुक्तं न तु लक्षणे द्वैविध्यस्यापि प्रवेश इत्यर्थः। गंधद्वैविध्यं प्रकाशयति द्वैविध्यं चेति। अनुष्णाशीतस्पर्शस्य वैयर्थ्यादाह। उष्णश्चेति। पाकजस्पर्शमित्यत्रोचेत्यर्थः। न्यायमते पाकजस्पर्शोभानवत्ति पृथिव्यां वैशेषिकमते पाकजस्पर्शस्य परमाणुष्वेव विद्यमानत्वादवयविनि भागास्सिद्धिमाशंक्य निषेधयति। यद्यपीति। पाकजस्पर्शेति। परादाविस्यादिपदेन वैशेषिकमतेऽवयविमात्रपरिग्रहः। सत्तारूपजातिमादाय गगनादावतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति। द्रव्यत्वसमानाधिकरणसत्तामादायेति व्याप्तिवारणा

वस्

५२ ५३

सत्याप्तिभागः। स्पर्शसमानाधिकरणजलत्वादिकमादायजलादावतिव्याप्तिवारणाय पाकजेति। पाकज
द्रव्यत्वसमानाधिकरणतेजस्त्वमादायतेजस्यतिव्याप्तिवारणाय स्पर्शेति। जलत्वपृथिव्यन्यतरत्वादिकमा
दाय जलादावतिव्याप्तिवारणाय जातीति। अत्र पृथिवीत्वस्य लक्ष्यतावच्छेदकत्वाल्लक्षणत्वं न संभव
तीति तत्परित्यागः। वस्तुतस्तु। पृथिवीत्वजातिरपि पृथिव्या लक्षणं। न च व्यतिरेकसहचारेणान्वया
भिरेव न गृह्यत इत्याचार्यमते पक्षतावच्छेदकस्यैव हेतुत्वमिति वाच्यं। हेतुः साध्यसमानाधिकरण इति ज्ञाने
पि हेतुमान् साध्यवानिति बाधस्यानिष्पन्नत्वेन पक्षतावच्छेदकेपि हेतुत्वाविरोधात्। व्यतिरेकव्याप्ति
मकतायां तु सुतरां। अणुत्वस्य द्व्यणुकेपि सत्त्वादाह। परमाणुरूपेति। बौद्धः शंकते। ननु अयं घट इत्या
दिप्रतीतिरेव तत्र प्रमाणं भविष्यतीत्यत आह। परमाणुपुंजैरेवेति। विलक्षणसंस्थानविशिष्टैः परमाणु
भिरेवेत्यर्थः। उपपत्तेरिति। अयं घट इत्यादिप्रतीतेरुपपत्तेरित्यर्थः। तत्समूहस्य। परमाणुसमूहस्य
तत्र दृष्टांतमाह। यथेति। तत्समूहस्य। केशसमूहस्यैकत्वादेक इति प्रतीतिः। एवं संयोगविशेषस्यैव म
हत्त्वरूपतया महानिति प्रतीतिस्तथा परमाणुपुंजेष्वपीति भावः। प्रत्यक्षत्वादिति। तथा च स्वभावतोऽ
योग्यानां परमाणूनां परस्परसंयोगमात्रेण योग्यत्वं न संभवतीति भावः। दूरस्थकेशस्तु स्वभावतो ना
तीन्द्रिय इति लघुक्तदृष्टांतस्य वैषम्यमित्याह। दूरस्थकेशास्विति। तस्यैवेति। तस्य दूरस्थकेशस्य। एवमग्र
अनुपपत्तेरिति परमाणूनामनेकत्वादणुत्वाच्चेति भावः। इति वदुपपत्तेरिति। तत्र यथा धान्यसमूहस्येव

भट्टी

योगा ३ ३१

पृ८ ल२

श्रतघटघ्रा[illegible]सन्निधानपदेनान्वेति।तथाचसन्निधानतएवतस्यप्रत्यक्षत्वादित्यर्थः।तथाचद्दरत्वस्यप्रतिबंध
कत्वात्तद्दशायांमप्रत्यक्षमात्रंतस्यननुस्वाभाविकमप्रत्यक्षत्वमितिभावः।उत्पन्नत्वादिति।क्षणभंगवादिनांते
षांमतेपरमाणूनामुत्पत्तिस्वीकारादितिभावः।अन्यथार्हदस्यस्यदृश्योपाद[illegible]त्वेतत्तादृशाररहनोत्पत्तिस्थलेतदंतः
पातिभिः।अनित्यत्वेनांतःपातिभिः स्वभावात्।कारणानैरपेक्ष्यात्।उद्भूतरूपादीति।आदिनाग्राह्यादिपरिग्रहः।
दतभावेमहत्वोद्भूतरूपाद्यभावे।तदभावादिति।महत्वाभावादित्यर्थः।अत्रनास्तिकमतानुयायिनः।परस्य
रविभक्तपरमाणूनांमहत्वाभावादप्रत्यक्षत्वेपिपरस्परसंयुक्तानांपुंजात्मनांतेषांप्रत्यक्षेबाधकाभावः।नच
महत्वाभावएवबाधकः।परस्परविलक्षणसंयोगस्यैवमहत्वरूपस्यप्रत्यक्षजनकत्वात्।नचपरमाणूनांनिरस
त्वात्घटादावुत्पत्तिनाशयोःप्रतीत्यनुपपत्तिरितिवाच्यं।तन्मतेपदार्थमात्रस्यैवक्षणिकतयापरमाणूनामुत्प
त्तिनाशयोःस्वीकारात्।नचपरमाणुपुंजेषुघटत्वांगीकारेकपालात्घटइतिप्रतीत्यनुपपत्तिःपरमाणूनां
कपालजन्यत्वाभावादितिवाच्यं।तन्मतेकपालस्यापिपरमाणुपुंजतयाघटरूपपुंजेषुकपालरूपपुंजजन्यत्व
स्वीकारात्।पुंजात्मकोत्पत्तिरितितेषांसिद्धांतादित्याहुस्तन्न।घटइत्यादिप्रतीतिविषयतयाऽनेकपरमाणु
पुंजकल्पनेगौरवात्लाघवादतिरिक्तावयविसिद्धेरितिदिक्।मेरुसर्षपयोरपीति।अपिशब्दःसाम्यप्रसंगइत्युत्तरं
संबध्यते।तेनचत्र्यणुकस्यसावयवारब्धत्वेमहत्वापत्तिःसमुच्चीयते।साम्यंपरिमाणतारतम्याभावः।परिमाण
कारणीभूतायाअवयवसंख्यायाःउभयत्रसाम्यादितिभावः।नचमेरौयैवानांसर्षपतुल्य

ल६ पं६ रूप५ व१

62

सर्षपावयवानां   चाक्षुषद्रव्यत्वादिति ६

परिमाणवत्त्वं ननु सर्षपतुल्यपरिमाणवत्त्वमित्यवयवपरिमाणविशेषाद्विशेष इति वाच्यं। मेरुसर्षपावयवसर्षपावयवयोरप्यनंतावयवत्वेन तत्परिमाणतारतम्याभावस्यापाद्यापादनीयत्वात्। न च मेरुसर्षपयोरवयवगतप्रचयाख्यसंयोगविशेषात्तद्विशेष इति वाच्यं। प्रचयविशेषस्यापि संख्याविशेषनियम्यत्वेन संख्याविशेषाभावे तद्विशेषानुपपत्तेरिति। ननु तथापि विश्रामाश्रयस्यानित्यत्वे मानाभाव इत्यत आह। यत्रक्वचिदिति। असमवेतकार्योत्पत्तिप्रसंग इति। असमवेतभावकार्योत्पत्तिप्रसंग इत्यर्थः। ननु तस्यानित्यत्वसिद्धावपि अणुत्वे किं मानमित्यत आह। महत्परिमाणेति। आत्मनि व्यभिचारवारणाय चाक्षुषपदं। घटाभावे व्यभिचारवारणाय द्रव्यपदं। तदवयवसिद्धाविति। त्रसरेण्ववयवसिद्धावित्यर्थः। तदसिद्धेरिति। अवयवधारायाः असिद्धेरित्यर्थः। अत्र नव्याः। त्रसरेणोरवयवाः सावयवा इत्याद्यनुमानयो रूपयोरप्रयोजकत्वेन त्रुटावेव विश्रामः। न च चाक्षुषप्रतिमहत्त्वं कारणं। तथा च त्रुटौ महत्त्वमावश्यकं। तच्चावयवसंख्याजन्यमित्यवयवं विना नोपपद्यत इत्यनुकूलतर्कसत्त्वान्नाप्रयोजकत्वं द्व्यणुकसाधकानुमानस्येति वाच्यं। त्रसरेणुमहत्त्वस्य नित्यत्वस्वीकारेणोक्ततर्कानवतारात्। न चाणुव्यवहारस्याणुपरिमाणनिबंधनत्वात्तदाश्रयद्रव्यसिद्धिरावश्यकीति वाच्यं। तस्यापकृष्टपरिमाणनिबंधनत्वात्। महत्यपि महत्तमादणुव्यवहारात्। न चैवं त्रसरेणुपुंज एवास्त्ववयवीति वाच्यं। विरलकलितेष्वपि तेषु घट इत्यादिप्रत्ययप्रसंगात्। न च तत्संयोगरूपैव घटत्वं घटो द्रव्यमित्यादिप्रतीतौ च परंपरया तद्भानमिति वाच्यं। संभवति साक्षात्संबंधविषयत्वे परंपरासंबंधविषयत्वकल्पने गौरवादित्याहुः। ननु परमाणुत्रयेण कुतो न द्रव्यांतरोत्पत्तिः। परमाणुद्वयेन द्व्यणुकवदेवं त्र्यणुक

३२

तद्विधमयोनिजं। ६

द्वयेन द्रव्यांतरोत्पत्तौ पंक्तिस्त्रिर्द्व्यणुके त्र्यणुकवदिति चेन्न। प्रमाणाभावेन तादृशद्रव्यासिद्धेः परमाणुत्रये
द्व्यणुकद्वयेन द्रव्यारंभकसंयोगाकल्पनात्। अत्रेदं चिंत्यं। त्रिभिः परमाणुभिरेव त्र्यणुकमस्तु परमाणुभ्यामना
रंभस्तु सिद्धांतिनां द्व्यणुकाभ्यामनारंभ इव मानाभावात्। फलबलेन त्रयाणामेव युगपद्द्रव्यारंभकसंयोग
कल्पनात्। वस्तुतो गवाक्षरंध्रे दृश्यमानानां द्व्यणुकत्वमेव युक्तमणुद्व्यारब्धत्वे लाघवादिति। तलस्थस्य दे
हमिंद्रियं विषयस्तथैवास्य त्रैविध्ये हेतुपरत्वेन व्यपयितुमर्थमाह। साक्षाद्यरूपेति। योनिजं शुक्रशोणितपरस्प
रमेलनजन्यं जरायुजमिति। गर्भवेष्टनचर्मपुटकं जरायुः। मानुषादीनामित्यादिना पशुमृगाणां परिग्रहः। स
र्पादीनामित्यादिना विहगपरिग्रहः। स्वेदजमुदाहरति। कृमिदंशाद्या इति। तच्छरीराणामुत्पत्तेरधर्मविशेष
सहितेभ्योऽणुभ्य एव स्वीकारादिति भावः। उद्भिज्जमित्यादिना देवादिशरीरपरिग्रहः। तच्छरीराणामुत्पत्ते
र्धर्मविशेषसहितेभ्योऽणुभ्य एव स्वीकारादिति भावः। तेषामयोनिजत्वे चागम एव ब्रह्मणो मानसा मन्वादयः ९
पुत्रा इत्यादि प्रमाणं। योनिं विना न शरीरमित्येवं विधागमेत्र योनिपदं कारणमात्रपरं। शरीरपदं वा मनु
ष्यदेहपरं। गंधादीत्यादिना भुक्तेतररूपपरिग्रहः। क्लेदः क्षरणं। स्वेद इति यावत्। ऊष्मा पाकः। औष्ण्यमिति या
वत्। तच्छरीरसंबंधेन पुष्पादौ रूपादिपरावृत्त्यानुमीयते। अनुष्ठानं तदनुसन्तेः। व्यूहः क्रिया। अवकाशो मुखा
दावन्नादिगतसप्रतिबंधः। ननु तर्हि शरीरे पांचभौतिकत्वव्यवहारः कथमत आह। तेनेति। शरीरस्य पार्थिवत्वसा

क्लेदो भादौ रादिना व्यूहावकाशपरिग्रहः ३

गर्भाशयवेष्टना
पुः इत्यादिस्त
६।-६

कथं-

64

घनेनेत्यर्थः। एवंच शरीरे पांचभौतिकत्वव्यवहारो न पंचभूतोपादानकत्वनिबंधनः किंतु पंचभूतअन्यतमनि
बंधनस्तन्मात्र्यैकैकस्योपादानत्वं चतुर्णां निमित्तत्वं विवेकः। किंतु चेदेति। चेष्टात्वं जातिविशेषश्चेदेतच्छरीरप्र
त्यक्षसिद्धः। नच शरीरत्वमेव पृथिवीत्वादिव्याप्या जातिश्चेष्टात्वं च तत्र्यात्वमिति वाच्यं। पृथिवीत्वादि
नासंकरेण पृथिवीत्वादिव्याप्यानेकशरीरत्वकल्पने गौरवात्। अध्यात्मिकेति। अध्यात्मिकवायुः प्राणा
ख्यः शंकते। तत्रैवेति। भग्नक्षतेति। भग्नक्षतयोर्विभागविशेषविश्लिष्टावयवयोः संरोहणं। आदिनावृ
द्धिसंग्रहः। वृद्धिश्चावयवोपचयः। तदुन्नयनादिति। आध्यात्मिकवायुसंबंधानुमितेः। ननु भग्नक्षतसं
रोहणादिहेतुवायोः प्राणत्वे मानाभाव इति चेन्नर्मदातीरसंजाताः सरलार्जुनपादपाः। नर्मदातोयसं
स्पर्शात्ते यांति परमां गतिं। गुरुं हुंकृत्य तुंकृत्य विप्रं निर्जित्य वादतः। स्मशाने जायते वृक्षः कंकगृध्रोपसेवि
तः इत्यागमस्यैव तत्र मानत्वात्। अंत्यावयवित्वेनेति। द्रव्यानारंभकद्रव्यत्वेनेत्यर्थः। मृतशरीरे चेष्टाया अ
भावेनाव्याप्तिरत आह। अथवेति। घटत्वमादाय घटे अतिव्याप्तिवारणाय चेष्टावदिति। हस्तादावतिव्याप्ति
वारणायांत्यावयवीति। नच हस्तत्वादिकं न जातिः पृथिवीत्वादिना संकरादिति वाच्यं। पृथिवीत्वादिव्याप्य
नानाहस्तत्वांगीकारात्। पृथिवीत्वरूपताहृशजातिमति घटादावतिव्याप्तेर्लक्षणांतरमाह। अंत्यावयवीति।
अंत्यावयविमात्रवृत्तीत्यनेन द्रव्यत्वजातिर्व्युदासः। चेष्टावद्वृत्तीत्यनेन घटत्वादिर्व्युदासः। चेष्टावद्वहिताहित

प्राप्तिपरिहारार्थं क्रियाग्रहणं। न तु स्पंदनमात्रं। घटादावपि सत्त्वात्। ननु देवत्वादिरूपजातिमादाय लक्षणस
मन्वय इत्यत आह। जलीयेति। देवत्वस्यापीति अपिना नृसिंहत्वपरिग्रहः। जातित्वाभावादिति। जातिसांक
र्यादिति भावः। जातिसांकर्यस्यादोषत्वे देवत्वशरीरत्वादेर्नानाजातित्वांगीकारे वा देवत्वशरीरत्वजातिमादा
ये च लक्षणसमन्वय इति ध्येयं। रूपादिमध्य इति। रसगंधस्पर्शा आदिपदार्थाः। न च शरावगंधकजले
मनसि च व्यभिचारवारणाय चकारः। तद्दानेन च सक्तुरसस्याप्यभिव्यंजकत्वान्न दोषः। घ्राणेंद्रियगंधस्याभि
व्यंजकत्वादेरप्रसिद्धिवारणाय हेतौ मध्यांतेति। न चाप्रसिद्धिवारकं विशेषणं मिलितं निरर्थकमिति वाच्यं। व्य
भिचारज्ञाने इव हेत्वप्रसिद्धावपि व्याप्तिज्ञानाभावेन व्याप्तिग्रहोपयिकाप्रसिद्धिवारकविशेषणोपादानस्य
सर्वसिद्धत्वात्। तदर्थत्वात्। हेतुवाक्यघटकमध्यांतपदसमभिव्याहृतैवकारार्थत्वात्। तथा च दृष्टांते स्वीयरू
पादिव्यंजकघटादावप्रसिद्धिवारणाय परकीयत्वं रूपादौ विशेषणं देयमिति भावः। तस्येति। न च शरावगंधव्यं
जकजलत्वस्यासत्त्वं। न च न च शरावगंधव्यंजकजलेन येन सक्तुरसो नाभिव्यंजितस्तत्र जलविशेषेऽनैकांतिरिति   नै४
वाच्यं। परकीयरूपादिविषयकसाक्षात्कारस्य रूपयोग्यत्वस्य विवक्षितत्वात्। न च शरावगंधव्यंजकजलेपि र
सव्यंजकतावच्छेदकजलत्वस्य सत्त्वादिति। परकीयेति विशेषणाप्रवेशेन लाघवादाह। यद्वेति। तद्दाने हेतुमाह।
गोरपनीतेति। इदमत्रबोध्यं। रूपाद्यव्यंजकत्वे सति यस्य हेतुत्वं येतासर्यं। शब्दाद्यव्यंजकत्वे सति गंधव्यंजक

साधारण१ व्यंजकजले२ तु१

मु॰ ३४

त्वस्य नवशरावगंधव्यंजकोदके व्यभिचारेण न ग्रंथकर्तुरसाम्यभावात्। तत्र हेतुरूपरसस्पर्शानां परकीयत्वं
विशेषणं। नन्वप्रथमे हेतौ नवशरावगंधे व्यभिचारः। लुप्ताक्षरमपि नीलरूपव्यंजकत्वात्। न च तृतीये हेतौ तत्र व्य
भिचारः। एतदस्य रसेनापि यद्वर्तिरूपोत्तरप्रणयनात्। तत्रापि परकीयत्वविशेषणाद् घटितं हेतुत्रयमिति। तत्र
घ्राणेंद्रियसंनिकर्षे। इंद्रियत्वं न जातिः तेजस्त्वादिना संकरात्। किंतु शब्देतर[illegible]दिना वक्ष्यमाणं बोध्यं। ननु वि
षयत्वं न जातिः सामान्यादेरसत्वात्तत्राह लक्षणमाह उपभोगेति। यद्यपि साक्षाद्भोगसाधनत्वं घणुकेऽव्याप्तं सा
क्षात्परंपरासाधारणं तत्साधनत्वं च रमाणावपीति द्व्यणुकादिप्रसक्तोऽतिप्रसंगमिति ग्रंथविरोधस्तथापि साक्षात्परंप
रा भोगसाधनत्वं विवक्षितं। परमाणुरपि विषय एव। कार्यरूपपृथिव्या एवं त्रिप्रकारेण विभज्जना कार्यरूपपृथि
वी विषय एव द्व्यणुकेत्यादिना प्रदर्शितं इति न ग्रंथविरोधः। अत एवोक्तं तदुपभोगं साक्षात्परंपरया जनयेत्
वा कार्यजातमित्यत्र जातपदं संगतानामपि तं। अदृष्टाधीनमिति। अत्र च कार्यमात्रं प्रत्यदृष्टस्य हेतुता न समवा
यसंबंधेन। घटाद्यधिकरणकपालादौ समवायेन तदभावाद्व्यभिचारात्। यत्तु। स्वसमवायिसं[illegible]योगेन अ
दृष्टं कार्यमात्रे हेतुरिति। तन्न। शब्दरूपकार्याधिकरणे गगने अदृष्टसमवाय्यात्मसंयोगाभावेन व्यभिचारात्।
परं तु स्वसमवायिसंयुक्तसंयोगेन तस्य हेतुता बोध्या। इदं तु बोध्यं। अदृष्टस्य कार्यमात्रं प्रति हेतुता न साक्षा
त्। न हि सामग्रीसमवधाने अदृष्टविलंबेन कार्यविलंबो दृश्यते येन तत्साक्षाद्धेतुः स्यात् परं तु सामग्रीसंपादकतया
प्रायः परंपरयैव तदुपयोगः। क्वचित्तु मेघसंचारादौ साक्षादेव तद्धेतुरन्यथा सामग्रीसंपादकस्यैवानुपपत्तेरिति

रि॰ ह्ते४ दाव५ ३४

एतदर्थमेव साक्षात्परंपरासाधारणजन्यत्वबोधकमधीनपदमुपात्तं। यददृष्टाधीनं। यत्स्वरूपीयादृष्टाधीनं त
त्। तत्कार्यमित्यर्थः। तदुपभोगसाधनं तत्पुरुषस्योपभोगसाधनं। तेन द्व्यणुकादिकार्यस्य तत्तत्पुरुषोपभोगसा
धनत्वेन। नन्वेवं सर्वं सर्वस्यैव विषयत्वेन शरीरेंद्रियविषयभेदेन पृथिव्यास्त्रैविध्यं न सिध्येदत आह
शरीरेंद्रिययोरिति॥ ॥इति पृथिवीग्रंथः॥ ॥जलत्वजातौ प्रमाणमाह। स्नेहेति। कारणतावच्छेदकतया
धर्मसिद्धौ बाधकाभावात्तस्य च जातित्वमिति भावः। नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वाभावेन स्नेहत्वस्य
कार्यतावच्छेदकत्वं न संभवतीति शंकते यद्यपीति। तथा। कार्यतावच्छेदकं। वस्तुतस्तु। नित्यसाधारणधर्म
स्य कार्यतावच्छेदकत्वे दोषाभावात् जन्यपदं न देयमेव। ननु यथारण्यस्थदंडादौ फलानुपधायके कारणताव
च्छेदकतया दंडत्वादिकं जातिस्तथा नापि भविष्यतीत्यत आह। तस्येति। दंडादेः स्वरूपयोग्यतायां न क्वापि क्षतिः।
तस्या नित्यत्वेन फलोपधायकत्वाभावादिति भावः। जन्यजलत्वजातेः। जन्यजलमात्रवृत्तिजातेः। तदवच्छि
न्नेति। जन्यजलत्वजात्यवच्छिन्नेत्यर्थः। न चैवं जलीयावयविनि जलत्वं न स्यादिति वाच्यं। जलस्य सावय
वानुपगमात्। ननु जलत्वावच्छिन्नं प्रति समवायसंबंधेन स्नेहस्यैव कारणत्वमस्त्वतिरिक्तजातिकल्पनापे
क्षया लाघवादिति चेन्न। जलत्वावच्छिन्नं प्रति स्नेहत्वेन वा कारणत्वं शीतस्पर्शेन वेत्यत्र विनिगमनाविर
हादतिरिक्तजातिसिद्धेः। क्लृप्तमादाय कल्पनेन विनिगमनाविरहाभावादिति। ननु घृतादिकं प्रत्यार्द्रेंध
नादेः कारणत्वे निर्णीयादं। आर्द्रत्वं च जलसंयुक्तत्वं। तथा च जलसंयुक्तेंधनत्वेनेंधनसंयुक्तजलत्वेन वा का

नौ॰

मु.
२५

वा: व्य

रणत्वेस्यचविनिगमनाविरहाज्जलत्वेधनयोः पार्थस्येन कारणतावछेदकतयाजलत्वजातिसिद्धिरित्याहुः।
परंतु। स्नेहजलत्वंतिप्रत्यक्षसिद्धजलत्वरूपजात्यवच्छिन्नसमवायिकारणतावछेदकतया परमाणुसा
धारणजातिसिद्धिः। कार्यतावछेदककारणतावछेदकयोरैक्यस्यभौतिन्त्रियसाधारणधर्मस्य कार्यता
वछेदकत्वेदोषाभावाच्चेत्याहुः। नस्थितिः। पृथिव्यादावतिव्याप्तेरितिशेषः। शुक्लरूपस्यलक्षणत्वेपिनय
तिरित्यभिप्रेत्याह। अथवेति। द्रव्यत्वव्याप्यवायुत्वरूपजातिमादायवायावतिप्रसंगात्। रूपवत्तीति। यथा
चवायुत्वंजातिस्तथाग्रेवक्ष्यते। पृथिवीत्वादिजातिमादायपृथिव्यादावतिप्रसंगवारणायनैमित्तिकद्र
वत्ववदन्तीति। साक्षादितिपटत्वादिवारणाय। द्रव्यत्वसाक्षाद्व्याप्यत्वंचद्रव्यत्वव्याप्यत्वमात्रंनतुद्रव्यत्व
(७) व्याप्यस्यापितत्वांतर्भावः। रूपवद्वृत्तित्वविशेषणेनैवरूपत्वादीनांवारणायतन्निवेशप्रयोजनाभावात्।
यद्यप्येवंस्येप्सितिद्रव्यत्वस्येवरूपस्थानेप्रवेशोयुक्तः तेनापिवायुत्वादेर्वारणात्। एवंचद्रव्यत्वनि
त्त्याभावादेवघटत्वादीनांवारणसंभवेद्रव्यत्वसाक्षाद्व्याप्यत्वमपिनदेयमितिलाघवंतथापि मूलेवर्णैः
शुक्लत्वादिनारूपघटितलक्षणस्यैवोक्तत्वात्तद्घटितलक्षणपरिष्कारे मूलविरोधःस्यादितितथान
स्तमितिध्येयं। कर्तृत्वजात्यनभ्युपगमेनचेदंतेनजलत्वस्यद्रव्यत्वव्याप्यत्वेपिनक्षतिः। जल
घटान्यतरत्वमादायघटादावतिव्याप्तिवारणायजातीति। कश्चित्तु शुक्लरूपवद्वृत्तीतिपाठस्तत्रशुक्लपदंरू
पपदंवासंपातायातं। एवमेवचव्यावृत्तिरभास्वरशुक्लेतररूपस्यत्ररूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यपदयोर्बोध्या।

१८
२ मु
व्याप्या
सं २
२५

तत्कारणाय २ तिकाद्दत्तीति तेजस्त्वादिजातिमादाय तेजआदावतिव्याप्तिमादाय ४

पृथिवीत्वमादाय पृथिव्यामतिव्याप्तिवारणाय भास्वर शुक्लेतर रूपासमानाधिकरणेति। जलत्वस्य शुक्लरूपसमानाधि करणत्वादसंभव इति शुक्लेतरेति। तेजस्त्वमादाय तेजस्यतिव्याप्तिवारणाय भास्वरेति। शीतस्पर्शेवेति। यद्यपि शी तं गुणे को नात्कृ बतेवो चिता। तथापि विशेष्य स्पर्शशब्दस्य पुल्लिंगत्वात् पुल्लिंगतया दर्शनेन शः। शुक्लं रूपमित्यादो शुक्लपदस्य क्लीबतयैवेति। द्रव्यत्वव्याप्यायां पृथिवीत्व रूपजातिस्तामादाय पृथिव्यामतिव्याप्तिवारणार्थं म धुरवृत्तीति। शेषं दर्शितदिशावसेयं। ननु जलेनीलरूपाभावे कथं नीलप्रतीतिरत आह कालिंदी॥ स्वसम वायिसंयोगसंबंधेन उपष्टंभक पार्थिवभागगत नीलरूपप्रतीतिः कालिंदीजले आरोपितेति भावः। अतएवेति उ पदर्शितसंबंधस्य जलं नीलमिति प्रतीतिनियामकत्वादेवेत्यर्थः। वियतीति। तदोपदर्शितसंबंधघटक संयोग स्य नाशादिति भावः। तत्रैव जले। तस्य। माधुर्यस्य। अन्यथा। आश्रयोपाधिकत्वाभावे। व्यंजकत्वादित्युत्तरं। हरीतकी भक्षणोत्तरं प्रत्यक्षेण माधुर्योपलंभादिति स्फुरणार्थं। कल्पनागौरवादिति। अवयवरसाजन्यस्य पृथिवीरसस्या ग्निसंयोगसाध्यत्वदर्शनादेतदनुरोधमात्रेण जलसंयोगस्यापि पृथिवीरसोत्पादकत्वस्वीकारे अतिरिक्त कार्य कारणभावस्य हरीतक्यां मधुररसस्य च कल्पने गौरवादिति भावः। ननु च सत्त्व जले मधुरो रसः। तथापि जंबीरजला दौ प्रत्यक्षसिद्धस्याम्लरसस्यापि स्वीकारे बाधकाभाव इत्यत आह। पृथिवीत्वस्येति। अम्ला क्षि जनकतावच्छेद कत्वादिति। यद्यपि पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्ववन्मधुरजनकतावच्छेदकत्वमप्यस्तीति तुल्यं। त थापि हरीतकी भक्षणोत्तरं जलेपि मधुरोपलब्धेस्तत्र मधुरस्वीकारस्यावश्यकत्वात् जलेनापि मधुरं प्रतिहेतुत्वं

प्यत इति भावः। ननु जंबीररसलिलादावम्लरसस्य जलत्वेनाम्लादिरसेपि तुल्यत्वे हेतुत्वं स्यादत आह। जंबीर
रसादाविति। स्वमयाग्निसंयोगेन जंबीरगताम्लादिरसप्रतीतिस्तत्र जलद्रव्ये। शुद्धे पि जंबीरेऽम्लप्रतीति
स्तत्राम्लरसावस्यकत्वे तस्यैव तत्र तज्जले परंपरया प्रतीतिः। हरीतक्यां तु मधुररसस्याभावान्न हरीतकीगतमाधु
र्यस्य जले प्रतीतिरिति भावः। कर्कटीभक्षणोत्तरं जलपाने तिक्तरसस्यानुभवात्तिक्तरसो जले स्यादिति तु न जलपानात्पूर्व
मपि कर्कट्यां तिक्तरसोपलब्धेः कर्कटीभक्षणेन रसनायवर्तितिक्षोभे तदा यतिक्तोपलब्धेर्वैधकसिद्धत्वाच्च। वस्तुतो निर्द
घपात निर्मलगंगाजले माधुर्यस्यानुभवसिद्धस्यापलापासंभवान्मधुर एवेत्युक्तं। एतेन हरीतक्यादौ न जलसंयोगेन माधु
र्यमुत्पद्यते येन कल्पनागौरवं। परं तु हरीतक्यां कषायवन्मधुररसोपि स्वीक्रियते तद्व्यंजकश्च जलसंयोगः। ननु तत्र रसां
तरस्य फलबलात्। यदि च चित्ररूपवच्चित्ररसे मानाभावाद्गुणविरोधेन नीरसैव हरीतकी रसस्य प्रतीतिस्तु अ
वयववृत्तरसस्यासरंपरया सुच्यते। तदा स्वजलसंयोगाद्धरीतक्यवयवगतमाधुर्यस्यैव व्यंजकत्वमुपासं। जलस्य जा
तावनुमानोतरं प्रमाणमाह। एवमिति। ननु जलत्वाभावे घृतस्य चंदनादौ शैत्योपलंभेपि चारेण कथं जलत्वेन तत्र हेतु
त्वमत आह। घृत इति। पूर्वं शीतस्पर्शो दृष्टः तं साधयति तेजःसंयोगादिति। तत्र। जल इति। विवेचयति। अतिचपास
संभवमुपरिष्टात्। घृतादावित्यादिपदेन तैलादिपरिग्रहः। जलस्यैव स्नेह इत्यनेनेतरस्याश्रयसंयोगेन प्रतीयत इति शेषः।
तेन घृतादौ समवायेन स्नेहनिरासेन। जल एवेति। स्नेहस्यावांतरविशेषाभावात्स्नेहोत्कर्षनितं तदवच्छिन्नजन
कतावच्छेदकं जलत्वमिति भावः। अथैवं रीत्या परमाणुव्यावृत्तौ अणुकं जलत्वमेकं परमाणुसाधारणं द्वितीयमिति ज
लत्वयोर्भेदप्रसंगमत आह। कुत इति वेसमनियतयोग्यव्यक्तिवृत्तित्वादिति। एवमग्रेपि। तेज आदावित्यादिपदेन क्षीरपरिग्र

तदवच्छिन्नजनकतावच्छेदकं तदेव। जन्यजलत्वमेव।

मु। २६ पृ५ स

१९ ग न्य ६ मा २ ३६

हो ननु घृतस्य तत्र नैमित्तिकद्रवत्वस्य स्वसमवायेनैव सत्त्वात् । द्रवत्वमित्यनंतरं स्वाश्रयसंयोगेन प्रतीयत इति शेषः । ननु तै
ले जलसत्त्वे तैलस्य दहनानुकूल्यं न स्यात् । जलस्य दहनप्रतिकूलत्वात् अत आह । स्नेहप्रकर्षेणेति । प्रकृष्टस्नेहस्य जल
स्य दहनानुकूल्यमेव । अप्रकृष्टस्नेहस्यैव तस्य दहनप्रतिकूलत्वादिति भावः । इति वक्ष्यते इति । स्नेहनिरूपणाव
सर इति शेषः । प्रथमवदिति । षष्ठी समर्थो वदिति रिसमभिप्रायेणाह । रुधिव्याद्यवेत्यर्थ इति । एवमग्रेपि । जलीयं शरी
रमिति । तत्र पार्थिवावयवैरुपष्टब्धं बोध्यं । तेन जलमात्रे हस्तपादादिव्यवस्थाया असंभवेपि न क्षतिः । ननु तादृश
शरीरे मानाभावो ऽनुपलंभादित्यत आह । वरुणलोक इति । तत्र श्रुतिरेव प्रमाणमिति भावः । गंधेति । रसव्यं
जके मनसि व्यभिचारवारणाय गंधाव्यंजकत्वं इति । कासारः सरः । करकादित्यादिपदात् कूपादिपरिग्रहः । ग्र
हिणत्वादिति । कठिनीस्पर्शकत्वादित्यर्थः । विलीनस्य तस्येति । सप्तम्यर्थे षष्ठी । क्वचिद्विलीनयोस्तयोरिति पाठः । स
दुत्तरं । विलीनतायाः द्रवत्वरूपायाः जलत्वव्यंजकत्वादिति भावः । ननु विलीनता नैमित्तिकं द्रवत्वमेव । तदुक्त
लक्षणेनेति । तथा च न जलत्वव्यंजकं । यदि च विलीनैतस्मिन्नवसरे सत्यर्थस्तदापि करकादिनाशोत्तरं द्व्यणुकान्तरोत्पादा
त्तत्रैव द्रवत्वजलत्वयोः प्रत्यक्षं न करकायां न स्यादत आह । यद्द्रव्यमिति । तथा च करकादिनाशोत्पन्नद्व्यणुकान्तरे
जलत्वस्य प्रत्यक्षसिद्धत्वात् उक्तव्याप्त्या करकादिषु द्रवत्वसिद्धिरिति भावः । ननु हिमकरकयोः पार्थिवत्वाभावे कथं का
ठिन्यप्रत्यय इत्यत आह । अदृष्टविशेषेणेति ॥ ॥ इति जलग्रंथः ॥ इत्थं चेति । उष्णस्पर्शजातिसिद्धौ चेत्यर्थः । ननु कथं तर्हि ज
न्योष्णस्पर्शसमवायिकारणभिन्नेषु परमाणुषु तेजस्त्वजातिसिद्धिरित्यत आह । तस्येति । तेजस्त्वस्येत्यर्थः । जलत्वस्य

जलत्वे

तस्मिन्नितस्य

वेति। यथा जलजन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलपरमाणौ जलत्वजातिसिद्धिस्तथा जन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकतया तेजःपरमाणावपि तेजस्त्वरूपजातिसिद्धिरित्यर्थः। उद्भूतरूपलक्षणं। समवायेनैमित्तिकत्वावच्छिन्नं प्रति समवायेन तेजःसंयोगत्वेन हेतुत्वात्तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यं। चंद्रकिरणादावित्यादिना चंद्रकिरणादेः संग्रहः। तत्रापि चंद्रकिरणादावपि। ननु तत्रोष्णप्रतीतिः कुतो नेत्यत आह। किं त्विति। तदंतःपातिजलस्पर्शेनेति। चंद्रकिरणांतर्गतजलभागशीतस्पर्शेनेत्यर्थः। ननु चक्षुरादिनिष्ठस्योष्णस्पर्शस्य केनाप्यनभिभूतत्वात्प्रत्यक्षापत्तिरत आह। चक्षुरादौ चेति। मरकतकिरणादावित्यादिना सुवर्णस्य परिग्रहः। स्यादूपं शुक्लं भास्वरमिति मूले तत्र शुक्लेति स्वरूपकथनं भास्वररूपमात्रस्य लक्षणत्वे ऽतिप्रसंगाभावात्। भास्वरत्वं जातिविशेषः स च तेजोरूपमात्रवृत्तिः शुक्लत्वव्याप्यश्चेति। ननु रूपाविषयकद्रव्यप्रत्यक्षस्याभावात् वैश्वानरादेश्चाक्षुषत्वानापत्तिरिति शंकते तद्रूपाग्रह इति। वैश्वानरादेरचाक्षुषत्वे तद्गतसंख्यादिगुणानामपि चाक्षुषत्वं न स्यात्। योग्यमात्रवृत्तित्वाभावादित्यपि नास्त्वचितं। अन्यदीयरूपेणेति। पार्थिवरूपेणेत्यर्थः। मतांतरमाह। वस्तुस्त्विति। सुवर्णादिरूपे तेजस्त्वसत्वादिति। तेन नासंभव इति भावः। पृथिव्यवृत्तीति। नैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वरूपजातिमादाय पृथिव्यादावतिव्याप्तिवारणाय पृथिव्यवृत्तीति। पृथिव्यवृत्ति वायुत्वादिमादाय वाय्वादावतिव्याप्तिवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति। वायुतेजोन्यतरत्वमादाय वायावतिव्याप्तिवारणाय जातीति। परकीयस्पर्शादीति गंधाव्यंजकत्वादिघटितहेत्वंतरसूचनायादिपदेन गंधादिपरिग्रहः। चक्षुषः परकीयरूपादिव्यंजकत्वादसिद्धिवारणाय स्पर्शेपदं। इतरे त्विदाहुः। चक्षुर्विषयासंबद्ध

निवर्तकं । यदि प्राप्यकारी स्यात्तदा रसनादिवदधिष्ठानसंबद्धं गृह्णीयात् । न चैवं गोलकासंबद्धग्रहणात् । किं च यदि चक्षुः प्रा
प्य गृह्णीयात् स्वतोऽधिकपरिमाणं न गृह्णीयात् । न खलु नखरञ्जनिका परशुच्छेद्यं छिनत्ति । शाखाचन्द्रमसोस्तुल्यकालग्र
णानुपपत्तिश्च । गतिक्रमेण प्राप्यग्रहणे क्रमेण ग्रहणं स्यात् । न तु तुल्यकालमुपलम्भः । अनुभवति तु उन्मीलन्नेव नयने शाखां
शीतमयूखं च । एवं च प्राप्यकारित्वानुरोधेन गोलकातिरिक्तं चक्षुः परैरङ्गीक्रियते । गोलकस्य चन्द्रादिप्राप्त्यसंभवात् । अप्रा
प्यकारित्वे गोलकमेव चक्षुस्तच्च न तैजसमिति तदसत् । अधिष्ठानासंबद्धार्थग्राहिण्याः प्रदीपप्रभाया इव चक्षुषोऽपि प्राप्यका
रित्वसंभवात् । पृथुतरग्रहणस्य च गोलकनिर्गतस्य महतश्चक्षुषः पृथ्वग्रत्वेन प्रदीपप्रभाया इवोपपत्तेः स्वाधिकपरिमाणग्र
ग्राहिणा लिङ्गेन्द्रियेण व्यभिचारात् तादृशनियमाभावाच्च तुल्यकालग्रहणं चासिद्धमेव । तदभिमानस्य कालसन्निकर्षे
णैवोपपत्तेः । अर्चिषोऽपि तेजसो लाघवातिशयेन वेगातिशयात् प्राचीनाचलचूडावलम्बिन्येव भगवति मरीचिमालि
निभवनोदरे आलोक इत्यभिमानो लौकिकानां । यथाहुः शाब्दिकाचार्याः । चक्षुर्बाह्यालोकाभ्यामारब्धेन चक्षुषा तावद
र्थसंसृष्टेन सुगमत्वात्तदर्थग्रहणमिति शाखाचन्द्रमसोस्तुल्यकालग्रहणमुपपद्यत एवेति । तन्न शोभनं । चक्षुर्बाह्यालो
काभ्यामारब्धस्य चक्षुषः पृष्ठभागेऽपि सत्त्वात् पृष्ठभागस्थितपदार्थग्रहणापत्तेः । पृष्ठदेशस्थबाह्यालोकैश्चक्षुरुत्पादे
मानाभाव इति चेदग्रदेशस्थबाह्यालोकैरपि तदुत्पादे मानाभावः । तदनभ्युपगमेऽपि चाक्षुषोपपादस्यानुपदमुक्तत्वा
दिति । लाघवादाह । अथ वेति । तैजसत्वे किं मानमिति । सुवर्णं पार्थिवं नैमित्तिकद्रवत्वादित्यनुमानस्य पार्थिवत्वसा
धकस्यैव सत्त्वादित्याशयः । समाधत्ते नेति । सुवर्णमिति । न चात्र पीतरूपवद्द्रव्यालक्तस्य सुवर्णस्य पक्षत्वे बाधः । तैजससु
वर्णस्य चानुमानात्तैजसत्वसिद्ध्या पक्षाप्रसिद्धिः । धर्मशास्त्रे पीतिमद्द्रव्येऽपि सुवर्णपदप्रयोगेन तस्यापि सुवर्णपदवाच्यतया

नो३ ५१) ५८ न४

धः ने२

सुवर्णपदवाच्यत्वस्य पक्षतावच्छेदकत्वेपि बाधतादवस्थ्यादिति वाच्यं। असंतानलसंयोगानुच्छेद्यद्रवत्वाधिकरणत्वस्यैव पक्षतावच्छेदकत्वात्। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेन च पक्षतावच्छेदकहेतुभेदप्रयुक्तस्य सामानाधिकरण्येन सिद्धसाधनस्याऽदोषत्वात्। असति प्रतिबंधक इति। जलमध्ये क्वथ्यमानघृतादौ व्यभिचारवारणाय सति प्रतिबंधक इति। अग्निसंयोगानाश्यद्रवत्ववति घृतादौ व्यभिचारवारणाय संयोग इत्युक्तं। तादृशद्रवत्वस्य समानाधिकरणाग्निसंयोगासमानकालीनत्वान्न व्यभिचारः। अनुच्छिद्यमानद्रवत्वादित्यस्यानुच्छिद्यमानद्रवत्वाधिकरणत्वादित्यर्थो न तूच्छिद्यमानद्रवत्वानधिकरणत्वादिति गगनादौ व्यभिचारात्। पूर्वपक्षिणाशंकितामप्रयोजकतां निरस्यति। न चेति। अग्निसंयोगनाश्यत्वादिति। भूतत्वोपलक्षणं। अग्नेरपत्यं प्रथमं हिरण्यमित्यागमान्यथानुपपत्तेरप्यनुकूलतर्कसत्त्वादिति। एतेनाश्रयनाशजन्यद्रवत्वनाशे व्यभिचारवारणाय द्रवत्वे आश्रयनाशनाश्यद्रवत्वव्यावृत्तजातिविशेषकत्वमित्याविजातीयद्रवत्वनाशं प्रत्यग्निसंयोगत्वेन हेतुतावश्यं कार्या। तत्र चैजसं सुवर्णद्रवत्वव्यावृत्तमपीति दर्शितानुकूलतर्कोऽसंगतः सुवर्णस्य पृथिवीत्वेपि नाशापत्तेरसंभवादित्यपास्तं। क्षोदः चूर्णं। तस्य पीतिमगुरुत्वाश्रयस्य। प्रकारांतरेण सुवर्णस्य तैजसत्वं साधयतां मतमुपन्यस्यति। अपरे त्विसादिना। तत्प्रतिबंधकं। रूपपरावृत्तिप्रतिबंधकं। अग्निसंयोगस्य तैजसत्वपरिसत्वादुक्तं पीति मेति। साध्ये विजातीयपदमुद्देश्यसिध्यर्थं। हेतौ सत्यंतमग्निसंयोगरहिते पूर्वरूपविजातीयरूपानाधारे घटे व्यभिचारवारणाय अत्र हेतौ पृथिवीत्वं देयं। तेन जलपरमाणौ न व्यभिचारः। यथाकथंचिदग्निसंयुक्ते घटे तद्वारणाय तैलेति। न चाप्रयोजकत्वं। विरोधिद्रवद्रव्यसंबंधं विना पार्थिवाग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वादिति भावः। न च द्रवद्रव्यादन्यदेव प्रतिबंधकं वाच्यं। अदृष्टकल्पनापत्तेरिति। तस्य चेति। तस्य द्रवद्रव्यस्य। पृथिवीजलभिन्नस्येति। पृथिव्याः पक्षीकृतपीतिमाश्रयविजातीयत्वाभावात् जलस्य तत्रासंभवादिति भावः। तेजस्त्वनियमादिति। नाशादौ रूपाभावतदीयद्रवत्वस्याग्निसंयोगनाश्यतावच्छेदकत्वानाक्रांततया असंतानाग्निसंयोगस्त्वेपि

वाद्दिति भावः। न चांधकारे पीतरूपाश्रयद्रव्यग्रहापत्तिः सुवर्णरूपालोकसंयोगसत्त्वादिति वाच्यं। उद्भूतानभिभूतरू
पालोकसंयोगस्यैव द्रव्यप्रत्यक्षे हेतुत्वात् सुवर्णरूपस्य चाभिभूतत्वात्। न च तदानीं पीतरूपस्याप्यग्रहात् सजातीय
ग्रहणकृतमग्रहणं न सुवर्णरूपस्येति न तस्याभिभूतत्वमिति वाच्यं। लघुतया सजातीयसंबंधस्यैवाभिभवप
दार्थत्वात्। न च तथाप्यंधकारे सुवर्णे साक्षात्कारापत्तिः तेजोभिन्नद्रव्यप्रत्यक्षं प्रत्येवालोकसंयोगस्य हेतुत्वादि
ति वाच्यं। सुवर्णभिन्नं यत्तेजस्तद्भिन्नद्रव्यप्रत्यक्षं प्रत्येव तस्य हेतुत्वादिति। नवीनास्तु। सुवर्णं पार्थिवमेव पीतं सु
वर्णं द्रुतमिति साक्षात्संबंधेन द्रवत्वप्रतीतेर्भ्रमत्वायोगात्। द्रुतं द्रुततरमिति प्रतीतेर्द्रवत्वस्याप्यसंतोच्छेदात् पृथिवीत्व
स्य पीतरूपसमवायिकारणतावच्छेदकत्वात् रूपनाशोत्पादाल्पेन सुवर्णस्य विरोधित्वाच्च न पीतरूपनाश इति वदंति॥
॥ ॥इति तेजोग्रंथः॥ ॥वायोः प्रमाणं दर्शयितुं लक्षणे पाकजोऽनुष्णाशीतस्पर्शस्तु पवने मत इत्युक्तं तत्र पाकजादि
पदैर्नोक्रमेण व्यावृत्तिमाह। अनुष्णाशीतस्पर्श इति क्रममपाकज इतीति। यद्यपि अपाकजोऽनुष्णाशीतस्पर्शवत्त्वं धरा
दावतिव्याप्तं तथाप्यपाकजोऽनुष्णाशीतस्पर्शवत्त्वव्याप्यद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं पाकजोऽनुष्णाशीतस्पर्शवद
त्व सनुष्णाशीतस्पर्शवद्भिन्नद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थो विवक्षितः। एतेन स्पर्शस्यानुष्णाशीतत्वमथ
नेत। तज्जनकतावच्छेदकमिति। तथा च विजातीयस्पर्शजनकतावच्छेदकतया वायुत्वजातिसिद्धिरित्यर्थः। इदमुपल
क्षणं। शब्दविशेषस्य वक्ष्यमाणावच्छिन्नस्य वा निमित्तकारणतावच्छेदकतया वायुत्वजातिसिद्धिरिति ज्ञातव्यं। मूले स्प
र्शादिलिंगक इति। स्पर्शादीनि लिंगानि यस्य स तथा। मुक्तावल्यां धृतीति। धृतिश्च गुरुणो द्रव्यस्यापतनं। विजातीयस्पर्शे नेति।
स्तीयांतं चतुष्कमनुमानादिसंगतेन नान्वितं। अनुमितिप्रकारस्तु योयं रूपवद्द्रव्यासमवेतस्पर्शः क्वचिदाश्रितः स्पर्शत्वात्।

मु॰रि॰
३९

वत्

पृथिवीस्पर्शवत्। अत्र पृथिव्यादिस्पर्शे सिद्धसाधनवारणाय रूपवद्द्रव्यासमवेत इति पक्षविशेषणं। एवमसति रूपवद्
व्याभिघाते योयं पर्णादिषु शब्दसंतानः स स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः अविभज्यमानावयवद्रव्यसंबंधिशब्दसं
तानत्वात्। दंडाभिहतभेरीशब्दसंतानवत्। पृथिव्याद्यभिघातजन्यमाने सिद्धवारणाय स्पर्शवदित्यादिपक्षविशेषणं। विभागज
न्यानि शब्दे व्यभिचारवारणाय हेतावविभज्यमानेत्यादि। एवं नभसि तरणतलस्तनयित्नुविमानादौ नो धृतिः। स्पर्शवद्
द्रव्यसंयोगहेतुका। अस्मदाद्यनधिष्ठितद्रव्यधृतित्वात्। नौकादिधृतिवत्। जलादिगततृणादौ सिद्धसाधनवारणाय नभ
सीति। प्रयत्नसंयोगहेतुकधृत्यादौ व्यभिचारवारणायास्मदादीति। एवं तद्रूपे द्रव्याभिघातमंतरेण तृणे कर्म। स्पर्शवद्वे
गवद्द्रव्याभिघातजन्यं। विशिष्टकर्मत्वात्। नदीपूराहततृणादिकर्मवदिति। अग्रे वक्ष्यत इति। अग्रे। आत्मनिरूप
णावसर इत्यर्थः। मूर्ते पूर्ववन्नियतमाधुक्तमिति। पूर्ववत्। जलवदित्यर्थः। निमतादौ त्यादिना नियतपरिग्रह
उक्तौ बोध्यमित्यर्थः। एतदेव स्पष्टयति। मुक्तावल्यां वायुर्द्विविध इति। तत्र। तेषु मध्ये। अयोनिजं। अयोनिजमेवे
त्यर्थः। पिशाचादीनामिति। मरुतां लोके प्रसिद्धमिति शेषः। ननु वायोस्तत्त्वाद्यादि[illegible] वा व्यापाराभावात्कारण
[illegible]घभावेन चाहरणविहरणाद्यभावात्कथं भोगायतनत्वमित्यत आह। परंत्विति। जलीयतैजसशरीरये
रपि पार्श्वेपस्य तुल्यत्वात् प्रकरणात्। एवमभिप्रेत्य साधारण्येन समाधानमाह। जलीयतैजसवायवीयेति।
ननु कथं तर्हि जलीयत्वादिव्यपदेश इत्यत आह। जलादीनामिति। अत्र त्वगिंद्रियेयो विशेषः अधिष्ठानादि:
शरीरव्यापकमिति। न च नखलोमकेशानां त्वगिंद्रियानाधारत्वात्तदसंभव इति वाच्यं। तेषां संयोगिद्रव्यत्वेन
शरीरत्वाभावात्। त्वक्स्य त्वगिंद्रियमित्यस्य त्वचि स्थितमिंद्रियमित्यर्थः। एतेन देहसहआवरणं त्वगित्युच्य

साधनं

रूपवत्

३९

ते। तच्च पार्थिवं प्रत्यक्षं सिद्धं चेति। नेंद्रियं न च वायवीयमिति परास्तं। त्वगिंद्रियस्य लक्षणमाह। स्पर्शेति। स्पर्श
मात्रजनकतानादावतिव्याप्तिवारणायेंद्रियमिति। चक्षुरादावतिव्याप्तिवारणाय स्पर्शग्राहकमिति। स्पर्श। त्व
गिंद्रियमित्यर्थः। तच्चेति। त्वगिंद्रियं चेत्यर्थः। पक्षे स्पर्शत्वाभिव्यंजकत्वादसिद्धिवारणाय रूपादिषु मध्य इति। म
नसि व्यभिचारवारणायैवकारः। त्वक्संनिकर्षे व्यभिचारवारणाय उद्भूतत्वे सति। स्पर्शवो ध्यं। अंगसंगिसलिले
स्वेदः। आकरे। प्रशस्तपादभाष्यादौ प्राण एक एवेति। कथं तर्ह्यपानादिव्यवहार इत्यत आह। स प्राणव आदि इति।
हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कंठदेशस्थो व्यानः सर्वशरीरग इति स्थानभेदादित्यर्थः।
क्रियाभेदाच्चेति। मुखनासिकाभ्यां निष्क्रमणप्रवेशनात्प्राणः। मलादीनामधोनयनादपानः। आहारेषु पाका
र्थं वह्नेः समुन्नयनात्समानः। ऊर्ध्वनयनादुदानः। नाडीमुखेषु वितननाद्व्यान इति क्रियाभेदाच्च पंचसंज्ञां लभ
ते। न तु संज्ञाभेदेन संज्ञिभेद इत्यर्थः॥ ॥इति वायुग्रंथः॥ ॥आकाशेति। कालत्वं दिक्त्वं न जातिरेकव्यक्तितया घटेना
त्रैव प्रसंगाद्युगपदभिहितं। न जातिरिति। अनेकसमवेतत्वाभावादिति शेषः। तेनैकव्यक्तित्वस्य जात्यभावे हेतुत्वे वैय
धिकरण्यमिति प्रयुक्तं। विभ्विति। आश्रयता चात्र समवायेन विवक्षिता। तेन कालस्य जगदाधारत्वेन शब्दाश्रय
त्वेऽपि न क्षतिः। मूले वैशेषिकपदवैयर्थ्यमाशंक्याह। वैशेषिक इतीति। इत्थं च शब्द इति मूलं सावधारणं ज्ञेयं। एतेन। वि
शेषगुणत्वकथनेन। प्रमाणमित्यस्याकाश इत्यादिः। तच्च शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः। अष्टद्रव्यानाश्रित
त्वे सति द्रव्याश्रितत्वादित्येवं रूपं बोध्यं। दर्शितं। सूचितं। अत्रानुमाने स्वरूपासिद्धिं परिहर्तुमाह। तथाहीति। घट

तर

मु॰ टि॰
८०

चारवारणाय चक्षुर्ग्रहणायोग्येति। आत्मनि व्यभिचारवारणाय बहिरिंद्रियग्राह्येति। रसत्वादौ व्यभिचारनिवृत्तये जा
तिमदिति। एतच्चानुमानमग्निमद्द्रव्यसंभवे तत्र साध्यकानुमाने स्वरूपासिद्धिनिरासायेति बोध्यं। गुणत्वादिति।
एतदनुमानेनोक्तपरिशेषानुमाने हेतौ विशेष्यासिद्धिर्निरस्ता। विशेषणासिद्धिमुद्धरन्नाह। शब्दो न स्पर्शवद्विशे
षगुण इति। न स्पर्शवतो द्रव्यस्य पृथिव्यादिचतुष्टयस्य विशेषगुण इत्यर्थः। अकारणगुणपूर्वकप्रत्यक्षत्वा
दिति। अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वादित्यर्थः। हेतुसत्त्वं प्रतिपादयितुं पाकजेति। जलपरमाण्विति। अ
नित्यानां पार्थिवरूपादीनां केषांचिदग्निसंयोगासमवायिकारणकत्वात्केषांचित्कारणगुणपूर्वकत्वादत्रोपे
क्षा॥ न दिक्कालेति। शब्द इत्यनुवर्तते। बहिरिंद्रियेति। मनसोन्यदिंद्रियं बहिरिंद्रियं। तत्प्रत्यक्षत्वादित्यर्थः। एतेना
त्मगुणग्राहकेंद्रियत्वं बाह्येंद्रियत्वं। तच्च मनस्यपि प्रसक्तं। तेनापि रूपादिग्रहणादिति निरस्तं। इत्थं चानेन प्र
कारेण पृथिव्याद्यष्टद्रव्यानाश्रितत्वसिद्धौ च सिध्यतीति। पूर्वोक्तपरिशेषानुमानेन सिध्यतीत्यर्थः। नन्वेतत्सर्वं
तदोपपद्येत यदि शब्दस्य विशेषगुणत्वे किंचित्प्रमाणं स्यात्। तच्चैव च मानं न पश्यामः इति चेन्न। शब्दो विशे
षगुणः लौकिकप्रत्यासत्त्येंद्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या द्वींद्रियग्रहणयोग्यतारहितत्वे च सति गुण
त्वव्याप्यजातिमत्त्वादित्यनुमानस्यैव तत्र प्रमाणत्वात्। प्रभात्वमादाय व्यभिचारवारणाय गुणत्वव्याप्येति। गु
रुत्वत्वमादाय व्यभिचारवारणाय प्रथमं सत्यंतं। संख्यात्वमादाय व्यभिचारवारणाय द्वितीयं सत्यंतं। सांसिद्धिक
द्रवत्वस्नेहधर्माधर्मभावनासु प्रकृतहेतोरभावेपि तद्धेत्वंतरेणैव विशेषगुणत्वं साधनीयमिति। पूर्वोक्तानुमा

८०

स्पं २

नेबाधं स्वरूपासिद्धं चाशंकते। न चेति। वायाविति। तथा च स्पर्शवद्वायुगुणत्वस्य तत्र सत्त्वात्तदभावसाधने बा
ध इति भावः। कारणगुणपूर्वकत्वकथनं तु अकारणगुणपूर्वकत्वघटितहेतोरसिद्धिप्रदर्शनार्थं। अथावच्छेद्यभा
विरहेनेति। स्वाश्रयनाशजन्यनाशप्रतियोगीयघत्तद्भिन्नत्वेनेत्यर्थः। ननु तथाप्याकाशे प्रत्यक्षमेव प्रमाणं क्षि
तिनोपन्यस्तमिति चेन्न। चाक्षुषत्वे प्रयोजकस्य महत्त्वे सति उद्भूतरूपवत्त्वस्याकाशे ऽसंभवेन चक्षुषः प्रमा
जनकस्याऽसंभवात्। ननु यथाकाशो न चाक्षुषस्तदेहपक्षीति चक्षुषोऽधिकरणत्वेन किं भासत इति चेदालोक
एवेति करुय। नन्वाकाशीयशरीरविषययोः प्रदर्शनमुक्तिस्यैव कथमिंद्रियप्रदर्शनामिंद्रियं तु भवे छ्रोत्रमिसनेन
ग्रंथेन क्रियतइत्याशंक्याह। तत्र चेति। आकाशे चेत्यर्थः। कर्णशष्कुलीभेदादिति। चैत्रादिकर्णशष्कुल्यवच्छिन्नमा
काशं चैत्रादिश्रोत्रमिति भावः। नन्वास्तां। शब्दनिमित्तकारणत्वेन क्लृप्तस्येश्वरस्यैव शब्दकारणत्वं। न चेश्वरस्य समवायि १
शब्द ६ शब्दसमवायित्वं आवश्यका इस्तत्र विनिगमनाविरहः। जीवस्यैव समवायित्वे ऽशानवच्छिन्नस्यापि मानसत्वापत्तेः
अदृष्टादेव प्रतिबंधकत्वकल्पने चातिगौरवं। न चैवं कर्णशष्कुलीविवरावच्छिन्नाकाशस्य कथं श्रोत्रत्वोपपत्तिरि
ति वाच्यं। तथाविधस्येश्वरस्यैव श्रोत्रत्वोपपत्तिरित्याहुः। स्वतंत्रास्तु मृदंगादीनामेव गुणः शब्दः शब्दं प्रति मृदंग
त्वादिना समवायिकारणतायाः स्वीकारात्। प्राचीनैरपि मृदंगत्वादिना निमित्तकारणतायाः स्वीकारात्। मृदंगे श
ब्द इति प्रतीतिश्च। न च तत्रावच्छेदकत्वं विषयो मानाभावात्। अन्यथावच्छेदकतारव्यस्वरूपसंबंधस्यान्यत्र सम
वायस्य कल्पने गौरवादिति वदंति॥ ॥इत्याकाशग्रंथः॥ ॥मूले जन्यानां जनक इति। कार्यत्वावच्छिन्नं प्रति निमित्तका

मु॰ दि॰
४१

तु॰

रणमित्यर्थः। अत्र च कालिकसंबंधावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितमधिकरणतया निमित्तत्वं कालस्य लक्षणं। का
लिकसंबंधावच्छिन्नेति कारणादिस्याधिकरणेति करणाद् दृष्टेश्वरयोर्नीतिव्याप्तिरिति ध्येयं। ननु कार्यमात्रं प्रति काल
स्य निमित्तकारणत्वे किं मानमिति चेदत्राहुः। अद्य घटो भविष्यति श्वः घटो भविष्यतीत्यादिप्रत्यये तत्तत्कार्यस्य
अधिकरणत्वेन कालो विषयीक्रियते तदुक्तं अधिकरणत्वेन व्यवहारविषयस्य च तदुत्पत्तिहेतुत्वनियमात्। तदुत्पत्ति
हेतुत्वस्य तद्धेतुत्वव्याप्यत्वात्। एवं च तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषस्य हेतुत्वे सिद्धे यद्विशेषयोरिति न्या
यात् कार्यमात्रं कालस्य हेतुता सिद्धिरिति। सा च हेतुता निमित्तकारणतैव। न च कालस्य कार्यमात्रं निमित्तहेतुत्वे
न संभवति स्वसमवेतद्वित्वादि एथक्त्व संयोगविभागपरत्वापरत्वं प्रति कालस्य समवायिकारणत्वेन तद्भिन्न
त्वघटितस्य निमित्तकारणत्वस्य तत्राभावादिति वाच्यं। समवायसंबंधेन द्वित्वादिकं प्रति तस्य सम
वायिकारणत्वेऽपि कालिकसंबंधेन द्वित्वादिकार्यं प्रति निमित्तकारणत्वस्यानपायात्। एवमेव कार्यमात्रे दिशो
ऽपि निमित्तकारणत्वं बोध्यं। मुक्तावल्यां तत्रेति। तत्र कालेः। जगतामाश्रयइतीति। कालः सर्वाधारइति प्रतीत्या स
र्वाधिकरणत्वेन कालसिद्धिरिति भावः। ननु एतादृशप्रतीतिर्दिग्विषयिण्येवास्तु। अतिरिक्तकालकल्पने गौ
रवादतो न केवलमनया प्रतीत्या कालः सिध्यति परंतु प्रमाणांतरेण सिद्धे काले उक्तप्रतीतिबलात् सर्वाधारत्वं कल्प्य
त इत्याह। इदानीमित्यादिना। सूर्यपरिस्पंदादिरूपमिति। इदानीं तदानीमिति प्रतीतिर्महाकालं विषयीकरोतीति न
न वाच्यं। तथा सति इदानीं घटो न तदानीमिति प्रत्ययानुपपत्तेः। न च तत्तत्क्रियाविशेषमतः कालमेव इदानीमिति प्रत्य

४१

यविषयः। तथाच इदानीं घटो न तदानीमित्यस्यैतत्क्रियाविशिष्टमहाकाले घटो न तत्क्रियाविशिष्टमहाकाल इत्यर्थ
इति वाच्यं। तथासति तत्तत्क्रियाविशिष्टमहाकालापेक्षया लाघवेन तत्तत्क्रियायाएव तादृशप्रतीतिविषयत्वस्यौचि
त्यादिति। इतीयानंतरं स्वाश्रयतपनसंयोगिसंयोगएव संबंधो वाच्यस्तत्रेति शेषः। न चाकाशएव संबंधघ
टकोस्त्विति वाच्यं। आकाशादिगात्मनां विनिगमनाविरहेणातिरिक्तैककालस्यैव तथात्वाल्लाघवं चेति। अतिरिक्तकाल
सिद्धौ चेत्यर्थः। सम्यगिति। कालः सर्वाणीति प्रतीतिरतिरिक्तकालविषयकत्वस्यैवोचितत्वात् इति भावः। परत्वापरत्व
बुद्धेरिति। ज्येष्ठे परत्वप्रत्ययः कनिष्ठे अपरत्वप्रत्ययः स च परत्वापरत्वगुणविशेषाधीनः परत्वापरत्वे च सासमवा
यिकारणके भावकार्यत्वात् असमवायिकारणं च तयोः कालपिंडसंयोग एवेति। परत्वापरत्वयोरसमवायिकार
णसंयोगान्यथा [illegible] कालसिद्धिरिति भावः। परत्वापरत्वयोरित्यस्यैवं [illegible] कुमुचितत्वे पितृबुद्धिपर्यंतानुधावनं कालि
कपरत्वापरत्वयोः प्रमाणं दर्शयितुं। न च पिंडगतरूपादेरेव परत्वापरत्वासमवायिकारणत्वमस्त्विति वाच्यं। कालि
कपरत्वापरत्वयोर्वायावणुसत्त्वाद्व्यभिचारात्। अतएव पृथिवीपिंडसंयोगस्य न तत्र कारणत्वं पृथिव्यसंयुक्तपदार्थे
पि तादृशपरत्वापरत्वयोरुत्पादेन व्यभिचारात्। ननु तथाप्याकाशादिगात्मभिः पिंडसंयोगस्य तथात्वं स्यात् किं कालेन त म५
त्राह लाघवादिति। आकाशादिभिः पिंडसंयोगस्य तथात्वे जीवात्मभिः प्रत्येकं विनिगमनाविरहादात्मन
सोस्त्वनंतत्वान्न तथात्वं किंतु लाघवादतिरिक्तः कालएव तथात्वेन कल्प्यत इति भावः। ननु काल एकएव तदा क्षणल परि
वकाष्ठादिनानाव्यवहारस्तत्र न स्यात्। न चैकस्मिन्नेव घटे घटः कलशः कुंभः इति व्यवहारवदुपाधिभेदादिना नानाव्य
वहारे बाधकाभाव इति वाच्यं। एकस्मिन्विरुद्ध नानाव्यवहारायोगात्। नहि घटत्वकलशत्वादिकं मिथो विरुद्धं स

क्षणत्वं किंचिद्धर्मविशिष्टस्य

णत्वादनत्यादिकं तु विरुद्धमेव न हि दिनं क्षण इति प्रतीतिरस्तीति शंकते। नन्वेकस्येति। समयभेद इति। समयभेदव्यवहार इ-
ति भिन्नव्यवहारविषयत्वमिति यावत्। एकस्मिन्निरूढनानाव्यवहारविषयत्वाभावादिति भावः। उपाधिभेदादिति।
तथा चैकस्यैव कालस्य क्रियाविशेषधर्मविशिष्टस्य दिनत्वं न तु केवलकालस्येति भावः। इदमुपलक्षणं। तादृशोपाधीना-
मेव क्षणत्वादिव्यवहारविषयत्वं न तु महाकालस्येत्यपि द्रष्टव्यं। स्वजन्येति। स्वं क्रिया घटगतैका क्रिया नाशोत्तरोत्प-
न्नतद्गतक्रियान्तरजन्यविभागप्रागभावविशिष्टस्य प्रथमकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिरतः स्वजन्ये-
ति। नन्वेवं प्रथमक्षणे क्षणव्यवहारोपपादनेपि द्वितीयक्षणे [illegible] क्षणे कथं तदुपपादनं। तत्र क्रियाजन्यविभागोत्पत्त्या वि-
भागप्रागभावाभावात्। न च द्वितीयक्षणोत्पन्नक्रियान्तरस्यैव निरुक्तविशिष्टस्य तत्र क्षणत्वमिति वाच्यं। प्रतिक्षणं क्रि-
योत्पत्तौ मानाभावादतस्तत्रापि क्षणव्यवहारोपपादकमुपाधिमाह। पूर्वसंयोगेति। स्वजन्यविभागनाश्यपूर्वसंयोगविशि-
ष्टः स्वजन्यविभाग इत्यर्थः। तेन स्वजन्यविभागस्य यावत्कालं पूर्वसंयोगविशिष्टस्य द्वित्रिक्षणस्थितत्वेपि यावत्कं च विभागस्य
स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्य तथात्वेपि च न क्षतिः। तृतीयक्षणे तदुपपादकमुपाधिमाह। पूर्वसंयोगना-
शावच्छिन्नेत्युत्तरसंयोगप्रागभावो वेति। स्वजन्यविभागजन्यपूर्वसंयोगनाशावच्छिन्नः स्वजन्योत्तरसंयोगप्रागभाव इत्यर्थः।
नातिप्रसंगः। क्वचित्पुस्तके पूर्वसंयोगनाशावच्छिन्नविभागो वेति पाठः। स च प्रामादिकः। प्रथमद्वितीयचतुर्थक्षणेषु एवै-
षोपाधेरेवाभिहिततया तृतीयक्षणे उपाधिद्वयाभिधानं संदर्भविरोधापत्तेः। उत्तरसंयोगस्यैव विभागनाशकतायाः सिद्धान्त-
सिद्धतया निरुक्तोपाधेः क्षणद्वयावस्थायिनः क्षणत्वायोगाच्च। यदि च तत्पाठप्रामाण्याग्रहस्तदा पूर्वसंयोगनाशस्यैव
विभागनाशकत्वाभिप्रायेण योजनीयः। चतुर्थक्षणे तमाह। उत्तरसंयोगेति। स्वनाश्योत्तरसंयोग इत्यर्थः। तेन सर्वस्यैव सं-
योगस्योत्तरसंयोगतयात्र द्विशिष्टकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिर्निरस्ता। न चैतादृशक्षणलक्षणं महाप्र-

अ लर

ळ या सकक्षणे अव्याप्तेः तन्नता हरीकर्मत्वाभावात्। न च महाप्रळय स्य क्षणत्वा भावइष्ट एवेति वाच्यं। तत्रापि क्षणत्वव्यवहारस
त्वात्। न्यथा महाप्रळयोस त्तोउ लक्षणस्य तदधिकरणक्षणा वृत्तित्वव्याप्यस्य वृत्तिध्वंसप्रतियोगिता वृत्तिसमयवृत्तित्व
रूपस्याव्याप्त्यापत्तेः। तत्र महाप्रळयाधिकरणक्षणाप्रसिद्धेः तर आह। महाप्रळय इति। महाप्रळयक्षणव्यवहारो नास्य
व। उत्ता तल्लक्षण स्य क्षणाघटित स्यैव स्ववृत्ति ध्वंसप्रतियोगिकाधारवृत्ति त्वाविशिष्ट स्ववृत्तित्व रूपस्य
तउ सत्तो संभवादि सभिप्रेत्यो क्तं यदाति। ध्वंसे नैवेति। स्ववृत्ति ध्वंसप्रतियोगि प्रतियोगिक यावध्वंसाविशिष्ट
समयस्यैव तत्क्षणव्यवहार विषयत्वादिति भावः॥ ॥इति काळग्रंथः॥ बीजं। प्रयोजनं। अथ दिशस्तत्र प्रयोज
कत्वं तद्दर्शयति। दैशिकपरत्वापरत्वयोरिति। तथा च परत्वापरत्वबुद्धिं प्रति परत्वापरत्वे निमित्तं। तत्र दिक्पिंड
संयोगस्तत्र दिशि क्रमेण परंपरयो दिशस्तु हेतुः निमित्तत्वं बोध्यं। अत्रापि बुद्धिपर्यंतानुधावनं। दैशिकपरत्वा
परत्वयोः प्रमाणं दर्शयितुं ता द्दशपरत्वापरत्वाभ्यामेव तदनुमितेः संभवादिति। प्रतीच्यादीत्यादिना उदीच्यादि संग्रहः। उपा
धीनीति। वस्तुतो दिश एकत्वेन तदुपाधि भेदेन प्राच्यादिसंज्ञाभेद इति भावः। प्राच्यादिसंज्ञासु निमित्तभूतानुपाधीनाह।
यत्पुरःस्थेति। पुरःस्थेति पदार्थमात्रोपलक्षणं। पंचम्यर्थे षष्ठी। दिक्कृत्तौ एवमग्रेपि। तथा च यदपेक्षयोदयगिरिसंनि
हितेयन्मूर्त्तं सा ततः प्राचीत्यर्थः। तदपेक्षयोदयगिरिसंनिहितत्वं च तन्निष्ठोदयगिरिसंयुक्तसंयोगापेक्षया ...त्य्यौरोदयगि तप
रिसंयुक्तसंयोगवत्वं। इदं च मथुरातः प्राच्यां प्रयाग इत्यत्र मथुरानिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्याव्याप्यसंख्या
पर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तवृत्तिः प्रयाग इत्यन्वयबोधः। एवं काशीतः प्रतीच्यां प्रयाग इत्यत्र काशीनि
ष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्याव्यापकसंख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तवृत्तिः प्रयाग इत्य
न्वयबोधः। एवमन्यत्रापि बोधा ऊहनीयाः। तन्निष्ठोदयाचलसंयुक्तसंयोगपरंपराघटकमूर्त्तत्वाचास्यपिवदंति। दीधितिस्तु

मु०टि०
८१

न्या० सि०

तस्तु॥ दिक्कालौ नेश्वरादतिरिच्येते मानाभावात्। तत्तत्कालोपाधिदिगुपाधिविशिष्टादीश्वरादेव क्षणदिनप्राचीप्रती-
च्यादिव्यवहारोपपत्तेरित्याहुः। तन्न व्याः। ईश्वरस्य दिक्कालरूपत्वे तत्तज्जीवस्य वेति विनिगमनाविरहेणातिरिक्तयो-
स्तयोः स्वीकारः। न च तत्तज्जीवस्य अगजनकत्वे परत्वापरत्वजनकत्वं च कल्प्यमीश्वरस्य तु क्लृप्तमिति लाघवमिति वा-
च्यं। संबंधघटकतयोर्दिक्कालयोरगजनकत्वाकल्पनाद्दिक्कालोपाधीनामेव अगजनकत्वकल्पनात्। परत्वापरत्वयो-
स्तु गुणत्वे प्रमानाभावः सन्निकृष्टत्वविप्रकृष्टत्वाभ्यामेव परापरव्यवहारोपपत्तेरिति वदंति॥ ॥ इति दिङ्निरूपणं॥
सुखदुःखादीति। आदिना ज्ञानेच्छाद्वेषयत्नधर्माधर्मभावनापरिग्रहः। यद्यप्यात्मत्वस्यात्मन्यात्मप्रत्यक्षत्वेपि स्वात्मनि
स्वरूपतो मानसप्रत्यक्षविषयत्वमस्य न तथापि सकलात्मसाधारणानुगतप्रत्यक्षासत्त्वेन जातिरूपं तन्न सिध्यति। अनेक-
समवेतत्वघटितजातित्वग्रहे अनेकव्यक्तिग्रहहेतुत्वस्य सर्वसिद्धत्वादित्यनुमानमेव तत्र प्रमाणमित्यभिप्रायेण सुखादिका-
रणतावच्छेदकतया तत्सिद्धिः प्रदर्शिता। अथ सुखत्वावच्छिन्नं प्रत्यात्मत्वेन कारणत्वे मानाभावः। सुखदुःखद्वेषभाव-
नाधर्माधर्मान्यतमत्वावच्छिन्नं धर्माधर्मानिष्ठसाधनत्वादिज्ञानानुभवविहितनिषिद्धकर्मणां समवायसंबंधेन निमित्तका-
रणत्वावश्यकतयाऽतिप्रसंगभंगात्। भावकार्याणां समवायिकारणकत्वनियमस्य तु द्रव्यत्वेन तत्तदुत्पत्तौ समवेतं प्रति
तत्तद्व्यक्तित्वेन समवायिकारणत्वमादायैवोपपन्नत्वादिति चेदत्र प्राञ्चः। कार्यमात्रवृत्तिजातेः समवायिकारणकार्यताव-
च्छेदकत्वनियमेन तादृशकार्यकारणभावस्यावश्यकत्वात्। न च तावता सुखत्वावच्छिन्नं प्रति सत्त्वेन द्रव्यत्वेन वा का-
रणत्वमस्तु अदृष्टादेर्निमित्तकारणत्वादेवातिप्रसंगविरहादिति वाच्यं। व्याप्यलघुतरधर्मे कारणतावच्छेदकत्वे संभव-
ति व्यापकधर्मेण कारणत्वकल्पनाया अनुदयादित्याहुः। वस्तुतस्तु। मनसि ज्ञानोत्पत्तिवारणाय ज्ञानत्वावच्छिन्नं प्रत्यात्म-
त्वेन हेतुत्वमावश्यकमिति। ननु तथाप्यात्मत्वजातेर्भगवदात्मसाधारण्ये मानाभाव इत्यत आह। ईश्वर इति। आत्मावा-

वा०

४२

श्वरे ६३

प्रमाण ५

दृश्यत्वस्यादिभुतायास्तपदव्यवहारादितिभावः। ननुतहीश्वरे सुखदुःखसत्तिः कुतो न भवतीत्यत आह। अदृष्टेति। आ
दिनाशरीरपरिग्रहः। ननु नित्यस्य स्वरूपयोग्यस्य फलावश्यंभाव इति नियमेनेश्वरस्य स्वरूपयोग्यस्य फलोपधापि
त्वमित्यत आह। नित्यस्येति। ननु चेदृशं कुतो नोत्पद्यत इति चेन्न। मिथ्याज्ञानरूपकारणाभावात्। मिथ्याज्ञानस्याहेतुत्वे च मुक्तात्म
न्यपि तद्दोषप्रसंगः। वेदरूपात्तपदादेर्ज्ञानादिमत्ति लक्षणापत्तिरीश्वरस्येत्याहुरित्यनेन सूचितः। इंद्रियाद्यधिष्ठातेति
मूलमात्मपरतया व्याचष्टे। इंद्रियाणामिति। आदिपदसंग्राह्यमाह। शरीरस्येति। परंपरया। जनकतासंबंधेनाधिष्ठातृतासं
बंधेन च। चैतन्यं ज्ञानवत्त्वं। एतेनात्मनि प्रमाणमुपदर्शितं। अचेतनं। चेतनाधिष्ठिततया करोतीति व्याप्तेः। अहं सुखीत्यादि
त्यादिना। अहं जानामि करोमीत्यादिपरिग्रहः। न चात्मा तावन्न प्रत्यक्ष इति सूत्रभाष्यविरोध इति वाच्यं। आत्मतत्त्वविवेके प
रमात्माभिप्रायेण भाष्यव्याख्यानस्य प्रदर्शितत्वात्। विप्रतिपन्नं प्रतीति। अहमिति प्रतीतिः शरीराद्यतिरिक्तविषयत्वे
विप्रतिपन्नं प्रतीत्यर्थः। नैयायिकमते यथा मुक्तात्मनो ज्ञानाभावेन न ज्ञानाधिकरणत्वरूपं चैतन्यं तथा ममापि मते मृतश
रीरस्य न चैतन्यमिति। शरीरमेवात्मेति वादी चार्वाकः शंकते। चैतन्यमिति। तदभावे। ज्ञानाभावे। ननु त्वन्मते मृतशरी
रे चैतन्याभावः किंनिबंधनः मन्मते तु प्राणविशिष्टस्यात्मनो विरह एव तत्र हेतुरित्यत आह। प्रा[illegible]णाभावेनेति। तथा च प्रा
णवायोः प्राणाभाव एव च चैतन्यविरहे प्रयोजक इति भावः। चार्वाकमतं परिहरति। नेति। स्मरणानुपपत्तेरिति। अनुभवाश्र
यस्य बाल्यशरीरस्य तदानीमभावादिति भावः। ननु बाल्यशरीरं तदा स्थैवेत्यत आह। शरीराणामिति। संस्कार उत्प
तद इति। तथा च स्वप्रयोज्यसंस्कारसंबंधेन बाल्यशरीरसमवेतानुभवस्य स्थविरशरीरसत्त्वान्न स्मरणानुपपत्तिरि
तिभावः। गौरवस्य फलमुखत्वाद्दूषणांतरमाह। एवमिति। नस्यादित्यत्र हेतुमाह। इच्छेति। तद्धेतुत्वात्। अन्यतिहेतुत्वात्। तद

४ ज्ञानादिकं। ज्ञानाद्यधिकरणत्वं ६

नी। स्तनपानप्रवृत्तस्यान्यथानुपपत्तिस्तवमतेपिसमाने[illegible]नेत्याशंक्यस्वमतेप्रवृत्तस्यान्यथानु
पपत्तिंपरिहरति। मन्मते त्विति। अन्यदपीति। इष्टसाधनत्वादन्यदपीत्यर्थः। अन्वनु। स्तनपानप्रवृत्तस्यानुकूले इष्टसाधनतास्म
रणेतु। आत्मनोनित्यत्वंसाधयति। इत्थं चेति। प्रागभावस्यनाशसंभवादाह। भावेति। नाशासंभवादिति। नाशंप्रति
अन्यभावत्वेनहेतुत्वादात्मनोऽनादित्वेनजन्यभावस्वरूपहेतोरभावेननाशासंभवादित्यर्थः। ननु च चक्षुरादीनामेवज्ञाना
दिकंप्रतिकरणत्वं कर्तृत्वंवास्त्विति। करणत्वंहि व्यापारवत्त्वेसतिकारणत्वं। भवतिहि चक्षुरादौ चक्षुःसंयोगादिरूपव्यापा
रवत्तिचाक्षुषज्ञानाद्यव्यवहितसर्वकालवृत्तित्वं। ननुफलोपहितत्वं। राजसूयेनस्वाराज्यकामोयजेतेत्यादौयागादिनिष्ठक
रणत्वस्याव्याप्तिप्रसङ्गात्। करणत्वेकारणत्वयोरविशेषप्रसङ्गाच्च। कर्तृत्वंचयद्यपिक्रियानुकूलकृतिमत्त्वंनसंभवत्य
चेतनेचक्षुरादौतथापिसर्वपक्षिणातिरिक्तस्यात्मनः सुखादीनामात्मसमवेतत्वस्यचानंगीकरणात्साश्रयत्वम
पिचक्षुरादीनामस्त्वित्यर्थः। नन्वेकस्यैवकर्तृत्वेकरणत्वेकर्तृकरणादिव्यवहारभेदोनुपपन्नइत्यतोविरोधइति।
विरोधे। विभिन्नाधिकरणवृत्तित्वे। तथाचकर्तृत्वकरणत्वादिलक्षणोपाधिभेदात्कर्तृकरणादिव्यवहारभेदोपप
त्तिरित्याशयः। नन्वेतन्यामिसन्निविशेष्यतयोपस्थितस्याभावस्यतच्छब्देनपरामर्शसंभवाद्याचष्टे। तथात्वंचेत
न्यमिति उपघातपदस्यलोकेऽवयवनाशएवप्रयोगादाह। नाशइति। नन्वत्रेउपघातेकथंस्मृतिरित्युक्तंतत्रोपघातः
केपमित्याकांक्षायाःसत्त्वादाह। अर्थादिति। तथाचैकमेवेन्द्रियाणामितिपदमाकांक्षावशादुभयत्रसंबध्यतइत्या
शयः। कथंस्मृतिरितिमूलेनेन्द्रियाणांचैतन्यपक्षेस्मृत्यभावआपादितस्तत्रहेतोरनुक्तेःस्वयंहेतुंपूरयन्नर्थमा

स। पूर्वं चक्षुषेति। नन्वेवं इंद्रियांतरेणैव स्मरणं निर्भं विषयतीत्यत आह। अन्येनानुभूतस्येति। तत्र हेतुमाह। अनुभ
वेति। यद्यपि व्यधिकरणयोः कार्यकारणभावविरहात् सामानाधिकरण्येन युक्तिर्विफलता तथापि यत्र विषय
तासंबंधेन स्मृतिस्तत्र विषयतासंबंधेनानुभव इति। ईदृशविषयघटितसामानाधिकरण्यप्रत्यासत्त्या कार्य
कारणभाव आवश्यकः। आत्मनिष्ठसामानाधिकरण्यघटितकार्यकारणभावेन घटाद्यनुभवोत्तरं पटादे
विषयतासंबंधेन स्मृत्यापत्तेर्वारणादिति चक्षुः कर्तृकानुभवस्य घटे सत्त्वादिंद्रियांतरकर्तृके स्मरणं
तत्रनानुपपन्नमित्याशंकानिराकरणाय तथोक्तिः। समवायघटितसामानाधिकरण्यप्रत्यासत्त्येति त
दर्थः। चैत्रस्य घटानुभवकाले मैत्रस्य घटस्मरणवारणाय तत्पुरुषीयत्वनिवेशे पुरुषभेदेनानंतकार्यका
रणभावकल्पने गौरवात् समवायघटितसामानाधिकरण्यप्रत्यासत्त्या तयोर्हेतुहेतुमद्भावस्वीकारादि
भाव इति ध्येयं। इंद्रियाणां चैतन्यपक्षे यो दोषः सोऽत्र मनस्त्वेनास्तीति सूचयितुं नियमस्येति। ननु तथैसत्र
मस्तु तेनैकेन सर्वोपस्थितचैतन्यस्यैव परामर्शः स्यात् तथा चासंगतिरत आह। न तथा चैतनमिति। अन
संतदा भवेदिति मस्त्वेन मनसश्चैतन्ये ज्ञानादेरप्रत्यक्षत्वमुक्तं तत्र हेतुं प्रदर्शयन्नर्थमाह। मनस इति। तस्य स
ति। ज्ञानादेरप्रत्यक्षानुपपत्तेरित्यर्थः। ननु मनसोऽणुत्वमेवासिद्धमत आह। यथाचेति। अग्रे वक्ष्यत इति। अयौ
गपद्याद् ज्ञानानां तस्याणुत्वमिति वक्ष्यत इति ग्रंथेन मनसोऽणुत्वं साधयिष्यत इत्यर्थः। विज्ञानवादी शंकते। नन्विति।
विज्ञानमेवेति। आत्मनिरूपणस्य प्रस्तुतत्वादात्मेत्युक्तं वस्तुमात्रस्य तन्मते विज्ञानरूपत्वादिति बोध्यं। अत्रा

॥श्रीगणेशाय नमः॥

न त्वं प्रमेयत्वस्य सत्वस्य वा व्यापकं न वेति विप्रतिपत्तिः। तत्र विधिकोटिर्योगाचारस्य निषेधकोटिर्नैयायिकस्येति ध्येयं। द्विविधं विज्ञानं। प्रवृत्तिविज्ञानमालयविज्ञानं चेति। तत्र घट इति प्रवृत्तिविज्ञानं। अहं ज्ञानमित्यालयविज्ञानं। तदेवात्मा। तस्य। विज्ञानस्य। ननु सुषुप्तावात्मा न सिध्येत् सर्वस्यापि विज्ञानस्य क्षणिकत्वेन नाशात् द्विज्ञानांतरस्य च तदानीमुत्पादका भावादत आह। पूर्वपूर्वेति। ननु विज्ञानस्य क्षणिकत्वे तद्गतसंस्कारस्यापि क्षणिकत्वात् कालांतरे स्मरणं न स्यादित्याशंकां परिहरति। मृगमदेति। विज्ञानस्य [illegible] सविषयत्वं यत्किंचिद्विषयत्वं वाभिप्रेतमिति विकल्प्याद्ये दूषणमाह। तस्येति। द्वितीये त्वाह। यत्किंचिदिति। आत्मस्वरूपविज्ञानस्य सविषयकत्वे दूषणमाह। सुषुप्तावपीति। शंकते। तदानीमिति। निराकारा। निर्विषयिणी। चित्संततिः। विज्ञानसंततिः। प्रकाशात्वे। ज्ञानत्वे। ज्ञानत्वस्य विषयिताव्याप्यत्वादिति भावः। अन्यथा। प्रमाणाभावेऽपि तत्र ज्ञानत्वस्वीकारे। आकारस्य विज्ञानातिरिक्तमनतिरिक्तं वेति विकल्प्याद्ये दूषणमाह। तर्हि समेति। द्वितीये त्वाह। समूहालंबन इति। नीलपीते इमे समूहालंबन इत्यर्थः। स्यादिति। तदभिन्नाभिन्नस्य तदभिन्नत्वनियमादिति भावः। एतदेवोपपादयति। स्वरूपतो विज्ञानस्येति। विज्ञानस्वरूपस्येत्यर्थः। अविशेषात् [illegible]त्वाह। ननु नीलाकारः पीताकारश्चाभिन्न एव। भेदप्रतीतिस्तु तद्धर्मयोर्नीलत्वपीतत्वयोर्भेदात्। न चैतयोरपि विज्ञानस्वरूपत्वादभेदः। नीलत्वादेरपारमार्थिकस्य पारमार्थिकविज्ञानेनाभेदासंभवादित्यभिप्रायवान् शंकते। अपोहरूपमिति। अनीलव्यावृत्तिरूपमित्यर्थः। इतरथा। विरुद्धनीलत्वादीनामेकत्र समावेशो। ननु समूहालंबने न नीलाकारो न वा पीताकारोऽभ्युपेयते परं तु चित्राकार एवेति नोक्तदोष इति पूर्वोक्तं वासनासंक्रमं गुरुत्वतयाह दूषयति न वेति। मातृपुत्रयोरिति। मात्रानुभूतस्य गर्भस्थेन तनयेन स्मरणप्रसंगादिति भावः। उपादाने नानुभूतं उपादेयेन स्मरण

तो

येतइति निरस्यति। नचेति। शंकते। उत्तरस्मिन्निति। तदुत्पादकेति। वासनोत्पादके इत्यर्थः। चितामेवेति। ज्ञानानामेव संस्का
रोत्पादकत्वेतेषामानंत्यात् संस्कारानंत्यापत्तिरित्यर्थः। शंकते। क्षणिकेति। अतिशयविशेषः। शक्तिविशेषः। उत्तरो
त्तरज्ञानानुकूलतयेति शेषः। गौरवादिति। सएवायमित्याकारप्रत्यभिज्ञानात् क्षणिकानंतशक्तितत्प्रागभावतद्ध्वं
सकल्पने गौरवादित्यर्थः। ननु कुसूलस्थबीजादंकुरोत्पत्तिर्न कुसूलस्थबीजादंकुरः तावच्छिन्नं प्रति कुर्वद्रूपत्वेन हे
तुत्वमंगीक्रियते। कुर्वद्रूपत्वं चांकुरजनकतावच्छेदकतया सिद्धो जातिविशेषः। सच फलोपधायकक्षणिकबीजमात्र
वृत्ति बीजत्व [illegible] व्याप्यः कल्प्यते एवमन्यापि कुर्वद्रूपत्वेनैव क्षणिकशरीरेषूत्तरोत्तरशरीरनिष्ठवासनोत्पादकत्वेना
भ्युपगतमाह। बीजादावपीति। उपपत्तेः। कस्मात्सिद्धबीजादंकुरोत्पत्तिः कस्मान्नेति नियमोपपत्तेः। कुर्वद्रूपत्वाकल्पना
दिति। कुसूलस्थबीजादिषु धरणिसलिलसंयोगादिरूपसहकार्यभावादेवांकुरानुत्पत्तेः। कुर्वद्रूपत्वेन तद्रूपेणाजन
कसंवलनकल्प्यते प्रमाणाभावादिति भावः। अत्र वदंति। यत्सत्तत्क्षणिकमिति व्याप्त्या जगतः क्षणिकत्वात् तदनुरोधेन
च कुर्वद्रूपत्वेन तद्रूपेण कार्यं प्रति हेतुत्वं चावश्यकं। न च तादृशव्याप्तौ मानाभावः। तादृशव्याप्त्यस्वीकारे कुसूलस्थबी
जादंकुरोत्पत्तिनिवारणाय धरणिसलिलसंयोगादीनां सहकारित्वकल्पने गौरवात्। तादृशव्याप्तिस्वीकारे तु कुर्वद्रू
पत्वेन हेतुत्वकल्पनात् कुसूलस्थबीजे कुर्वद्रूपत्वाभावादेवांकुरानुत्पत्तेर्न सहकारिताकारणेतराणामिति लाघवात्
न च क्षणिकत्वमतेपि बीजस्य धरणिसलिलसंयोगादेर्वा कुर्वद्रूपत्वेन हेतुत्वमित्यत्र विनिगमनाविरहेण सर्वेषां सहका
रिणां कारणत्वकल्पनमावश्यकमिति वाच्यं। मन्मतेंकुरं प्रति बीजानां धरणिसलिलसंयोगादेः सहकारिणां च कुर्वद्रूप

समर्थ

१०

मु॰टि॰
४६

पि ३

त्वेनैव हेतुत्वकल्पनात्। कुर्वद्रूपस्यानंगीकारे बीजत्व धरणि सलिलसंयोगत्वादिना नाहेतुत्वकल्पने गौरवात् इति। तदस
त्। ईदृशगौरवापेक्षयाक्षणिकानंतपदार्थकल्पने तिगौरवात्। न च लाघवात् कुर्वद्रूपत्वेन तेषामेकहेतुता सिद्धा ईदृशं गौ
रवं न दोषाय फलमुखत्वादिति वाच्यं। फलमुखगौरवस्यापि दोषत्वात्। किंच जगतः क्षणिकत्वे सएवायं घट इति प्रत्यभिज्ञा
नुपपत्तिः। पूर्वकालीनघटाभेदस्यैतत्कालीनघटेऽभावात्। न च तज्जातीयाभेद एव तादृशप्रतीतिविषयः तन्मतेजा
तेरपि क्षणिकत्वेन पूर्वकालीनघटवृत्तिघटत्वस्यैतत्कालीनघटेऽभावात्। एतेन जगतः क्षणिकत्वे नाशात्पूर्वक्षणे
प्रतिसत्वेनैकमेव हेतुत्वमिति लाघवमप्यपास्तं। यदपि स्थिरपदार्थांगीकारे एकस्मिन् पदार्थे सामर्थ्यमसामर्थ्यं चावि
रुद्धमतस्तद्भेद इति। तदपि न। एकस्मिन्नेककालावच्छेदेन सामर्थ्यतदभावयोरेव विरुद्धतया कालभेदेन तत्स्वीकारे
बाधकाभावात्। यत्तु पूर्वापरकालीनधर्मिणोरभेदे तद्धर्मयोः सामर्थ्यासामर्थ्ययोर्भेदोनुपपन्नस्तन्मते धर्मधर्मिणोरभेदा
दिति। तन्न। घटत्वं न घटरसादिरूपतीति नाम प्रामाण्यापत्या धर्मधर्मिणोरभेदस्यैव वक्तुमशक्यत्वादिति दिक्। वेदांतीशंकते॥
अस्त्वात्मेति। क्षणिकविज्ञानमिति। आत्मनः क्षणिकविज्ञानस्वरूपत्वपक्ष इत्यर्थः। आत्ममात्रस्यानित्यविज्ञानरूपत्व
मीश्वरस्यैव वेति विकल्प्याद्यं दूषणमाह। तस्येत्यादिना। दर्शितत्वादिति। तस्य जगद्विषयकत्व इत्यादिग्रंथेन दर्शित
त्वादित्यर्थः। तथा च जीवस्य तथात्वासंभवान्नात्ममात्रस्य नित्यज्ञानरूपत्वमिति भावः। ननु जीवस्य न जगद्विषयकत्वं न
वानित्यत्व[?]ं विषयकत्वं ब्रूमः परंतु यद्विषयकत्वं यत्र जीवेनुभवसिद्धं तत्र तद्विषयकत्वमत आह। सविषयक
त्वस्येति। ननु सत्यं ज्ञानमिति श्रुतिरेव जीवस्य ज्ञानस्वरूपत्वे प्रमाणमत आह। सत्यमिति। ननु जीव ब्रह्मणोरैक्यान्नि
त्यविज्ञानरूपत्वं जीवस्यानिराबाधमित्यतो जीवब्रह्मणोर्भेदं साधयति। ज्ञानाज्ञाने इति। सुखित्वादीत्यादिना दुःखित्व

४६

परिग्रहः। सुतरामिति। जीवात्मनो नानात्वसिद्धावीश्वरस्यैकस्यानेकजीवात्मकत्वासंभवादेकत्वानेकत्वयोर्विरोधा
दिति भावः। ईश्वरभेदः। ईश्वरजीवात्मनोर्भेदः सिध्यतीति शेषः। अन्यथा ईश्वरस्य जीवात्मकत्वे। बंधमोक्षेति।
कश्चित्संसारी बद्धः कश्चिन्मुक्त इति व्यवस्थानुपपन्ना स्यादित्यर्थः। चैत्रमैत्रात्मनोरीश्वरस्वरूपयोरैक्यादिति भा
वः। ननु कथं तर्हि तत्त्वमसीत्यादितच्छब्दप्रतिपाद्यब्रह्मणि युष्मच्छब्दप्रतिपाद्यजीवस्याभेदबोधको वेदः प्रमाणमि
त्यत आह। योपीति। मोक्षकाले जीवात्मना ब्रह्मणा सहाभेद उत्पद्यत इति मतं निरस्यति। मोक्षेति। भेदस्यानित्यत्व
मभ्युपेत्यापि मोक्षकाले जीवब्रह्मणोर्भेदं व्यवस्थापयति। भेदनाशेपीति। भेदसत्त्वे व्यक्तिद्वयं निर्विवादमेवेत्यपिना
सूचितं। तत्र। वेदांतिनः। निर्धर्मक इति। इदं च सत्यसत्याभावेपि यत्र हेतुतयोक्तं। ननु निर्धर्मकत्वं स्वभिन्नधर्मशून्य
त्वं मिथ्याभावरूपसत्यत्वस्य ब्रह्मरूपत्वाद्भावस्य चाधिकरणात्मकत्वान्नानुपपन्नमित्यभिप्रायेण शंकते। मिथ्या
साभाव इति। ननु कथमेकत्वाधिकरणे तदभावरूपं द्वित्वमत आह। प्रत्येकमिति। ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेर्मो
क्षदशायामभेद उत्पद्यत इत्यर्थिकायाः का गतिरत आह। योपि तदानीमिति। अत एव। ब्रह्मैव भवतीति श्रुतेः साम्य
प्रतिपादकत्वादेव। निरंजनः। निर्दुःखः। द्वितीये दोषमाह। ईश्वरोपीति। विज्ञानपदेनानित्यमित्यादिश्रुत्युक्तं गतविज्ञा
नपदेन। अधिकरणल्युडंतविज्ञानपदेन विज्ञानाश्रयबोधनादिति भावः। आनंदवदित्यर्थ इति। अस्यार्थो यत्प्रत्ययांते
नानंदशब्देनानंदवतो बोधनादन्यथानंदमिति नपुंसकत्वानुपपत्तेरिति भावः। नन्वानंदवदित्यर्थो न संगच्छते। तव
मते ईश्वरे आनंदाभावादत आह। आनंदोपीति। लक्षणाकल्पनमेव तद्दोष इत्यत आह। अस्त्वेवेति। असुखमितीति।
असुखमित्यत्र नञा ब्रह्मणि सुखभेदबोधनादिति भावः। कष्टकल्पनापत्तेरिति। बहुव्रीहावन्यपदार्थे अभावार्थे नञ

स-

४७

स्तत्र लक्षणापत्तेरित्यर्थः। न च नञ्तत्पुरुषेपि नञो लक्षणाभावस्य त्वात्। अन्यथा नञर्थस्य नामार्थतयाभेदेनान्वयासंभवा
दिति वाच्यं। तस्य नामत्वेपि निपातत्वादिति। ननु नञ्तत्पुरुषेपि तत्रासुखपदञर्थपदयोरेकधर्मिबोधकत्वलक्षणं सामा
नाधिकरण्यमनुभवसिद्धं। अन्यथा तयोः समानवचनत्वानुपपत्तेरतस्तान्निबोधार्थं नञः भाववति लक्षणा तवाप्याव
श्यकीत्यत आह। प्रकरणेति। प्रत्ययविरोधादिति। आनंदशब्दस्य पुल्लिंगत्वनियमेनानंदमिति रूपस्य मतेर्थे इत्याद्य प्र
त्ययं विनाऽनुपपत्तिरिति भावः। सांख्यमतं दूषयितुमुपन्यस्यति। एतेनेति। पूर्वोक्तयुक्त्या आत्मनो ज्ञानवत्त्वसाधनेन
वक्ष्यमाणयुक्त्या चेत्यर्थः। प्रकृतिरिति। मूलप्रकृतिरित्यर्थः। कर्त्रीति। कर्तृत्वं चात्र कृतिमत्त्वं। ततः करणप्रकृतित्वे अनु
कूलकृतिमत्त्वं लक्षणं कर्तृत्वस्य तन्मते अंतःकरणधर्मत्वादिति ध्येयं। पुष्करपलाशवदिति। पद्मपत्रवदित्यर्थः। तथा च य
था पद्मपत्रं भसा लिप्तं न भवति तथा पुरुषः कर्तृत्वाधर्मयोर्न भवतीति भावः। तथा च पुरुषः कर्तृत्वाभाववान् कार
णत्वादित्यनुमानं तत्र प्रमाणं बोध्यं। ननु तत्र कारणत्वसत्वाद्धेत्वसिद्धिरत आह। कार्यकारणयोरिति। नस्यादिति। मा

भावा

भवत्वित्यर्थः। तस्य। पुरुषस्य। नन्वेताद्दशपुरुषसत्वे किं मानमत आह। बुद्धिगतेति। कथंचित्संसिद्धस्यैव चैतन्यस्य बु
द्धावारोपसंभवादिति भावः। प्रकृतेरिति। मूलप्रकृतेरित्यर्थः। ननु पुरुषस्य कर्तृत्वाभावे तत्र धर्माधर्मयोरसत्वभावा
त्तदधीनसुखदुःखयोरसत्वात् तत्वानुपपत्तेर्दुःखध्वंसरूपमोक्षः पुरुषस्य न स्यादत आह। तत्सत्वासत्वाभ्यामिति। बुद्धिस
त्वासत्वाभ्यामित्यर्थः। बुद्धिसत्वे इंद्रियप्रणालिकया तत्परिणामेनायं घट इत्यादिज्ञानेन संबद्धो घटादिविषयः। स्वाकारज्ञा
नपरिणामि बुद्ध्या गृहीता संसर्गकं संबंधेन पुरुषनिष्ठः पुरुषस्वरूपतिरोधानेन पुरुषस्य संसारसंपादकः। बुद्धिनाशे तु तत्प
रिणामस्यायं घट इत्यादिज्ञानरूपस्याभावाद्विषयावच्छेदाभावात् केवल्यावस्थानं पुंसो मोक्षः। दुःखसंबंधतध्वंसो संसा

४७

तर

रमोक्षौतु नपुंसः किंतु बुद्धेरेवेति भावः। ननु पुरुषे साक्षात्संबंधे एव विषयस्यास्तु स एव च तस्मिन् संसारव्यवहार
नियामकोस्तु किमुक्तबुद्धिघटितपरंपरासंबंधेनेत्यत आह। तस्याएवेति। तथा च विषयेण बुद्धेरेव संबंधः पुरुषसंबंधः
बुद्धिपुरुषयोरसंसर्गाग्रहात्। ननु पुरुषे स्वातंत्र्येण विषयसंबंधोस्ति। मानाभावात्। न च विषयप्रकाशार्थं सा
क्षात्संबंध एवस्वीकार्यः। किमुक्तपरंपरयेति वाच्यं। तस्य पुरुषस्वभावानिबंधनत्वे पुरुषस्य नियतत्वेन तत्स्वभावा
धीनविषयसंबंधस्य सर्वदा सत्वान्मोक्षाभावप्रसंगात्। घटप्रकाशकाले घटादिरूपविषयस्वभावाधीनस्य प
टादिरूपचेतन्यसंबंधस्य सत्वात्पटादेरपि प्रकाशापत्तेरिति। यद्वा। बुद्धितो ज्ञानस्य भेदमाह। तस्याएवेति। तथा च
बुद्धेः परिणतिर्ज्ञानं ननु बुद्धिरेवेति भावः। भेदाग्रहादिति। बुद्धिपुरुषयोर्भेदाग्रहादित्यर्थः। इदानीं बुद्धितउपल
ब्धेर्भेदप्रदर्शनाय बुद्धेरंशत्रयं प्रदर्शयति। ममेदमित्यादिना। पुरुषोपरागः। पुरुषसंबंधः। दर्पणस्य यथा मुख
संबंधः प्रतिबिंबमात्रान्नतु तात्विकस्तथा बुद्धिपुरुषयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपराग इत्यर्थः। इंद्रियप्रणा
लिकया। इंद्रियद्वारा। परिणतिभेदः। अयंघट इत्यादिज्ञानरूपः परिणाम एव विषयेण घटादिना बुद्धेः संबंध इत्य
र्थः। तस्य पारमार्थिकत्वे निश्वासाभिहतदर्पणस्य मलिनिमा दृष्टांतः। कर्तव्यमितीति। पूर्वोक्तपुरुषोपरागविषयोप
रागाभ्यां कर्तव्यस्य घटादेरवभासस्तेन कर्तव्यमित्यध्यवसायो व्यापारावेश इत्यर्थः। ज्ञानेन पुरुषस्यातात्विकः सं
बंध इति। अत्र ज्ञानेन पुरुषस्य योऽतात्विकः संबंधस्स उपलब्धिरुच्यत इत्यन्वयः। अतात्विके दृष्टांतो दर्पणमलिन
त्वेव मुखस्य संबंध इति। तथा च ज्ञानेन सह चेतनोहमिदं जानामीत्याकारो बुद्ध्यावारोपितस्य यः संबंधो तात्विकः सा
उपलब्धिर्न तु बुद्धिरेवोपलब्धिरिति भावः। कृतिसामानाधिकरण्येनेति। अदृष्टस्यातीन्द्रियत्वेपि धार्मिकोहं

मु॰ दि॰
४८

रोमीतितदं ज्ञो उपनीतभानरूपं तत्सस्य संबोध्यं। परिणामित्वादिति। अनित्यधर्माश्रयत्वादित्यर्थः। तेसहृष्टभोग
नाश्रिवेति। कृतिः स्वसमानाधिकरणमेवादृष्टं जनयति। तच्चादृष्टं स्वसमानाधिकरणमेव भोगं जनयतीति कृस
दृष्टभोगानां परस्परसामानाधिकरण्यप्रमितिव श्चेतनोहं करोमीति सामानाधिकरण्यप्रमितेरित्यर्थः। तद्भिन्ने। क
र्त्रभिन्ने। मानाभावादित्यस्य चेतन इत्यादिः। चः पूर्वोक्तदूषणसमुच्चायकः। कर्तृत्वाश्रयो न चेतनः अन्यधर्माश्र
यत्वाद्घटवदिति बाधकसत्वाच्चेतनोहं करोमीति प्रतीतिश्चेतन्यांशे भ्रम इत्याशंकते। चेतनोहमिति। कृत्संशोपाधि।
बुद्धिः कर्तृत्वाभाववती अन्यधर्माश्रयत्वादिति बाधकस्य तत्रापि सत्वादिति भावः। अन्यथेति। कर्तृचेतनयो
र्भेदांगीकार इत्यर्थः। बुद्धेर्नित्यत्व इति। कर्तृभिन्नस्य चेतनस्यांगीकारे तस्मिन्सुखदुःखाभावात्संसारमोक्ष
योरनुपपत्त्या सर्वोक्तरीत्या बुद्धिसत्वासत्वाभ्यामेव संसारापवर्गौ वाच्यौ। तथा च बुद्धेर्नित्यत्वे तत्सत्वनिबंधनस्य सं
सारस्य सर्वदा आपत्त्या मोक्षाभाव एव स्यात्। बुद्धेरनित्यत्वे तु अन्यत्वं स्वीकरणीयमजन्यस्य नाशासंभवात्तथा च तदु
त्पत्तेः पूर्वं तत्सत्वनिबंधनः संसारो न स्यादित्यर्थः। वृक्त तस्त। तदुत्पत्तेः पूर्वं तदाश्रिताहृष्टादेरभावाद्बुद्धेरनुत्पत्त्या
संसारः कदापि न स्यादित्यवधेयं। असिद्धेरिति। बुद्धेः प्रकृतिकार्यत्वाभावादित्यर्थः। ननु कर्तृत्वेन जन्यत्वानुमितिः परि
शेषाद्प्रकृतिजन्यत्वविषयिणी स्यादत आह। कर्तुरिति। कर्तृत्वस्य जन्यत्वव्याप्यत्वेऽनुकूलतर्काभावादित्यर्थः। प्र
त्युत तद्विपरीतानादित्वग्राहकतर्कसत्वादनादित्वमेव कर्तुरित्याह। वीतरागेति। वीतरागजन्मादर्शनादिति न्याय
सूत्रं। सरागजन्मदर्शनादिति तदर्थः। अनादित्वमिति। स्तनपाने बालकस्य प्रवृत्तिरिष्टसाधनताज्ञानमंतरेण। तच्च
नानुभवस्वरूपं बाधात्। स्मरणस्य स्वसमानाधिकरणपूर्वानुभवसापेक्षतया पूर्वजन्मसत्वे पूर्वजन्मन्यपि प्रथमप्र

दि॰प्र॰
४८

प्ररस्वसुरोधेन तत्पूर्वस्य एवं तत्पूर्वस्य तत्तत्पूर्वस्य जन्मनः सिद्धौ अनादित्वमात्मन इति भावः। अनादेरित्यस्य भावस्येति शेषः। अन्यभावित्वेन नाशहेतुत्वादिति भावः। न च प्रकृतेरिति। प्रकृतिर्मायातस्याः गुणैः सत्त्वरजस्तमोलक्षणैः क्रियमाणानि कर्माणि भवंति। अहंकारो हमिति प्रत्ययस्तेन विमूढः आत्मा अंतःकरणं यस्य तथाविधः पुरुषः कर्ताहमिति मन्यत इत्यर्थः केन भगवद्वचनेनेत्यर्थः। तेनात्मनः कर्तृत्वाभावः प्रतिपादनादिति भावः। अहमेवेति। तथा च तेन स्वतंत्रकर्तृत्वाभाव एवात्मनि प्रतिपाद्यते न तु कर्तृत्वसामान्याभाव इति भावः। प्रकृतीरितोयमिति। अधिष्ठानं तथा कर्ता करणं च पृथग्विधं। विविधाश्च पृथक् चेष्टा दैवं चैवात्र पंचममित्यनेन पंचानामपि कर्तृत्वं प्रतिपाद्यते तत्रैवं सतीत्यादिना स्वातंत्र्यं कर्तृत्वस्यैवात्मनो निषिद्धत्वादिति भावः। एवं पुरुषस्यैव कर्तृत्वमस्तु न च कारणत्वाभावेन कर्तृत्वाभावस्तत्र साधनीय इति वाच्यं। स्वरूपासिद्धेः। कार्यकारणयोरभेदात्कार्यनाशे कार्यरूपतमानाशः स्यादित्यकारणत्वं पुरुषस्येत्यपि न सत्। कार्यकारणयोरभेदस्यैवासिद्धत्वादित्यादि विस्तरभिया नोक्तमित्यभिप्रायवानाह। संसृष्टेति। तदाश्रयत्वे। धर्माधर्माश्रयत्वे। अन्यथा। विशेषगुणसंबंधाद्दृते। इत्यादिप्रतीतेरिति। इत्यादौ शरीरसंबंधप्रकारेणैवात्मनः प्रत्यक्षस्य स्यानुभवादित्यर्थः। परकीयप्ररस्यादेरतीद्रियत्वेन हेतुज्ञानासंभवात्स्वरूपासिद्धेरित्याह। प्रवृत्तिरन्वेति। उक्तप्रायत्वादिति। शरीरस्य न चैतन्यमित्यनेनोक्तत्वादित्यर्थः। इच्छादीनामभावस्य कंठरवेणानुक्तेः प्रायःपदं। चेष्टायाश्च प्रवृत्तिज्ञापकत्वे अनुकूलतर्कमाह। चेष्टाश्चेति। चेष्टयेति परशरीरे समवायेन चेष्टानुमितस्यावच्छेदकतया प्रयत्नस्य समवायेनाश्रय आत्मैवेति भावः। आत्मनो मनोमात्रजन्यज्ञानविषयत्वे हेतुमाह। रूपाद्यभावेनेति। विभुत्वमिति। कालखात्मदिशां सर्वगतत्वं परमं महत्त्व इत्यनेनात्मनि परममहत्त्वस्योक्तेः।

९४

मु॰ टी॰
५९

नरुत्तयमासंख्याह। तत्त्वेति। सर्वमुक्ताइति। बुद्ध्यादिषट्कं संख्यादिपंचकं भावनातथा। धर्माधर्मौ गुणा एते आत्मनः स्यु
श्चतुर्दश। एतेन साधर्म्यप्रकरणे कथिता इत्यर्थः॥ ॥इति श्रीमन्नारद्वाजकुलोद्भवबालकृष्णभट्टतनूजमहादेवभ
ट्टकृतौ मुक्तावलीप्रकाशे द्वितीयः परिच्छेदः॥२॥ ॥श्रीरस्तु॥ ॥मूले बुद्धिस्तु द्विविधामता। अनुभूतिः स्मृतिश्च
स्यादिति। तत्रानुभूतिः प्रत्यक्षमात्रमेकैवेति चार्वाकाः। अनुमितिरपीति कणादसुगतौ। उपमितिरपीति केचिन्नै
यायिकैकदेशिनः। अर्थापत्तिरपीति प्राभाकराः। अनुपलब्धिरपीति भट्टवेदांतिनश्च। संभवैतिह्यरूपापीति
पौराणिकाः। तत्सर्वमनुचितमिति सूचयितुमनुभूतेश्चातुर्विध्यमाह। अनुभूतिश्चतुर्विधेति। अनुमितावुपमितौ मिश्च
कथयामि प्रतीतिसिद्धानामनुमित्यादीनामंगीकारतया चार्वाकोदितमयुक्तं। अर्थापत्तेस्त्वनुमितावंतर्भावो व्यतिरेकिग्रंथे व्य
क्तीभविष्यति। अनुपलब्धेस्त्वभाव एवांतर्भावः। अन्यासां च यथायथमनुमित्यादावंतर्भाव इति भावः। उद्देशानुक्रमा
त्तु प्रथमोपस्थितत्वात्प्रत्यक्षं लक्षयति। मुक्तावल्यां इंद्रियजन्यमिति। इंद्रियजन्यत्वमिंद्रियरूपादावप्यस्त्यतो ज्ञानमिति।
अनुमित्यादावतिव्याप्तिवारणायेंद्रियजन्यमिति। इंद्रियविशेषणे दत्ते त्वनुमित्यादावतिव्याप्तिस्तदवस्थैवेत्याशंकते। यद्य
पीति। नन्विंद्रियजन्यत्वाभावादीश्वरप्रत्यक्षेऽव्याप्तिरत आह। ईश्वरप्रत्यक्षं त्विति। तथा च जन्यप्रत्यक्षमेव लक्ष्यमिति भावः।
ननु तस्यैव लक्ष्यत्वे किं मानमत आह। इंद्रियार्थेति। इंद्रियार्थसंनिकर्षोत्पन्नमित्यनेनेश्वरप्रत्यक्षमनुमित्यादि च व्यावर्तते। भ्रमव्या
रणायाह। अव्यभिचारीति। भ्रमभिन्नमित्यर्थः। एतावता प्रत्यक्षप्रमाया लक्षणमुक्तं तद्विभागमाह। अव्यपदेश्यमिति। निर्विक
ल्पकमित्यर्थः। ननु व्यपदेश्यपदेन कथं निर्विकल्पकलाभ इति वाच्यं। व्यपदेशः पदं वाच्यत्वं तदविषयकमित्यर्थो द्विविधज्ञाने
तत्त्वसंदर्यात्यमुपनीतं भासत इति प्राचीनमतानुसारेणात्। अत एव कणादं कणादनामानं मुनिमित्यादि तत्र ग्रंथोक्तं संगच्छ
तेन्ये

अन्य

टी॰ ९७

४९

97

ते। यद्वाव्यपदेशः शब्दप्रयोगः सन्तु विशिष्टज्ञानादेवेत्यव्यपदेश्यत्वेन व्यपदेश्य[illegible]ज्ञानर्हत्वेन निर्विकल्पकव्यावृत्तिलाभः। व्यवसाया
त्मकमिति। विशिष्टव्यवसायात्मकमित्यर्थः। विशिष्टज्ञानात्मकमिति यावत्। एवं च सूत्रे इंद्रियार्थसन्निकर्षोत्पन्नम
व्यभिचारि अव्यपदेश्यं व्यवसायात्मकमिति योजना बोध्या। अन्यथा लक्षणवाक्ये विभागबोधकपदेन व्यवधानाद
संगतेरिति। तथैवोक्तत्वादिति। ईश्वरप्रत्यक्षालक्ष्यत्वस्येवाभिप्रेतत्वादित्यर्थः। ईश्वरप्रत्यक्षस्य लक्ष्यत्वमभिप्रेत्याह।
अथवेति। ज्ञानाकरणकमिति। ज्ञानाजन्यमित्युक्तौ चाव्याप्तिः। विशिष्टज्ञानमात्रस्य विशेषणज्ञानजन्यत्वादतो ज्ञानाक
रणकमिति। अनुमित्यादौ व्याप्त्यादिज्ञानस्य करणत्वमस्त्येवेति नानुमित्यादावतिव्याप्तिः। अकरणकत्वादेव च ईश्वरज्ञा
नसंग्रहः। अथ निदिध्यासनद्वारा मननादिज्ञानकरणके योगिप्रत्यक्षे लक्षणमिदमव्यापकमिति चेन्न। ज्ञानाकरण
कपदेन ज्ञानत्वगर्भधर्मावच्छिन्नकरणत्वाभावस्य विवक्षितत्वात्। नन्वेवं योगिप्रत्यक्षाव्यापकं। श्रवणादिप्रति
पत्तीनां शाब्दत्वादिनैव जनकत्वेन विशिष्ट[illegible]त्वादिरिति। अथवा ज्ञानाकरणकत्वाव्यभिचारि जातिमन्न्यज्ञानत्व
मिह विवक्षितं। तादृशी च जातिरनुमितित्वादिरेवेति। एतेनानुमित्यादौ व्याप्तिज्ञानादेर्ज्ञानत्वेन कारणतानये ज्ञान
त्वघटितकारणतावच्छेदकधर्माप्रसिध्या असंभवोपि प्रत्युक्त इति। व्याप्तिज्ञानस्येति। एतच्चतुष्टयस्य करणत्वादि
त्यनेनान्वयः। न च स्मरणात्मकपरामर्शस्थले व्याप्तिज्ञानस्य करणत्वासंभव इति वाच्यं। तत्र व्याप्तिज्ञानस्य संस्कारद्वा
राहेतुत्वात्। न च ज्ञानपदस्य सविषयकत्वपरत्वमेवास्तां किं व्याप्तिज्ञानस्य संस्कारद्वारा हेतुत्वकल्पनेनेति वाच्यं। नैरु
व्याप्तिसंस्काराद्यनुमितेरनुदयात् सविषयकत्वस्यातिप्रसक्तत्वात् सादृश्यज्ञानस्य। सादृश्यप्रकारकज्ञानस्य। तत्र।
अनुमितेति। अनुमितिं लक्षयति। परामर्शेति। परामर्शत्वं च व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वं। तथा च व्याप्तिविशिष्टपक्षधर्म
सा त।

=वन्हिव्याप्यधूमवत्पर्वतवानयं देश इति बोधस्य ३

पु.६६. ५०

ताज्ञानजन्यं ज्ञानमनुमितिरिति फलितं । भवति हि वह्निव्याप्यधूमवान्पर्वत इति ज्ञानं व्याप्तिविशिष्टपक्षधर्मताज्ञानं तज्ज
न्यं पर्वतो वह्निमानिति ज्ञानमिति लक्षणसमन्वयः । यद्यपीत्यादि प्रत्यक्षादिकमित्यादिना विशेषणतावच्छेदकप्रकारक
निश्चयविधया परामर्शजन्यस्य विशिष्टवैशिष्ट्यबोधस्य परिग्रहः । परामर्शजन्यमिति । विषयविधया तत्र परामर्श
र्शस्य हेतुत्वादिति भावः । तो हरोति । कथितनिश्चयजन्यहेतुत्वविषयके १ दोषो चिल्लेति । धूमवान्पर्वतो वह्निमानित्य
नुमितौ पक्षतावच्छेदकविधया धूमस्य भानादिति भावः ॥ १ स्यर्थः । सत्तामादायाति व्याप्तिरतोऽनुभवत्वव्याप्येति । अनु
भवत्वं न्यूनवृत्तित्वं तदर्थः । तेन नानुभवत्वजातिमादाय प्रत्यक्षादावतिव्याप्तिः । जातिमत्त्वं च समवायेन विवक्षितं ।
तेन कालिकसंबंधेन जातिमति कालेनातिव्याप्तिः । पक्षधर्मतायाः अप्रवेशेन लाघवाल्लक्षणान्तरमाह । अथवेति । अ
नापि साध्यतावच्छेदकधर्मसाध्यतावच्छेदकसंबंधहेतुतावच्छेदकधर्महेतुतावच्छेदकसंबंधानामननुगमादेकव्या
प्त्युपादाने न्यानुमितावव्याप्तेरेकां व्याप्तिमुपादाय तज्ज्ञानकरणकत्वस्यानुभवत्वव्याप्यजातिमत्त्वं विवक्षणीयं । न
न्वनुमितिं प्रत्यपि व्याप्तिज्ञानत्वेन न करणत्वं किं तु ज्ञानत्वेन मनस्त्वेनैव वा । एवमुपमित्यादावपि मनस्त्वेनैव करण
त्वं । न च कार्यवैजात्यं न स्यादिति वाच्यं । सामग्रीवैलक्षण्यादेव तदुपपत्तेः । न च प्रमाणविभागानुपपत्तिः । क्रियावि
शेषात्तदुपपत्तेरतः पूर्वोक्तानुमित्यादिलक्षणानामसंभव इत्यत आह । वस्तुत इति । घटेति व्याप्तिवारणाय स्वसं
ते । स्वसंतं समवायेन विवक्षितं । तेनानुमितौ कालिकेन घटत्वस्य सत्त्वेपि नातिव्याप्तिः । ज्ञानत्वानुभवत्वमाद
य प्रत्यक्षादावतिव्याप्तिवारणाय विशेष्यदलं । ननु मनसः करणतापक्षे ज्ञानाकरणकत्वं प्रत्यक्षलक्षणमनुमित्या
दावतिव्याप्तमतः प्रत्यक्षस्य लक्षणान्तरमाह । एवमिति । प्रत्यक्षत्वादिकमिति । यत्किंचिदुपमितिव्यक्तिमादाय तद्व्यक्तिवृ
त्ति प्रत्यक्षासमवेतजातिमत्त्वं । यत्किंचिच्छाब्दबोधव्यक्तिमादाय तद्व्यक्तिवृत्ति प्रत्यक्षासमवेतजातिमत्त्वं शाब्दबोधत्वं

६.१५. ५०

निर्वाच्यमित्यर्थः। शब्दत्वेनेत्यनुमित्यादीनां लक्षणकथनमनुपपन्नं तदसंगीकारेण तदनंगीकारे तद्व्यक्तिसमवेतस्मरणा
समवेतधर्मसमवायित्वरूपस्य लक्षणचतुष्टयस्यैकशब्देन वक्तुं शक्यत्वादिति ध्येयं। उक्तसूत्रेति। इंद्रियार्थसन्नि
कर्षोत्पन्नमित्याद्युपदर्शितसूत्रानुसारादित्यर्थः। घ्राणस्य निर्विषयकत्वादाह। गंधाश्रयेति। सुरभित्वादीत्यादिना अ
सुरभित्वपरिग्रहः। तद्वृत्तीति। गंधवृत्तीत्यर्थः। उद्भूतपदस्य फलमाह। ग्राह्येति। ऊष्मादावित्यादिना चूर्णप्रविष्टतेजःप
रिग्रहः। न तत्प्रत्यक्षं। नोष्मादिगतरूपप्रत्यक्षं। न्यूनतां परिहर्तुमाह। प्रथमेत्यादिकमपीति। आलोकसंयोगेति। एतस्य च
कारणत्वमंधकारे चाक्षुषापत्तिवारणाय उद्भूतरूपस्य तु पिशाचादीनां प्रत्यक्षवारणायेत्यवधेयं। तयोः उद्भूतरूपालोक
संयोगयोः। रूपभिन्नस्य रूपत्वादेस्त्वगिंद्रियेणाग्रहणादाह। रूपत्वादिभिन्नमिति। आदिना नीलत्वादीनां परिग्रहः। उ
व्याप्यमिति। पूर्वान्वयिनं तु नरान्वयीति बोधयितुम्। रूपमत्रापि कारणं द्रव्यप्रत्यक्षत्वे इत्यंतप्रतीकधारणं। शंकते। बहि
रिंद्रियेति। ननु शब्दाभावे कारणाभावस्य प्रयोजकतया गगनादेर्बहिरिंद्रियजन्यप्रत्यक्षाभावरूपाभावस्य शब्दाभावयोः
प्रयोजकत्वकल्पने गौरवात्तादृशप्रत्यक्षे रूपत्वेन हेतुतां कल्पयित्वा तदवच्छिन्नाभाववत्त्वेनैव तादृशप्रत्यक्षाभावप्रयोज
कत्वमुचितमित्यत आह। आत्मसाक्षात्त्वेति। आत्मनो बहिरिंद्रियजन्यप्रत्यक्षवारणायात्मवृत्तीति। आकाशस्य बहिरिंद्रियज
न्यप्रत्यक्षवारणाय शब्दभिन्नेति। कालादेस्तद्वारणाय विशेषेति। शंकते। रूपस्येति। पुनः शंकते। उद्भूतेति। प्रतिबंधो नश्यति।
उद्भूतेति। उपसंहरति। तस्मादिति। ननु त्रुटेः स्पार्शनानंगीकारात्तत्स्पार्शनवारणाय स्पर्शान्यत[illegible]समवेतस्पार्श
नं प्रति त्वक्संयुक्तस्पार्शनेनत्समवायत्वेन हेतुत्वस्य वाच्यतया वायोः स्पार्शनानंगीकारेणोचितः [illegible]वायुगतसं
ख्यापरिमाणयोः त्वग्ग्रहणप्रसंगादित्यत आह। वायुप्रभयोरिति। प्रभोपादानं दृष्टांतार्थं। अत एवेति। तथा च वायु
गतसंख्यादिग्रहे इष्टापत्तौ वायोः स्पार्शनानंगीकारे बाधकाभाव इति भावः। क्वचिदिति। सजातीयसंवलनाभावस्य

७

१०२

र्थः। आदिपदात्परिमाणपरिग्रहः तद्ग्रहश्च भूयोवयवावच्छेदेन त्वगिंद्रियसन्निकर्षस्य कुक्षे बोध्यः। ननु सजातीयसंवल
नदशायां भूयोवयवावच्छेदेन त्वगिंद्रियसन्निकर्षाभावे च कथं न वायुगतद्वित्वपरिमाणयोर्ग्रह इत्यत आह। क्वचित्सं
ख्यापरिमाणे तिरोषादिति। सजातीयसंवलनत्वादिरूपाद्दोषादित्यर्थः। आधुनिकास्त्वनेनोत्स्वरसस्तद्बीजं तु वायोः प्रत्य
क्षतासंदेहेन लाघवान्मूर्तत्वप्रत्यक्षत्वावच्छिन्नं प्रतिरूपत्वेनैव कारणत्वमुचितं। न च वायुप्रत्यक्षतासंदेहाधीनव्यभिचा
रसंदेहस्य प्रतिबंधकस्य सत्त्वात्कथं कारणताग्रह इति वाच्यं। लाघवतर्काभावविशिष्टस्यैव व्यभिचारसंदेहस्य प्र
तिबंधकतया प्रकृते च सर्वोक्तलाघवतर्कस्य सत्त्वेन तदभावविशिष्टव्यभिचारसंदेहाभावस्य सत्त्वात्। यत्त्वोक्तं प्रभाया
अप्रत्यक्षत्वे विशेषणितिरस्यैव किं न स्यादिति तदपि न उपरिदेशे विहंगम इत्यत्र प्रभामंडलस्यैवोपरिदेशतया तत्स्यस्व
विनोपरिदेशे विहंगम इति प्रत्यक्षानुपपत्तेरित्यादिकमिति। ज्ञानसामान्ये। जन्यज्ञानसामान्ये। ज्ञानाजननमिति प्रमा
णमित्यनुषज्यते। चक्षुरादीत्यादिना त्वगादिपरिग्रहः। तदभावादेव। चक्षुरादिनामनोयोगाभावादेव। ज्ञानादेरभावा
देव नमानसमिति। अत्र ज्ञानादेर्नमानसमित्यन्वयः। अभावादित्यत्रापि ज्ञानादेरित्यस्यान्वयो बोध्यः। न प्रत्यक्षमिति। यो
ग्यगुणसंबंधेनैवात्मनः प्रत्यक्षत्वी तारायोग्यविशेषगुणप्रत्यक्षसामग्र्यंतर्गतस्य ज्ञानादेरभावादेवनात्मप्रत्य
क्षमि[illegible]त्यर्थः। उद्बोधकाभावादिति। उद्बोधकस्य फलबलकल्प्यत्वादिति भावः। इच्छादिव्यक्तेरिति। इच्छाया आदि
रितिन्युसस्या ज्ञानमत्र विवक्षितं तेदतींद्रियत्वे। ज्ञानातींद्रियत्वे। ननु सुषुप्तिप्राक्कालीनज्ञानस्य निर्विकल्पकरूपत्वात्त
दतींद्रियत्वमनुभवयवादिसिद्धमेवेत्यत आह। सुषुप्तिप्राक्काले इति। त्वङ्मनःसंयोगस्य चेति। तदस्वीकारे चाक्षुषमपि न स्या
दिति भावः। ननु चाक्षुषादिसामग्र्या स्पार्शनं प्रति प्रतिबंधकत्वादेव न स्पार्शनं तत्रेत्यत आह। परस्परेति। अनुभवानुरो
धादिति। अनुभवस्य त्वयापि स्वहस्तितत्वादन्यथा इष्टापत्त्यादिना त्वदुक्तापत्तेरसंगतत्वापातादिति भावः। मिश्रमतमा

५९

साह। अन्ये त्विसादिना। सुषुप्त्यनुरोधेन। सुषुप्तौ ज्ञानानुत्पादानुरोधेन। इत्थं च चाक्षुषादिकाले सर्वोक्तास्पार्शनापत्तिरपि न
भवतीत्याह। चाक्षुषादीति। अत्र नव्याः। सुषुप्त्यव्यवहितप्राक्काले ज्ञानोत्पत्तिर्यदि स्यात्तदपि तत्सत्त्वाक्षपत्तिभिया त्वङ्मनोयो
गस्य चर्ममनोयोगस्य वा हेतुत्वं सैव तु न युक्तिसिद्धा। तथाहि। सुषुप्त्यनुकूलमनःक्रियया मनसा आत्मनो विभागस्ततः आ
त्ममनःसंयोगनाशस्ततः पुरीतद्रूपोत्तरदेशेन मनसा [illegible] संयोगरूपा सुषुप्तिरुत्पद्यते एवं च सुषुप्त्यव्यवहितपूर्वक्षणे आ
त्ममनःसंयोगरूपासमवायिकारणनाशात् कारणे ज्ञानोत्पत्तेरभावात्। असमवायिकारणस्य कार्येण सहभावेन हेतुत्वात्। यदि च
कार्यनाशजनकनाशप्रतियोगिन एवासमवायिकारणस्य कार्येण सहभावेन हेतुत्वमिति मन्यते तथापि न सुषुप्त्यव्यवहितप्रा
क्काले सन्न ज्ञानव्यक्तेः सुषुप्तिकाले प्रत्यक्षापत्तिभिया त्वङ्मनःसंयोगादेर्हेतुत्वं विजातीयात्ममनःसंयोगहेतुत्वेनैव तत्सत्त्वा
रणात्। न चैवं आत्मना त्वमनःसंयोगस्य त्वङ्मनःसंयोगस्य वा हेतुत्वमित्यत्र विनिगमकाभावः। त्वङ्मनःसंयोगादेरवच्छेदक
तासंबन्धेन हेतुतापेक्षया समवायेनात्मसंयोगस्य तत्त्वे लाघवात्। त्वङ्मनःसंयोगहेतुत्वे चाक्षुषादिसामग्र्याः स्पार्शनप्रति
बंधकत्वकल्पने गौरवाच्च। एतेन यत्र मनःक्रियया न पुरीतति संयोगरूपा सुषुप्तिः किं तु पुरीतति क्रियये वा संयुक्तेन
मनसा पुरीतति संयोगरूपा सुषुप्तिस्तत्र सर्वोक्तापत्तिवारणाय त्वङ्मनःसंयोगादेर्हेतुत्वमित्यपास्तं। पुरीतति क्रियाजन्यम
नःपुरीततिसंयोगस्य सुषुप्तित्वाभावाच्च। अत एव यदा त्वचं सन्त्यज्य मनः पुरीततिमनुविशति तदा निग्रंथकाराणां लेखः संगच्छत
इति वदन्ति। मनोमात्रस्य सार्वत्रिकत्वादाह। मनोजन्येति। मनोमात्रजन्येत्यर्थः। न्यूनतां परिहरति। एवमिति। निर्विकल्पके
प्रमाणं दर्शयति। चक्षुःसंयोगादीति। विशेषणज्ञानस्य कारणत्वादिति। कदाचिद्घट इत्याकारकं स्वरूपतो घटत्वप्रका
रकं कदाचित्तु जातिमानिति जातित्वेन घटत्वप्रकारकं ज्ञानं जायत इत्यनुभवसाक्षिकं तन्निर्वाहाय घटत्वांशे न्यायप्रकारकं तु

घटत्वप्रकारक १

102

मु. टि.
५२

दीताहृशघटत्वज्ञानत्वेन घटत्वांशेऽजातित्वप्रकारकघटत्वविशिष्टबुद्धौ च ताहृशघटत्वज्ञानत्वेन हेतुत्वस्यावश्यकत्वादि टि. भ.
तिभावः। वैशिष्ट्यानवगाह्येवेति। वैशिष्ट्यनिष्ठसांसर्गिकविषयताभिन्नत्वमेवेत्यर्थः। वैशिष्ट्यसांसर्गिकविषयतानिरू
सैनेव घटघटत्वयोर्विशेष्यताप्रकारताभिन्नत्वं [illegible] यो वैशिष्ट्यसांसर्गिकविषयतानियतत्वात्। न चैवं नि
र्विकल्पकस्य निर्विषयकत्वापत्तिः। तुरीयविषयताया एव तत्रांगीकारात्। एतेन निर्विकल्पकस्य घटघटत्वाव
गाहित्ववद्वैशिष्ट्यावगाहित्वमपि दुर्वारं घटेन्द्रियसन्निकर्षकाले इन्द्रियसंबद्धविशेषणतया तद्वैशिष्ट्यसत्त्वा
दिति वैशिष्ट्यानवगाहित्वोक्तिरसंगतेत्यपास्तं। वैशिष्ट्यानवगाहित्वे सेवकारेण [illegible]नीयविशेषणज्ञानस्य वैशिष्ट्या
वगाहित्वे तस्यापि विशिष्टबुद्धितया विशेषणज्ञानांतरसापेक्षता स्यादेवं तस्यापि वैशिष्ट्यावगाहित्वे इत्यनवस्थाभिया प्रा
थमिकविशेषणज्ञानं वैशिष्ट्यानवगाह्येव स्वीकार्यमिति सूचितं। तदेव। ताहृशविषयतात्रयभिन्नत्वमेव। निर्विकल्पकं।
निर्विकल्पकस्वरूपं। लक्षणं तु प्रकारताभिन्नत्वादिकं प्रत्येकमेवेति ध्येयं। निर्विकल्पके मूलोक्तमतीन्द्रियत्वं साध
यति। तथाहीत्यादिना। ज्ञानस्य प्रत्यक्षं विषयानवगाहि न भवतीत्यन्वयः। इति प्रत्यादिति। इति घटाद्यवगाहित्वे
तन्त्र५ नैव ज्ञानप्रत्यक्षस्यानुभवसिद्धत्वादित्यर्थः। घटमहं जानामीति प्रत्यये। विशिष्टवैशिष्ट्यज्ञानं ज्ञानेन संभवतीति।
न च विशेष्ये विशेषणमिति रीत्यैव निर्विकल्पकानुव्यवसायोऽस्त्विति वाच्यं। रक्तः पटो घटोऽयमिति समूहालंब ५४
नानंतरं रक्तं घटं जानामीति प्रतीत्यापत्त्या विशिष्टवैशिष्ट्यविषयताभिन्नज्ञानानुव्यवसायानभ्युपगमादिति। म
हत्त्वं षड्विधइतीति। यद्यपि श्रावणादौ महत्त्वस्य हेतुत्वे प्रयोजनाभावस्तथापि द्रव्यसमवेतप्रत्यक्षत्वादेस्तज्जन्यता
वच्छेदकस्य श्रावणादिसाधारण्याच्छ्रावणाद्यव्याप्तिनिवेशगौरवात्प्रयोजनाभावाच्च षड्विध इत्युक्तमिति ध्येयं। आ ५२

103

[ये]

[८८] मादिवारणेति। आत्मादौ योगित्वव्याप्तिरूपो दोषस्तद्वारणायेत्यर्थः। समवेतत्वेन च शब्दादितरे ये उद्भूतविशेषगुणाः
सुखादयस्तदाश्रयत्वस्यैवात्मनि सत्वान्नातिव्याप्तिरिति भावः। श्रोत्रे सत्वादिति। तथा च तत्राऽव्याप्तिरिति
भावः। विशेषपदस्य प्रयोजनं वक्तुं परमतमाह। उद्भूतत्वमिति। अनन्तकत्वानुपपत्तेरिति। एकैकस्य कारणता
वच्छेदकत्वे व्यभिचारात्कूटस्यैकत्राऽवृत्तितया कारणतानवच्छेदकत्वादिति भावः। तदभावकूटस्योद्भूतत्व
मिति। तथा च तादृशकूटस्य कारणतावच्छेदकत्वमिति नोक्तदोष इति भावः। इन्द्रियावयववारणायेति। मनःपदं
मिसनेनान्वितं। नवीनमते मनःपदप्रयोजनमाह। कालादाविति। समवायेन घटाद्यभावादीनां कालेनैतत्तत्सप्र [सत्येपि ६]
संसर्गयोग्यानुपलब्धेरभावादतो रूपाभावपर्यंतानुधावनं। तद्वारणायेति। कालादेर्वारणायेत्यर्थः। जन्यत्वघटि
[श्रोत्र ८] तस्य व्यापारत्वस्य शब्दसंबंधे समवायरूपेऽभावादाह। व्यापारः सन्निकर्ष इति। द्रव्यप्रत्यक्षमिति। द्रव्यवृत्तिलौ
किकविषयतासंबंधेन प्रत्यक्षमित्यर्थः। द्रव्यसमवेतेति। द्रव्यसमवेतवृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षमित्य
[समवेता ६] र्थः। एवमग्रेपीति। द्रव्यसमवेतवृत्तिलौकिकविषयतासंबंधेन प्रत्यक्षमिंद्रियसंयुक्तसमवायजन्यमित्यर्थः। ननु [समवेत ६]
द्रव्यप्रत्यक्षे इंद्रियसन्निकर्षत्वेन हेतुत्वे तत्र प्रभासंयोगाच्चाक्षुषापत्तिरेवमंधकारे घटचक्षुःसंयोगात्स्पार्शनाप
त्तिश्चेत्यत आह। वस्तुतस्त्विति। नन्वेवमात्मप्रत्यक्षानुरोधेन मनःसंयोगस्य ज्ञानादिप्रत्यक्षानुरोधेन मनःसंयुक्त
समवायस्य प्रत्यासत्तित्वेपि चक्षुरादिसंयोगतत्संयुक्तसमवाययोः प्रमाणाभावः चक्षुरादिसंयुक्तसमवेतस
[त्वे ८] मवायेनेन्द्रियाणुत्वादेश्चाक्षुषाद्युपपत्तेरत आह। परंत्विति। परंपरया स्वाश्रयसमवेतत्वादिसंबंधेन। उद्भूतरूपाव
[स्य ८] च्छिन्नमहत्वावच्छिन्नचक्षुःसंयुक्तसमवायेति। अत्र चक्षुर्घटितचक्षुःसन्निकर्षाद्युक्तत्वादीनां प्रत्यक्षवारणायोक्तेति॥

[वर]

मु० २६
५३

६० म०

तथाच महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य त्रसरेणावभावाच्चाक्षुषाद्यनुपपत्तिरतः संयोगस्य प्रत्यासत्तित्वमावश्यकमिति भावः। संयुक्तसमवेतसमवायेन संयुक्तसमवायस्यनान्यथासिद्धिरित्याह। द्रव्यसमवेतेति। ताद्दृशेति। महत्त्वावच्छिन्ने इत्यर्थः। तथाच महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्य त्रसरेणुरूपे ऽभावात्तच्चाक्षुषानुपपत्त्या संयुक्तसमवायस्य प्रत्यासत्तित्वमिति भावः। एतत्प्रसंगेन सर्वरूपावच्छिन्नसमये चालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे तत्संयोजने चाभिहितमिति बोध्यं। स्पार्शनप्रत्यक्षे त्वक्संनिकर्षस्य कारणत्वं प्रपंचयति। एवमित्यादिना। पूर्ववदेवेति। परमाणुघटितत्वक्सन्निकर्षेण स्पर्शस्य स्पार्शनवारणाय महत्त्वावच्छिन्नत्वं प्रभाघटितसन्निकर्षेण सत्त्वादिस्पार्शनवारणाय स्पर्शावच्छिन्नत्वादि विशेषणं बोध्यमित्यर्थः। श्रोत्रावच्छिन्नेति। सकलपुरुषाणां सर्वशब्दप्रत्यक्षापत्तिरतः श्रोत्रावच्छिन्नेति। इंद्रियसंबद्धेति। यद्यपि इंद्रियसंयुक्तविशेषणता इंद्रियसंयुक्तसमवेतविशेषणतेत्यादिक्रमेण बाहुल्यमेव तथापि विशेषणतात्वेनैकरूपेण विभागः। न चैवं समवायत्वेन चतुर्णामनुगमप्रसंगः परिभाषाया अपर्यनुयोज्यत्वात्। समवायो न प्रत्यक्ष इति। संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वादिति भावः। ननु विशेषणतया तदादियाद्यसंगतं विशेषणताप्रत्यासत्त्यैरनभ्युपगमे भावप्रत्यक्षानुपपत्तिरिति वाच्यमिष्टापत्तेरनुपलंभस्यैव तत्प्रत्ययस्योपगमान्न च समवायप्रत्यक्षानुरोधाद्विशेषणता प्रत्यासत्तिस्वीकारस्समवायानंगीकारादत एवाभावप्रत्यक्षे इंद्रियं न करणं किंतु योग्यानुपलब्धिरेवेति भट्टानामाक्षेपं दूषयितुमुक्तं यदि स्यादिति। तथाच इंद्रियेणाभावप्रत्यक्षे जननीये योग्यानुपलब्धेः सहकारितामात्रेण निर्वाहेऽतिरिक्तप्रमाणकल्पनमनुचितमिति भावः। तत्र योग्यानुपलब्धेरभावप्रत्यक्षहेतुत्वे युक्तिमाह। तथाहीति। घटादिज्ञाने। घटादिभ्रमे। न च घटभ्रमे हेतुदोष एव तत्सत्ति बाधकः। अन्यथा भ्रमोत्पत्तिरुपपत्तिरित्ता…

रत्तावात।५ न च तत्सत्त्वे ५
म०

५३

105

लेत दभावप्रत्यक्षापत्तेरितिवाच्यं । विनश्यदवस्थादोषा... भ्रमस्तत्र भ्रमो सन्निकाले प्रतिबंधकत्वात् तदेषाभाव
स्य सत्वादभावप्रत्यक्षापत्तेः । अभावोपलंभे । तदिंद्रियजन्यतासंबंधावच्छिन्नतदभावलौकिकप्रत्यक्षे प्रतियोग्युपलंभा
भावइति । तदिंद्रियजन्या नालर्यं तत्संसर्गकतत्प्रकारकोपलंभाभाव इत्यर्थः । इंद्रियांतरजन्ये आनुमानिके च तदु पलं
भेसत्यपि तदभावप्रत्यक्षात् तदिंद्रियजन्येति । अभावप्रत्यक्षहेतु प्रतियोग्यारोपसत्वेप्यभावप्रत्यक्षादनालर्यं ति ।
तत्र । प्रतियोग्युपलंभाभावे । अपेक्षितेति । तेन न जलपरमाण्वादौ पृथिवीत्वाभावादेः प्रत्यक्षमिति भावः । मणिकृ
न्मतानुसारेण योग्यतां निर्वक्ति । सा चेति । प्रसंजितः । आपादितः । सउपलंभो यो भावप्रत्यक्षे हेतुरिति । अत्र तदधिक
रणविषयकाभावप्रत्यक्षे तदधिकरणकतदापादकापत्तियोग्यतदुपलंभस्य विषयतासंबंधावच्छिन्नप्रतियोगिताका
भावो हेतुरित्यर्थः । उपलंभे तदधिकरणकतदापत्तियोग्यत्वं च तत्प्रतियोगिसत्वनिष्ठव्याप्तिनिरूपकत्वं । अत्र च तद
पादकापत्तिर्यत्र नोत्पन्ना तत्र तदभावप्रत्यक्षानुपपत्तिरिति योग्यत्वनिवेशः । न च प्रतियोगिसत्वस्योपलंभव्याप्यत्वं
न निर्विशेषितस्य उपलंभसामग्र्यं तद्विरहे प्रतियोगिसत्वेप्युपलंभाभावात् । किंतु महत्वोद्भूतरूपाद्यवच्छिन्नस्ये
वा एवं च महत्वादिविशिष्टपृथिवीत्वस्योपलंभव्याप्यत्वाज्जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिरिति वाच्यं । त
दधिकरणावृत्तिधर्मानवच्छिन्नत्वस्य योग्यताघटकीभूतव्याप्त्यंशे निवेशात् । महत्वस्य जलपरमाणववृत्तित्वेन
तादृशव्याप्तौ तादृशधर्मानवच्छिन्नत्वाभावात् । न च गंधवदणुभिन्नत्वविशिष्टस्यापि पृथिवीत्वस्य तदुपलंभव्या
प्यत्वात् गंधवदणुभिन्नत्वस्य जलपरमाणुवृत्तित्वात्तद्दोषतादवस्थ्यमिति वाच्यं । योग्यताघटकव्याप्तौ प्रतियोगिग्रा
हकातिरिक्तधर्मानवच्छिन्नत्वस्यापि निवेशात् । गंधवदणुभिन्नत्वादेश्च प्रतियोगिग्राहकातिरिक्तत्वेन तादृशधर्मा
नवच्छिन्नत्वस्य व्याप्तावभावात् । न च प्रतियोगिग्राहकत्वं प्रतियोगिग्रहजनकत्वं तच्च गंधवदणुभिन्नत्वपृथिवीत्वो

८४

भा६

106

पिशाचस्य   विषय

भय समूहालंबनात्मकज्ञानेकिकप्रत्यक्षेविधया हेतुत्वात् गंधवदणुभिन्नत्वस्याप्यक्षतमितिवाच्यं। प्रतियोगिप्रका
रतानिरूपितज्ञानेकिकविशेष्यताविरहप्रयोजकीभूताभावप्रतियोगित्वस्यैव प्रतियोगिग्राहकपदार्थत्वात्।
अथैवंप्रकारतानिरूपितलौकिकविशेष्यताप्रसिद्ध्यातद्घटितनिरुक्तयोग्यानुपलंभविरहात्तदभावप्रत्यक्षंन
स्यादितिचेन्न। नहिवयंसर्वत्राभावप्रत्यक्षेनिरुक्तयोग्यानुपलंभस्यहेतुत्वंब्रूमः। किंतुयोग्यस्याभावप्रत्यक्षे
अयोग्यपिशाचत्वाद्यभावस्यतदधिकरणेप्रत्यक्षेतुतदधिकरणीयत्वप्रसंजनप्रसंजितप्रतियोगिकस्तद
धिकरणीयत्वोपलंभस्यविषयतासंबंधावच्छिन्नाभावएवप्रतियोगिनिष्ठाहेतुः। अत्रापापादनस्यसर्वत्रा
संभवेनतदधिकरणीयत्वप्रसंजनप्रसंजितत्वंतदधिकरणीयत्वनिष्ठव्याप्तिनिरूपितत्वं। आतित्वादिविशिष्ट
स्यस्तंभवृत्तित्वस्योपलंभव्याप्यत्वात् स्तंभेपिशाचत्वाद्यभावप्रत्यक्षं। आतित्वविशिष्टस्यपिशाचवृत्तित्वस्योप
लंभाव्याप्यत्वान्नपिशाचेस्तंभत्वाभावप्रत्यक्षं एवंतादात्म्येनस्तंभवृत्तित्वपिशाचवृत्तित्वयोरुपलंभव्याप्यत्वा
व्याप्यत्वाभ्यांस्तंभपिशाचयोः पिशाचभेदस्तंभभेदयोः प्रत्यक्षत्वाप्रत्यक्षत्वेउपपादनीयइति। नचाक्षुषप्रत्यक्ष
मिति। अनुपलंभेविद्यमानेपिनिरुक्तयोग्यता। विशिष्टस्यतस्यतत्राभावादितिभावः। आपादयितुमशक्यत्वादिति। त
थाचसमानेंद्रियजन्योपलंभव्याप्यत्वस्ययोग्यताघटकत्वान्नतत्रचाक्षुषमितिभावः। नन्वात्मत्वादिविशिष्ट
स्यतेजोवृत्तित्वस्योपलंभव्याप्यत्वात्तेजसिगुरुत्वाभावप्रत्यक्षापत्तिरेवंस्तंभेपिशाचत्वाभावप्रत्यक्षवत्पिशाचे
भावस्यापिप्रत्यक्षापत्तिरतआह। गुरुत्वादिकमिति। आदिपदेनपिशाचादिपरिग्रहः। अयोग्यस्यपिशाचत्वा
दिजातेरभावस्यप्रत्यक्षत्वात् गुरुत्वादिकमित्युक्तं। नयोग्यः। नप्रत्यक्षविषयः। अशक्यत्वादिति। निरुक्तयोग्यता
घटकव्याप्तौप्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वस्यनिवेशात्। प्रकृतेचआतित्वविशिष्टतेजोवृत्तित्वस्योपलंभव्या

107

पत्वेऽपि जातित्वस्य गुरुत्वात्प्रवृत्तित्वेन तादृशव्याप्यत्वे प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वाभावादिति भावः। न च तद
धिकरणीयत्वप्रसंजनप्रवेशे तत्प्रतियोगिकत्वस्तदधिकरणीयत्वोपलंभस्याभाव एवेन्द्रियघटाभावादिप्रत्यक्षे हे
तुरास्तां किं प्रवेशेन योग्यानुपलंभहेतुतयेति वाच्यं। तथा सति परमाणवादौ महत्त्वाद्यभावप्रत्यक्षानुपपत्तेरिति। वाय
वुद्भूतरूपाभाववदिति। रूपत्वावच्छिन्नाभावस्यातीन्द्रियानुद्भूतरूपप्रतियोगिकत्वेन प्रत्यक्षासंभवादुद्भूतेति। एव
मादय इत्यादिना प्रभायामुद्भूतस्पर्शाभावपरिग्रहः। प्रत्यक्षे विषयत्वेन कारणत्वेन कारणत्वस्य क्लृप्तत्वात्तेनैव गु
रुत्वाद्यतीन्द्रियाभावप्रत्यक्षवारणे तदनुरोधेन तदधिकरणीयत्वेत्यादि व्यर्थं योग्यानुपलंभस्य हेतुता न स्वीकार्ये
त्यभिप्रायवान् संसर्गाभावे योग्यतामाह। संसर्गेति। प्रतियोगिनो योग्यतेति। योग्यमात्रप्रतियोगिकत्वे सति योग्य
धर्ममात्रावच्छिन्नप्रतियोगिताकत्वमित्यर्थः। अत्र द्रव्यसामान्याभाववारणाय मात्रेति। गुरुत्ववद्द्रव्यत्वं ताभाववारणा
य विशेष्यदले। रूपगुरुत्वान्यतरावच्छिन्नाभाववारणाय विशेष्यदले मात्रेति। अधिकरणयोग्यत्वमिति। योग्याधि
करणवृत्तित्वमित्यर्थः। उदंवाभावग्राहकयोग्यसन्निकर्षप्रदर्शनार्थं। तेन स्तंभ इव वायौ न पिशाचान्योन्याभा
वप्रत्यक्षमिति भावः। अन्योन्याभावे योग्यतानुयोगित्वावच्छिन्नप्रतियोगिताकत्वजातिरिक्तयोग्यधर्मानवच्छिन्नप्र
तियोगिताकत्वान्यतरदेव। तेन स्तंभे पिशाचान्योन्याभावपिशाचवदन्योन्याभावयोः प्रत्यक्षत्वाप्रत्यक्षत्वोपपत्ति
रित्यन्यत्र विस्तरः। धर्मत्वादिसामान्यलक्षणाया इन्द्रियजन्यत्वाभावाद्व्यापारत्वकथनमसंगतमत आह। व्यापारः स
न्निकर्ष इति। यद्यपि धर्मत्वादेरिन्द्रियप्रतियोगिकत्वाभावात्सन्निकर्षत्वमयुक्तं तथापि संयोगस्येन्द्रिय प्रतियोगि
कत्वात्तद्घटितस्येन्द्रियसंयुक्तविशेष्यकज्ञानप्रकारीभूतधर्मत्वादेः प्रत्यासत्तिता निर्वाहः। तत्र सामान्यस्य रूपं च॥

अत्र परीक्षा इन्द्रियं सामान्यं प्रत्यासत्तिरित्युच्यते तदेत्यर्थः।

संबद्ध १

मु॰ दि॰

५५

दि॰ प्र॰

ननु यत्र चक्षुःसन्निकर्षेण धूमज्ञानं जनितं तत्र चक्षुःसंयोगविगमेऽपि तादृशज्ञानमादायेन्द्रियसंबद्धविशे
षकज्ञानप्रकारस्य धूमत्वादेर्धूमान्तरे सत्त्वाद्धूमान्तराणां सामान्यलक्षणया ज्ञानापत्तिः। न च तदा धूमेनेन्द्रिय
संबद्धः ज्ञानलक्षणात्मकसन्निकर्षस्य धूमे सत्त्वात्। न च तत्रैक क्षणे सामान्यलक्षणाजन्यज्ञानस्वीकारे इ
ति विरह इति वाच्यं। तन्मते लौकिकज्ञानधारापत्तेर्दुर्वारत्वादित्यत आह। लौकिको ग्राह्य इति। अत्र लौकिकसन्निक
र्षस्य विशेषणविधया घटकत्वं बोध्यं। अन्यथा तत्र धूमे सर्वदा लीनचक्षुःसंयोगमादाय तद्दोषतादवस्थ्यमिति
ध्येयं। इदमुपलक्षणं। यत्र चक्षुःसंयोगे विद्यमानेऽपि दोषान्न धूमचाक्षुषं किंतु धूमत्वप्रकारकं स्मरणं तत्र धूमत्व
सामान्यलक्षणाजन्यज्ञानापत्तिवारणाय सामान्यलक्षणाघटकज्ञाने तादृशेन्द्रियजन्यत्वस्यावश्यकत्वात्। नन्वि
न्द्रियसंबद्धे सत्र लौकिकः संबंधः ज्ञानप्रकारे सत्र ज्ञानस्य तदिन्द्रियजन्यत्वं चेद्विवक्षितं तदाणुत्वेन यत्किंचि
दणुप्रत्यक्षितावणुत्वसामान्यलक्षणया सकला[illegible]णुगोचरो मानसबोधो न स्यात् तदाणौ मनसो लौकिकसं
बंधस्य ज्ञाने मनोजन्यत्वस्य चाभावादत आह। इदं चेति। तथा च बहिरिन्द्रियेण सामान्यलक्षणया ज्ञाने जननी
ये तद्विवक्षितं न तु मानससामान्यलक्षणाजन्यज्ञाने इति नोक्तदोष इति भावः। आसन्नेन्द्रियाणां [illegible]त्यादेरत्र
मवतारयितुं पक्षमिश्रं रचयति। परं त्वित्यादिना। [illegible] इत्यस्य ज्ञात इत्यनेनान्वयः। [illegible] नामित्यादिना
संयोगेन तद्वृत्त्यधिकरणद्रव्यांतरपरिग्रहः। तत्रेदं बोध्यमिति। ज्ञायमानमिति सामान्यं तत्र प्रत्यासत्तिर
ति बोध्यमित्यर्थः। परंपरया प्रत्यासन्नस्य घटत्वादेरेव प्रत्यासत्तित्वसंभवात्। किं त्वित्यादिना वक्ष्यमाणदोषा
संगतेराह। परं त्विति। तथा च घटत्वस्य परंपरया रूपाज्ञादावज्ञानाद्वक्ष्यमाणदोषसंगतिः तेन संबंधेनेति। अ
न्यथा समवायेन ज्ञानप्रकारीभूत घटत्वादिसामान्यप्रत्यासत्त्या [illegible]दिज्ञानापत्तेरिति भावः। किंत्विति। एवं

५५

109

चेत्यर्थः। किं चेति। कुतो न जन्यत इति। इदमापाततः। सामान्यलक्षणाघटकीभूतलौकिकसन्निकर्षस्य विशे
षणत्वविवक्षणेन कपालांतरीयसंयोगमादायोक्तातिप्रसंगस्याभावादिति। तस्मात्पूर्वोक्तदोषएवात्र कल्प्ये बोध्यः।
न च तत्र स्वसमवायिसमवायादिसंबंधेन घटत्वादेरेवासत्तितया पूर्वोक्तदोषोपि न संभवतीति वाच्यं। स्वसम
वायिसमवायादिना घटत्वरूपादेर्न ज्ञातं किंतु तद्घटत्वेन समवायादिना ज्ञातत्वस्य उत्तरमपि तद्घटाश्रयरूपा
त्मनो ज्ञानस्य सर्वानुभवसिद्धस्य घटत्वप्रत्यासत्त्या उपपादनासंभवात्। एवं ज्ञायमानसामान्यस्य प्रत्यासत्ति
त्वे चैत्रीयज्ञानविषयसामान्यप्रत्यासत्त्या मैत्रस्य तदाश्रयप्रत्यक्षापत्तिभिया तत्पुरुषीयत्वनिवेशस्यावश्यकत
या गौरवं ज्ञानस्य प्रत्यासत्तित्वे तु पुरुषनिष्ठप्रत्यासत्त्या हेतुत्वान्न तत्पुरुषीयत्वनिवेश इति लाघवमित्यपि बोध्यं।
तेन सामान्यविषयकं ज्ञानमिति। इंद्रियसंबद्धविशेष्यकं सामान्यप्रकारकं ज्ञानमित्यर्थः। यद्वा। सामान्यविषय
कं ज्ञानमात्रमित्यर्थः। सामान्यविषयकज्ञानत्वं प्रत्यासत्तितावच्छेदकमिति यावत्। तथा चात्र कल्पे इंद्रियसंबद्ध
विशेष्यकत्वप्रकारकत्वादींद्रियजन्यत्वानि ज्ञानविशेषणानि नोपादेयानीति। पूर्वमते तु तदिंद्रियजन्यत्वादेर्निवेशे
नैकविधभेदेन कार्यकारणभावकल्पनेन च गौरवमिति भावः। एतन्मते च निर्विकल्पकसाधारणं स्मरणसाधार
णं च सामान्यज्ञानमात्रं प्रत्यासत्तिस्तथा च घटत्वप्रकारकप्रत्यक्षत्वं कार्यतावच्छेदकं घटत्वज्ञानत्वं च कारणतावच्छे
दकं। स्वप्रकारीभूतघटत्वाश्रयत्वं कार्यतावच्छेदकः संबंधः। स्वविषयघटत्वाश्रयत्वं च कारणतावच्छेदकः संबंधः। च
क्षुःसंयोगादिभ्रमस्थले सर्वोक्तातिप्रसंगस्य वक्ष्यमाणतदिंद्रियजत्वादेर्नैव कारणादिति ध्येयं। अणुत्वज्ञानमात्रे
णैव तत्र लगणुगोचरमानसबोधोदयाद्दाह। बहिरिति। आलोकसंयोगादिकमित्यादिना दोषाभावपरिग्रहः। नञ्

1109

मु.दि.
५८

ण्यत इति। अयमाशयः। यदा घटे चक्षुःसन्निकर्षादिघटिता चाक्षुषादिसामग्री तदुत्तरक्षणे घट इति चाक्षुषं सैव सामान्यलक्ष
णा तयोत्तरक्षणे सकलघटविषयकं ज्ञानं जन्यत इति प्राचीनमते क्षणे कुविलंबः कल्प्यते। तत्र च मानाभावः। यदैव
घट इति चाक्षुषमुत्पद्यते तदैव सन्निकृष्टघटांशे लौकिकमन्यघटांशेऽलौकिकमित्युपगमात्। तथा च सामान्यलक्ष
णाऽन्यघटत्वप्रकारकचाक्षुषस्य व्यापकं घटत्वप्रकारकलौकिकचाक्षुषत्वमिति फलितं। तथा च चक्षुःसन्निकर्षा
दिरूपान्यकाले व्यापकधर्मावच्छिन्नजनकसामग्र्याः सहकारिण्या विरहादेव न चाक्षुषं सामान्यलक्षणया ज्ञान
मिति। यदि ज्ञानरूपेति। अत्रासौ यदिशब्दः सामान्यलक्षणापीत्युत्तरंयोऽन्वयः। सामान्यलक्षणास्वीकारे बीजमाह। अ
त्रेति। अयमर्थः। अयमभिप्रायः। भानं विषयता न संभवतीति प्रत्यक्षविषयतायाः सन्निकर्षाश्रयत्वव्याप्यत्वादि
ति भावः। वह्निसंबंधस्याग्रहीतत्वादिति। तथा च प्रत्यक्षधर्मे व्याप्तिनिर्णये तत्सामान्ततद्विशेष्यको व्याप्यत्वसंशयः संभ
वतीति भावः। अनुपस्थितत्वादिति। तथा च धर्मिज्ञानाभावान्न तद्विशेष्यकोऽपि व्याप्यत्वसंशयः संभवतीति भावः।
ज्ञानलक्षणास्वीकारे बीजमाह। एवमित्यादिना। कथं स्यादिति। चंदनखंडस्य चाक्षुषे जायमाने उपस्थितसौरभ
भानं न स्यात् सौरभांशे चक्षुःसन्निकर्षाभावादित्यर्थः। सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याः सहकारिण्या
विरहेण सौरभत्वसामान्यलक्षणयापि सौरभभानं न संभवतीति भावः। सुरभि चंदनमित्यादौ सौरभादेर्भानं
सौरभत्वादिसामान्यलक्षणयैव संभवति सौरभत्वप्रकारकलौकिकप्रत्यक्षसौरभत्वावच्छिन्नप्रकारकप्रत्यक्षा
न्यतरसामग्रीसहकारेणैव तस्याः फलजनकत्वांगीकारात्। प्रकृते च द्वितीयसामग्र्याः सहकारिण्याः सत्त्वादित्यभि
प्रायेणाह। यद्यपीति। सौरभत्वस्य भानमिति। स्वरूपतः सौरभत्वस्य भानमित्यर्थः। ज्ञानलक्षणया। ज्ञानलक्षे

दि.भ.
५८

111

णायेन । तदानीं सौरभत्वांशे धर्मांतरस्याग्रहीततया सामान्यलक्षणयातज्ञानानिर्वाहादिति भावः । ननु धर्मांतरस्य सौरभत्वां
शेऽग्रहेपि सौरभत्वसामान्यलक्षणयैव सौरभत्वादेर्भानमस्तु सौरभत्वप्रकारकसौरभविशेष्यकत्वस्यैव तत्कार्यता
वच्छेदकत्वादिति चेन्न । सौरभत्वादिविषयताप्रयोजिकायाः स्वविषयसौरभत्वादिमत्वरूपसामान्यलक्षणायाः सं
बंधस्य सौरभत्वेऽभावेन सामान्यलक्षणयातज्ञानानिर्वाहात् । सौरभत्वसामान्यलक्षणायाः कार्यतावच्छेदके सौरभत्व
प्रकारकत्वनिवेशे प्रयोजनाभावाच्च । ननु ज्ञानलक्षणायाः कारणतांतरकल्पने गौरवभियैव सामान्यप्रकारकत्वस्य
कार्यतावच्छेदके प्रवेशः इति शंक्यं । विशेषणज्ञानहेतुतयैव निर्वाहे ज्ञानलक्षणायाः कारणत्वांतरकल्पनाविरहादिति । ननु
विशेषणज्ञानजन्यतावच्छेदकं विशिष्टबुद्धित्वं ज्ञानलक्षणायास्तु विशिष्टप्रत्यक्षत्वमिति न क्लृप्तेन निर्वाहः । एवं यत्र ज्ञा
नलक्षणया स्वविषयमुख्यविशेष्यकं मानसं तत्र विशेषणज्ञानकरणतया नानिर्वाहस्य तदौहः एवमिति । ज्ञानलक्ष
णया । ज्ञानलक्षणयैव । तत्र धर्मत्वज्ञानरूपसामान्यलक्षणायाः स्वविषयधर्मत्वाश्रयत्वसंबंधेन धूलीपटलेऽभा
वेन सामान्यलक्षणयाऽनुव्यवसाय धूलीपटलभानासंभवादिति भावः । सर्वदेवेति । ध्यानाद्यभावेपीत्यर्थः ॥ ॥

॥ इति श्रीमद्भारद्वाजकुलोद्भवबालकृष्णभट्टतनूजमहादेवभट्टकृतौ मुक्तावलीप्रकाशे प्रत्यक्षखंडः ॥

॥ श्रीरस्तु ॥ ॥ श्रीकृष्णचरणाभ्यां नमः ॥ श्रीयादवेंद्राय नमः ॥ ॥ ॥ ॥

॥श्रीगणेशाय नमः॥ अनुमितिमिति। संगतिश्चात्र प्रसङ्गेणोपजीव्योपजीवकभावो बोध्यः। करणे निर्दिष्ट एव व्या
पारे जिज्ञासोदयात् तत्र पश्चान्निर्दिष्टमपि करणं प्रथमं दर्शयति। व्याप्तिज्ञानमिति। परामर्शो व्यापार इति। ननु
व्यापारत्वं तज्जन्यत्वे सति तज्जन्यजनकत्वं तच्च परामर्शे न संभवति। वह्निव्याप्यधूमवान् पर्वत इति परामर्शे
व्याप्तिज्ञानजन्यत्वस्याभावात् महानसीयवह्निधूमव्याप्तिज्ञानस्य तदानीमभावेन व्यभिचारादतस्तदुपपाद
यति। तथा हीत्यादिना। पश्यतीति। धूमदर्शनस्य व्याप्तिस्मरणोद्बोधकविधया हेतोः संपत्त्यर्थं यादृशविशेष
णविशिष्टस्य धूमस्य व्याप्तिसंबंधितया ज्ञानं तादृशधूमदर्शनस्यैव व्याप्तिस्मृतावुद्बोधकत्वमित्यभिप्रायेणा
नवच्छिन्नत्वमुक्तं। एवंरूपं स्मरणमिति। उद्बुद्धसंस्कारस्य पूर्वसत्त्वादिति भावः। स एव परामर्श इति। तथा च स्म
रणात्मकव्याप्तिज्ञानस्य पूर्वसत्त्वान्न व्यभिचार इति भावः। न च तथापि यत्र व्याप्तिघटकपदार्थो नो विभ्रं खलोप
स्थितिस्तत्रो विशेषाविशेषणमिति रीत्या परामर्शस्तत्र विशिष्टव्याप्तिज्ञानस्य व्यभिचारो दुरुद्धर एवेति वाच्यं।
व्यापकत्वे निश्चयतानिवेशप्रयुक्तलाघवेन विशिष्टस्य वैशिष्ट्यमिति रीत्या परामर्शस्यैवानुमितिहेतुत्वात् तस्य
मिप्रायात्। स्मरणात्मकपरामर्शे व्याप्तिज्ञानस्य व्यभिचारस्त्वपि न। संस्कारसंबंधेन पूर्वं व्याप्तिज्ञानस्य सत्त्वात्
व्याप्तिज्ञानत्वस्य परामर्शत्वव्यापकतयाऽनुमितिं प्रति हेतुत्वमेव नास्ति कुतः करणत्वं अन्यथा कपालादेर्घटं प्रति
द्रव्यत्वेन हेतुतापत्तिस्तस्मादनुमितिं प्रति मनस्त्वेनैव करणत्वमाहुः। लिंगमनुमितिकरणमिति। अनुमि[illegible]तो
परामर्शमात्रेण हेतुरपि तु लिंगपरामर्शः। तथा च विशिष्टस्य कारणतायां विशेषणस्यापि कारणताग्रहात् परामर्श्य
माणलिंगस्य लिंगपरामर्शस्य वा हेतुत्वे विनिगमनाविरहादुभयोर्हेतुता सिद्धा तत्र च व्यापाराभावान्न पराम
ज्ञानमात्रं

अत्र नव्याः। ५

व्याप्तिप्रकारकज्ञानत्वस्य - ४

113

मुक्ता०

५८

समवायसंबंधेन ४

र्शस्य करणता किंतु लिंगस्यैवेत्याशयः। लिंगस्य तदानीमभावादिति। न च परामर्शरूपव्यापारसंबंधेन तदानीं लिंगमस्त्ये
वेति वाच्यं। अतीतादिलिंगस्य परामर्शाजनकतया परामर्शस्य तद्व्यापारत्वासंभवात्। इदमुपलक्षणं। लिंगस्य हेतुत्वे
वैन्यायपरामर्शविषयात्तुल्लिंगान्नैऽस्यानुमितिप्रसंगः। तत्तद्रूपीयत्वनिवेशे गौरवम्। असम्मतेतु सामानाधि
करण्यप्रसाससाहेतुहेतुमद्भावेन वातिप्रसंगाभावान्न तत्तद्रूपीयत्वनिवेशनमिति लाघवमिसपिबोध्यं। तत्र
व्याप्यस्य पक्षेण सह वैशिष्ट्यावगाहि ज्ञानं च। ननु परस्परं व्यभिचार इत्यत आह। अनुमितित्विति। कार्यतावच्छे
दकस्य परस्परानुमितिव्यावृत्तत्वान्न व्यभिचार इति भावः। पक्षविशेष्यकत्वमेव सर्वत्रानुमितौ नियतमिति नवी
नमतमाह। द्विविधादपीति। कारणतावच्छेदकं च परामर्शद्वयसाधारणं व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वं। अतो
न व्यभिचारः। द्विविधयोरपि परामर्शयोः स्वस्वाव्यवहितोत्तरानुमितिं प्रति तत्तद्रूपेण हेतुत्वमिसपि केचित्। वस्तुतो
नुभवानुरोधात्पक्षविशेष्यकपरामर्शस्यैव हेतुत्वं। अत एव च वह्निव्याप्यधूमवान्पर्वत इत्याकारकः पक्षविशेष्यक
एवोपनयः सर्वसंमत इति ध्येयम्। मीमांसकः शंकते। नन्विति। ज्ञानं विनापीत्यस्यानुमितेर्दर्शनादित्यनेनान्वयः।
ज्ञानद्वयादेव। ज्ञानद्वयादपि। विशिष्टवैशिष्ट्यावगाहिज्ञानमिति तावत्प्रधानो निर्देशः। सर्वत्र कारणमिति। अनुमि
तित्वावच्छिन्नं प्रति न कारणतावच्छेदकमित्यर्थः। आवश्यकत्वादिति। व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञान
त्वस्योभयमतसिद्धनियतपूर्ववर्तितावच्छेदकत्वादित्यर्थः। ननु ज्ञानद्वयस्थलेपि विशिष्टज्ञानकल्पनायाम
तो न व्यभिचार इत्यत आह। विशिष्टज्ञानेति। व्याप्यतावच्छेदकेति। अयमालोको धूमो वेति संदेहदशायां व्याप्यता
वच्छेदकप्रकारकनिर्णयाभावेपीत्यर्थः। वह्निव्याप्यवानिति। वह्न्यभाववद्वृत्तिमानित्यर्थः। ननु धूमसामान

वह्न्यघटितत्वेन

५८

114

=विशिष्टज्ञानत्वावच्छिन्नविशेष्यककारणत्वप्रकारकत्वे विशिष्टज्ञानं कारणमित्याकारके

सं० त

नाधिकरणेसाद्यरूपव्याप्तिविशिष्टत्वान्निरर्थः। तत्र हेतुतावच्छेदकज्ञानं नैयत्यात्। अनुमितिसत्वेरिति। तथा च व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यतत्रव्यभिचारात्तेन रूपेण हेतुत्वमिति भावः। ननु तत्र फलबलाद्व्याप्यतावच्छेदकप्रकारकज्ञानं तुल्यनीयमतो न व्यभिचार इत्यत आह। लाघवाच्चेति। व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वादित्यर्थः। नन्वस्तु तत्तदवच्छेदकलाघवं तथापि [illegible] लाघवमेव मीमांसकानां मतयुक्तिभिर्भविष्यतीत्यत आह। किं चेति। न च प्रत्यक्षमाणेति। अत्र ज्ञानं चागतस्य वर्तमानतायाः अभिधानान्नैकान्तरीयता इति ग्रहमाराद्यदोषः। व्याप्तिप्रकारकं ज्ञानमिति स्वतन्त्रकारणमित्यनेनान्वयि इत्युच्यत इति। इत्थं च नतत्तत्रूपीयत्वं निवेश्यते। चैत्रस्य व्याप्तिग्रहकाले तच्छून्यमैत्रस्यानुमित्यापत्तेरभावान्मैत्रासन्निस्वतन्त्रहेतुभूतव्याप्तिज्ञानाभावादिति न गौरवमिति भावः। ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताविषयकव्याप्तिप्रकारकज्ञानत्वेन वा हेतुतेत्यत्र विनिगमनाविरहेण हेतुताद्वयं तथापीत्यत आह। वह्निव्याप्य इति। अनुमितिः स्यादिति। न्यायनयेतु व्याप्तिप्रकारता निरूपितहेतुप्रकारतानिरूपित [illegible] पक्षविशेष्यताशालित्वेनैव हेतुत्वस्य विवक्षितत्वान्नतादृशज्ञानान्नवाधर्मो वह्निव्याप्यधर्मवान्पर्वत इति ज्ञानादनुमित्यापत्तिस्तत्र व्याप्तिप्रकारतानिरूपितधर्मप्रकारतायाः पर्वतविशेष्यतानिरूपितप्रकारतात्वसत्वादिति भावः। ननु ज्ञानद्वयस्थले विशिष्टज्ञानकल्पनागौरवं न्यायमतेऽपि भविष्यतीत्यत आह। इत्थं चेति। फलमुखगौरवस्येति। फलेकार्यकारणभावे तन्मुखं तद्धीनं गौरवं गौरवज्ञानमित्यर्थः। विशिष्टज्ञानत्वावच्छेदेन कारणत्वग्रहे विशिष्टज्ञानत्वधर्मिकगौरवनिश्चयो विरोधी वाच्यः। तत्र गौरवप्रमाणं तत्रासिद्धं तत्तदनुमितिव्यवहितपूर्वक्षणेस्वाश्रयकत्वमेव तादृशगौरवनिश्चयो विशिष्टज्ञानत्वेन कारणत्वनिश्चयाधीनस्वघटकीभूततत्तदनुमितिव्यवहितपूर्ववर्तिस्वाश्रयनिर्णयं विना न संभवतीति कार्यकारणभावनिर्णयोत्तरं गौरवनिर्णयाभावान्नतादृशगौरवं दोष

=विशिष्टज्ञानं संग्रहस्याकारकः निश्चयः मतः। ४

सं २ =प्रमाणान्तरासिद्धतत्तदनुमितिव्यवहित

[illegible] गौरवं [illegible]

नाप

विशेष्य

१२

मु० टि०

५९

वाच्यत्वादि केवलान्वयि दृष्टान्तर कंकेवलान्वयित्वप्रकारकं ज्ञानं तत्काले १

इति भावः। नन्वेवं परामर्शे लक्षणानंतरं व्याप्तिनिरूपणे संगतिमुपोद्घातं निरूपयति। व्याप्तो नामेति। तत्रेति। घटवत्वं सम-
स्पर्शः। अव्याप्तिप्रसंगादिति। अव्याप्यभिधानमिदं येन केन चित्संबंधेन साध्यवत्त्वविवक्षणाभिप्रायेण। यदि च संबंध
सामान्येन साध्यवत्त्वं विवक्ष्यते तदा धूमवान्वह्नेरित्यादौ वति व्याप्तिर्बोध्या। अव्याप्तित्वेनास्तीति। विशिष्टाधेयता या अनति-
रिक्तत्वादिति भावः। फलितार्थ इति। तथा च तन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैव तन्निरूपिताधेयतावच्छेदकत्व-
नियमेन विशिष्टसत्तात्वस्य गुणाधेयतानवच्छेदकत्वान्नाव्याप्तिरिति भावः। अथवेत्यादिलक्षणमवतारयितुमत्र लक्ष-
णे दोषमाह। नन्विति। ननु केवलान्वयित्वज्ञानकाले पक्षता घटकसंशयाभावान्नैवानुमितिः तच्छून्यकाले तु भ्रमात्सम-
व्याप्तिज्ञानादनुमितिर्भवत्येवेत्यत आह। किंचेति। इत्यादावित्यादिना संयोगेन हेतुतायां गुणवान्घटादित्यादेः संग्रहः। ननु
स्वाधिकरणावृत्तिसाध्यवदन्योन्याभावकत्वं लक्षणार्थस्तथा च नयमव्याप्तिरितिचेन्न। वह्निमान्धूमादित्यादौ धूमाधि-
करणे वह्निमदन्योन्याभावस्य कालिकसंबंधेन वृत्तेरव्याप्त्यापत्तेः साध्यवत्ताग्रहविरोधितानियामकसंबंधेन वृत्ति-
त्वस्यात्र स्वाधिकरणीयतया सत्ताभाववानात्मत्वाभावादित्यादावव्याप्तेः। आत्मत्वाभावाधिकरणे साध्यवत्ताग्रहविरोधिता-
नियामकसमवायेन वृत्तेरप्रसिद्धेः। ननु सत्तावान्जातेरित्यादौ स्वाधिकरणत्वादिव्याप्तिज्ञानं कारणं। सत्ताभाववानात्म-
त्वाभावादित्यादौ तु साध्यवदन्यत्वादिव्याप्तिज्ञानं कारणमिति वाच्यं। तथापि संयोगसंबंधावच्छिन्नघटाभावे साध्यविषयितया
हेतौ घटत्वलक्षणद्वयस्याप्यव्याप्तेः। तन्निविषयितयाहेत्वधिकरणज्ञाने साध्यवत्ताग्रहविरोधितानियामकसंयोगेन तथात्व
तसंयोगेन घटाधिकरणे हेतुतावच्छेदकविषयितया च वृत्तेरप्रसिद्धेः। नन्वतिरिक्तोभयाभावमानाभाव उच्यत आह। एक-
सत्त्वेपीति। इदमुपलक्षणं। विशिष्टाभावमादाय व्याप्तिरिति बोध्यं। ननु वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगि-
ताकत्वेनाभावविशेषणान्नाव्याप्तिरित्यत आह। गुणवानिति। अत्र हेतोरेकव्यक्तितया समानाधिकरणयोरेव व्याप्तिरि-
त्युक्तावपि न निस्तार इति भावः। एतदुपधानेन लक्षणादित्यादौ लक्षणस्यासंभववारणाय व्याप्तीति। इति वाच्यमिति। गुण

स्वाधिकरणावृत्तिः साध्यवदन्योन्याभावोयस्यस्वस्य तत्त्वमिति १ संभवात्

केर

टि० ११

५९

अत्रस्वत्वादेन हेतोर्व्यभिः

ध्व६

साध्यवत्ताग्रह विरोधितानियामकसंबंधेन

116

त्स्यद्रव्या त्व [illegible] समानाधिकरणाभावप्रतियोगितानवच्छेदकत्वान्नाव्याप्तिरितिभावः। तत्स्वस्यर्न्नोन
परंपरया। स्वाश्रयसमवायेन। तथाचोक्तपरंपरयायदवच्छेदकंतदन्यत्वस्यजातित्वे सत्वान्नाव्याप्तिरि
तिभावः। तादृशधर्मा वच्छिन्नोभाव उक्तपरंपरयारूपत्वव्याप्यजातित्वावच्छिन्नस्य समवायेनाभावः।
नास्तीयत्रापि पृथिव्यामित्यनुपपद्यते। मतांतरमाह। साध्यादीति। आदिनासाधनपरिग्रहः। व्याप्तेर्भेदादि
ति। व्याप्तिज्ञानस्यकारणताभेदादित्यर्थः। पूर्वोक्तरीत्यानिरुक्तेतत्रसाध्यतावच्छेदकतावच्छेदकधर्मिकप्रति
योगितावच्छेदकतानवच्छेदकत्वप्रकारकज्ञानस्यहेतुत्वंनोचितं। कारणतावच्छेदकगौरवात्। नचपूर्वोक्तरीतौ
जातिमानित्येवानुमितिः स्यान्नतुजातिमत्वानियाकारिकेतिवाच्यं। पृथिवीत्यादिहेतुकेजातिमानित्येवानुमि
त्याकारः। जातिमत्वानियाकारस्ततद्व्यक्तित्वहेतुकेऽस्यदोषादित्यपिवदंति। श्यामस्वरसः सूचितः। शुद्धस
त्तासमानाधिकरणेति। नचविशिष्टनिरूपिताधिकरणतायाः हेतुतावच्छेदकसंबंधत्वेकथंतेनसंबंधेनस
त्ताधिकरणगुणः समवायस्यतथात्वेतुद्रव्यत्वेसाध्ये विशिष्टसत्तायाव्यभिचारित्वात्तत्राव्याप्त्यभिधानमसं
गतमितिवाच्यं। साध्याभाववद्वृत्तितावच्छेदकेहेतुतावच्छेदकवत्स्यैवव्यभिचारपदार्थतयाशुद्धसमवाय
स्यहेतुतावच्छेदकसंबंधत्वेपिविशिष्टसत्वस्यहेतोर्व्यभिचारित्वाभावात्। नाव्याप्तिरिति। नचहेतुतावच्छेदक
विशिष्टसत्तात्वविशिष्टस्य याअधिकरणत्वस्यगुणेसत्वादेवंविवक्षणेपिकथमव्याप्तिपरिहारइतिवाच्यं।
हेतुतावच्छेदकावच्छिन्ननिरूपिताधिकरणत्वस्य [illegible] विवक्षितत्वाद्विशिष्टसत्तात्वस्यगुणनिष्ठाधि
करणतानवच्छेदकतयातदवच्छिन्ननिरूपिताधिकरणत्वस्यगुणेऽभावादिति। तथैव। तदवस्थैव। तस्यैवरक्षे

व्याप्तिज्ञानतिष्ठक रणताभेदादिति ५

उक्तपरंपरया ४

हेतुतावच्छेदकसं बंधत्वे ९

इति। अधिकरणभेदेनाभावभेदानभ्युपगमादिति भावः। प्रतियोग्यधिकरणावृत्तित्वं प्रतियोग्यधिकरणवृत्ति-
न्नत्वं। विवक्षितत्वादिति। प्रतियोगिंधिकरणपदेन विवक्षितत्वादित्यर्थः। नन्वेवं हेतुसमानाधिकरणस्यवैय-
र्थ्यो सत्तावान् जातेरित्यादौ सत्ताद्यभावस्य निरुक्तप्रतियोगिवैयधिकरण्याभावादव्याप्तिविरहादत आ-
ह। स्वप्रतियोग्यनधिकरणेति। निष्कर्ष इति। प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावांत निष्कर्ष इत्य-
र्थः। तथा च हेतुसमानाधिकरणत्वविशेषणबलादेव तादृशप्रतियोगिवैयधिकरण्यलाभान्न तद्वैयर्थ्य-
मिति भावः। सत्त्वाधिकरणत्वेपीति। तथा च विशिष्टसत्ताभावो न प्रतियोगिव्यधिकरणः। अभावांतरप्रतियो-
गितायाश्चानवच्छेदकमेवं विशिष्टसत्तात्वमित्यतिव्याप्तिरिति भावः। नक्षतिः। नातिव्याप्तिः। एवमग्रेपि। न
नु प्रतियोगितावच्छेदकसंबंधेनैव प्रतियोग्यनधिकरणत्वमुच्यतां तावतापि ज्ञानवान् सत्त्वादित्यादावनति-
प्रसंगादित्यत आह। इत्थं चेति। साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वविवक्षणे चेत्यर्थः। वह्नि-
विरहसत्वेपीति। तथा च प्रतियोगितावच्छेदकसमवायेन प्रतियोगिव्यधिकरणतादृशाभावप्रतियोगिताव-
च्छेदकत्वाद्वह्नित्वस्याव्याप्तिः साध्यतावच्छेदकसंबंधावच्छिन्नत्वेनाग्रिमप्रतियोगिताविशेषणे तु संबंधद्व-
यप्रवेशेन गौरवमिति भावः। नक्षतिर्नाव्याप्तिः। समवायेन वह्न्यभावस्य साध्यतावच्छेदकसंयोगेन प्रतियो-
ग्यनधिकरणहृदाधिकरणवृत्तित्वाभावादिति भावः। न सामान्यस्य। प्रतियोगितावच्छेदकावच्छिन्नसामा-
न्यस्य। यत्किंचिदिति। यत्किंचिद्घटप्रतियोगितावच्छेदकं तदवच्छिन्नसामान्यस्यैवेत्यर्थः। द्विक्षणवृत्तित्ववि-
शिष्टेति। द्विक्षणवृत्तित्वविशिष्टस्य स्वस्य घटाभावादेर्योऽभावस्तदात्मक इत्यर्थः। घटाभावाद्यधिकरणेपि र

विशिष्टघटाभावस्यप्रतियोगिनः विशिष्टघटाभावप्रतियोगिनइतिविग्रहः ४ तस्यद्वितीयाभावस्य ४ विशिष्टंयद्घटाभावानतिरिक्तत्वंतदितिन्यायः ४

र्वक्षणवृत्तित्वविशिष्टघटाभावादेरभावस्योत्तरक्षणावच्छेदेनसत्वादितिभावः। नचपूर्वक्षणवृत्तित्वविशिष्टस्यघटाभावादेरभावः स्वाभावस्यप्रतियोगीनघटाभावादेरितिवाच्यं। पूर्वक्षणवृत्तित्वविशिष्टस्यघटाभावादेर्योऽभावस्तदभावस्यपूर्वक्षणवृत्तित्वविशिष्टघटाभावरूपस्यघटाभावानतिरिक्ततया विशिष्टघटाभावप्रतियोगिनस्तस्यघटाभावप्रतियोगित्वात्। तथाचप्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽसंभवइतिभावः। घटाभावात्मकतयेति। अभावाधिकरणकाभावस्याधिकरणानतिरिक्तत्वादितिभावः। इत्यादाविसादिनाऽभावसाध्यकसद्धेतुमात्रपरिग्रहः। स्वरूपसंबंधइति। अभावीयविशेषणतेसर्थः। पूर्वक्षणवृत्तित्वविशिष्टस्याभावेति। पूर्वक्षणवृत्तित्वविशिष्टं यत्स्वं घटाभावादि तदभावात्मकेसर्थः। प्राचांमतेद्रव्येसंयोगसामान्याभावानंगीकारादाह। कपीति। घटाभावीययत्किंचित्प्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्यहेत्वधिकरणेसंभवान्नप्रतियोगिव्यधिकरणाभावाप्रसिद्धिनिबंधनाव्याप्तिःसंभवतीतिभावः। घटत्वहेतुकेयत्किंचित्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वंहेत्वधिकरणघटादेर्नसंभवति उत्पत्तिकालेघटेगुणसामान्याभावसत्वादतआसपर्यंतानुधावनं। तृतीयविवक्षानुसारेणसमाधत्ते। यादृशेति। यादृश्याः प्रतियोगितायाःअवच्छेदकावच्छिन्नानधिकरणत्वंहेतुमतस्तादृश्याःप्रतियोगितायाअनाश्रयत्वमित्यर्थः। विवक्षितत्वात्। अप्रतियोगिपदेनविवक्षितत्वात्। कपिसंयोगाभाववानात्मत्वादित्यादेगुणसामान्याभावत्वावच्छिन्नप्रतियोगि

कपिसंयोगाभाववानात्मत्वादित्यत्र ७

वा २

आत्मनि ९

विशेषणविशेष्ययोः संबंधौ ताभ्यामिति विग्रहः विशेषणं महाकालभेदः विशेष्यं घट इति। ७
५ एतादृशसामानाधिकरण्यसंबंधेन महाकालभेदविशिष्टः घटः खंडकाले तिष्ठतितस्य घटस्याभाव इति॥ ५

तायाएवयादृशप्रतियोगितापदेनोपादानुं शक्यतयातदनवच्छेदकत्वस्य कपिसंयोगाभावत्वे सत्यान्नाव्याप्ति
रिति भावः। अत्र च यद्धर्मविशिष्टानधिकरणत्वं हेत्वधिकरणस्य तद्धर्मभिन्न साध्यतावच्छेदकावच्छिन्न
सामानाधिकरण्यस्य लघोर्नेदृशस्य संभवेपि यथासन्निवेशेन वैयर्थ्यमिति बोध्यं। साध्यतावच्छेदकसं
बंधेन प्रतियोग्यनधिकरणत्वविवक्षणे व्याप्तिं शंकते। नन्विति। महाकालभेदविशिष्टघटाभावरति।
अभावीयकालिकविशेषणताघटितसामानाधिकरण्यसंबंधेन महाकालविशिष्टस्य घटस्याभाव इ
त्यर्थः। महाकालभेदाभावादिति। अभावीयविशेषणतासंबंधेन महाकालभेदाभावविशिष्टत्वादित्यर्थः।
सामानाधिकरण्यघटकीभूतविशेषणविशेष्यसंबंधाभ्यां यत्र विशेषणविशेष्योभयवत्त्वं तत्रैव विशि
ष्टाधिकरणत्वोपगमादिति भावः। ननु महाकालमात्रवृत्तिविशेषणताविशेषेण साध्यतायां महाकालान्य
त्वविशिष्टघटाधिकरणाप्रसिद्धेरत आह। वस्तुत इति। अत्र प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधि
करणहेत्वधिकरणवृत्त्यभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वघटितलक्ष
णकरणेपि कालो घटवानित्यादावव्याप्तिस्तदवस्थैव। साध्यतावच्छेदकसंबंधावच्छिन्नतादृशप्रतियो
गितायाअप्रसिद्धेरतः प्रतियोगिताधर्मिकोभयाभावपर्यंतानुधावनं। समवायेनवह्न्यभावप्रतियोगितायां
वह्नित्वावच्छिन्नत्वसत्त्वात्संयोगेन घटाभावप्रतियोगितायां साध्यतावच्छेदकसंयोगावच्छिन्न
त्वस्य सत्त्वाद्धूमान्धूमादित्यादावव्याप्तिवारणाय यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वयोर्निवेशः।
संयोगेन घटाभावप्रतियोगितायां धूमत्वावच्छिन्नत्वघटितोभयाभावसत्त्वादतिव्याप्तिवारणाय सामान्य
भावोपि न प्रतियोगिव्यधिकरणः। तत्तेन संबंधेन महाकालान्यत्वविशिष्टघटा७

मु॰ टि॰
६१

भेद ५

यत्र यस्मिन् खंड
काले

कालिकविशे
षणतासंबंधेन ८

६१

स्य २

१२०

इति। अप्रसिद्धमिति। तथा चाव्याप्तिरिति भावः। यदि कंबुग्रीवादिमान्नास्तीत्यादेः कंबुग्रीवादिमत्प्रतियोगिकाभाव
एव विषयो ननु कंबुग्रीवादिमत्त्वेन प्रतियोगितावच्छेदकत्वमपीत्युच्यते। तदार्थ किंचिदुदेवस्यपि कंबुग्रीवादिमान्ना
स्तीति वाक्यस्य प्रामाण्यापत्तेरित्येतद्धृदि निधायाह। संक्षेप इति। मूले पक्षतानिरूपणे संगतेरप्रदर्शनात्तां प्रदर्शयति।
पक्षतां तत्त्वमिसत्रेति। तथा च प्रकृतस्य परामर्शस्य तद्घटकतया पक्षधर्मत्वमपि प्रकृतं तदुपपादकस्वरूपोपोद्घातसंग
त्या पक्षतानिरूपणं। व्याप्तिनिरूपितानन्तरं कार्यकारित्वमेव संगतिरिति बोध्यं। मूले पक्षतालक्षणस्य स्पष्टतयानु
क्तेः पक्षतालक्षणस्वातंत्र्येण दर्शयन्नन्तार्थमाह। सिषाधयिषाविरहेति। घनगर्जितेन मेघानुमितिस्थले व्याप्त्या
पक्षा सिषाधयिषाया अस्य पक्षतात्वं निषेधयति। सिषाधयिषामात्रेणेति। मेघानुमानात् मेघानुमितेः। अत एव
वक्ष्यमाणदूषणादेव। सिषाधयिषाविरह— रूपविशेषणस्य प्रयोजनमाह। सिद्धौ सत्यामिति। अत इति। त
त्रानुमितिनिर्वाहकपक्षतासंपत्त्यर्थमित्यर्थः। तत्र सिषाधयिषायां सत्यामसत्यामपीति। सत्यामुभयाभावप्रयुक्त
स्य असत्यां विशेष्याभावमात्रप्रयुक्तस्य विशिष्टाभावस्य सत्त्वादिति भावः। सिद्धौ सत्यामसत्यां चेति। सत्यां विशे
षणाभावमात्रप्रयुक्तस्य असत्यां उभयाभावप्रयुक्तस्य विशिष्टाभावस्य सत्त्वादिति भावः। सिद्धेः सत्त्वादिति। सि
द्धेः सत्त्वेन तदभावरूपपक्षताया अभावादिति भावः। सिषाधयिषाविरहविशिष्टस्य च सिद्धेः कस्मात्भावच्छेदेनैक
लक्षणत्वं। तेन सिषाधयिषाकालीनसिद्धेः कालिकसंबंधेन सिषाधयिषाविरहविशिष्टत्वेऽपि न क्षतिः। परामर्श
रूपकारणसत्त्वे सिद्धिरूपविरोधिसत्त्वेऽप्यनुमितिः स्यात् तदा तस्या उत्तेजकत्वं बोध्यं। न चैतत्संभवति यागंक
तो ननु यत्रेति। परामर्शानंतरं परामर्शात् द्वितीयक्षणे। ततः सिध्युत्पत्तिद्वितीयक्षणे। क्रमेण अव्यवधानेन। ए
तत्कालावच्छेदेनैकाल्यवृत्तित्वाख्यसंबंधेन स्वरूपसंबंधे सिषाधयिषाविरहाधिकरणत्वनिरूपितसमवायसंबं[illegible]ध

वह्निव्याप्यधूमवान्पर्वतो वह्निमान् अनुमितिः इष्टसाधनेच्छाकारकं ... समूहालम्बनात्मकं प्रत्यक्षमिति । ३ । अनुमिति
= एतदनुमिति ... ५ = इच्छायाः सामग्रीतया इष्टसाधनत्वप्रकारकानुमिति

यमन्याप्यपीति । यत्र परामर्शसिषाधयिषासिद्धयः क्रमेण । एवं सिद्धिसिषाधयिषापरामर्शाः एवं सिषाधयिषापरामर्शसिद्ध
तत्रेत्यर्थः । सिद्धिकाले परामर्शकाले चेति । सिद्धिपरामर्शोभयक्षण इत्यर्थः । कथमिति । किमर्थमित्यर्थः । इति प्रत्यक्षमिति
अनुमिताविष्टसाधनताविषयकमिति शेषः । प्रत्यक्षात्तत्तः एवमनुमितीष्टसाधनताधीस्वीकारे इच्छासामग्र्याभिर्तवेधात्वस्य
क्षमेव न स्यादिति । यादृशी यादृशीत्यादि । परानुमितिर्जायतामितीच्छासत्त्वे पर्वतो वह्निमानिति सिद्धिसत्त्वे पर्वतो वह्निमा
नित्यनुमित्युत्पत्तेः पर्वतो वह्निमानिति सिद्धिसत्त्वेऽपि तादृशेच्छाबलात्तादृशानुमित्यापत्तिरतउक्तं सिद्धिसत्त्व इति । इदं चो
त्तेजकेच्छाव्यक्तेः परिच्चायकं रूपमुत्तेजकत्वेनुतत्तद्व्यक्तित्वेनैवेति बोध्यं । तेन । तत्तदिच्छायाउत्तेजकत्वेन । यत्किंचिज्ज्ञा
नमित्यस्य परतु तरकालीनमित्यादिः यत्किंचिज्ज्ञानस्य सर्वदा सिद्धत्वेन तद्रूपेणेच्छाविरहात् । नानुमितिरिति । नानु
मित्यापत्तिरित्यर्थः । तदिच्छायास्तद्व्यक्तित्वेनोत्तेजकत्वानाप्युपगमादिति भावः । नचयत्किंचिज्ज्ञानं जायतामित्येतादृ
शेच्छाकालेऽप्यनुमितिर्भवत्येवेति वाच्यं । अनुमितिसामग्रीसत्त्वे आत्मादिविषयकयत्किंचिज्ज्ञानस्य सामग्रीसत्त्वेनि
यमेन यत्किंचिज्ज्ञानसाधुसत्त्ववतादृशेच्छाविषयसिद्धेस्तत्रानुमित्युत्पत्तिविरोधप्रसंगाभावात् । नन्वनुमितित्वप्रकारके
च्छात्वेनानुगतरूपेणैवोत्तेजकत्वं वाच्यं । तावतैव यत्किंचिज्ज्ञानं जायतामितीच्छाकारणसंभवान्नतु तद्व्यक्तित्वेनोत्तेज
कत्वं कल्प्यं गौरवादित्यत आह । वह्निव्याप्येति । प्रत्यक्षातिरिक्तं ज्ञानमित्यस्य शाब्दसामग्र्यसत्त्व इत्यादिः । शाब्द
सामग्रीसत्त्वे शाब्दबोधेनैवेच्छाविषयसिद्धिसंभवात् । अतएवानुमितिरित्यनेन संबध्यते । तथा चानुमितित्वप्रकार
केच्छात्वेनोत्तेजकत्वे तत्रानुमितिर्न स्यादिति भावः । तल्लिंगकत्वप्रवेशस्य फलमाह । एवमित्यादिना । नानुमितिरिति
इच्छायास्तत्तद्व्यक्तित्वेनोत्तेजकतया तदिच्छाव्यक्तेरनुत्तेजकत्वादिति भावः । इदं तु बोध्यं । पर्वते वह्न्यनुमितिर्जायता

= अनुमितिसामग्रीपरामर्शादिः तत्काले = ८

मित्याद्यनुगतेच्छानां पर्वतत्वावच्छिन्नोद्देश्यकत्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारताशाल्यनुमितिगोचरेच्छात्वे
नानुगतरूपेणैवोत्तेजकत्वं प्रत्यक्षातिरिक्तज्ञानं जायतामित्याद्यननुगतेच्छानां तु तत्तद्व्यक्तित्वेन न तु सकलेच्छानां तत्तद्व्य
क्तित्वेन गौरवादिति। सिषाधयिषाकाले पर्वतो वह्निमानिति सिद्धिसत्त्वेपि पर्वतो वह्निमानित्यनुमित्युत्पत्तेस्तादृशसिद्धेर्न
तादृशानुमितिप्रतिबंधकत्वं स्यादत उक्तं सिषाधयिषाविरहकाल इति विशिष्य वक्तव्येति। पर्वतो वह्निमानित्यनुमितौ घ८
पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबंधकत्वं वक्तव्यमित्यर्थः। तत्प्रयोज
नमाह। तेनेति। सिद्धिरेवेत्येवकारेण सामानाधिकरण्येन सिद्धिव्यवच्छेदः। सामानाधिकरण्येनानुमितिं प्रतिचेति। सामा
नाधिकरण्यमात्रेणानुमितिं प्रतीत्यर्थः। अन्यथाऽवच्छेदकावच्छेदेनानुमितेरपि सामानाधिकरण्यावगाहितया तद्व
च्छेदाप्रतीतेः। सिद्धिमात्रमिति। पक्षविशेष्यकसाध्यप्रकारकनिश्चयत्वेन विरोधित्वमित्यर्थः। उपाध्यायास्तु सिषाध
यिषाविरहविशिष्टस्य सिद्धिप्रत्यक्षसामग्र्योरन्यतरस्याभावः पक्षता। तेन सिद्धिकाले समानविषयकप्रत्यक्षसामग्री
कालेप्यनानुमित्यापत्तिरित्याहुः। तद्दूषयितुं प्रत्यक्षसामग्र्यभावस्य पक्षताकुक्षिप्रवेशे प्रत्यक्षसामग्रीकाले कथं नानु
मितिरित्युत्कटशिष्यजिज्ञासानुसारार्थं प्रथमतः स्वसिद्धांतमाह। इदं तु बोध्यमित्यादिना। संशयोत्तरप्रत्यक्षं प्रति हेतुभूत
स्य विशेषदर्शनस्य सत्त्वादिति भावः। एतादृशप्रत्यक्षसामग्रीविशेषपर्यंतानुधावनं चैतद्ग्रंथे अनुमितिसामग्रीसंप
त्तिप्रदर्शनार्थं स्वातंत्र्येणानुमितिसामग्रीप्रदर्शने प्रयासापत्तेः। स्वातंत्र्येणेति। न तु पक्षताकुक्षिप्रविष्टत्वेनेत्यर्थः।
शाब्दसिद्धौ सत्यामशाब्दं ज्ञानं जायतामितीच्छायामनुमितेरुत्पादासिद्धावनुमितिगोचरेच्छात्वेन तादृशेच्छाकाले प्रत्यक्षसा
मग्रीकालेऽनुमित्युत्पादेन सामग्र्यामनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वस्यावश्यकतया एकरूपेणोत्तेजकत्वासंभवा
त्। एवमुभयत्र सिषाधयिषाविरहस्यैकसंबंधेन विशेषणत्वसिद्धौ समवायघटितसामानाधिकरण्येन चक्षुःसंयोगादि
अयं पुरुषो न वेति संशयानंतरं पुरुषत्वव्याप्यकरादिमानिति प्रत्यक्षसामग्रीविशेषपर्यंतानुधावनमिति = ५। अशाब्दं ज्ञानं जायतामिती =
णकाले = २

तस्य प्रत्यक्ष
स्य विषये पु
रुषत्वे सामग्र्याः
विषयत्वमर्थः
पुरुषत्वविषय
कानुमितिसा
मग्रीसंपत्त्यर्थं ५

रप्रत्यक्षसामग्र्यां

123

अनुमित्यर्थजायते सा न स्यादिति ।३ प्रति२ प्रत्यक्षरूपमानसेत्र ।३ विभागतात्पर्यार्थः व्यापारः शब्दप्रयोगः ८ ४ आवांतरधर्मप्रकारकज्ञानानुकूलव्यापार ४अभावविशिष्ट४

रूपसामग्र्यां तु स्वाश्रयत्वक्रु संयुक्तमनः प्रतियोगिक विजातीयसंयोगघटितसामानाधिकरण्येनैकरूपेण तयोः प्रतिबं
धकत्वासंभवादित्याशय इति दिक् । ननु अनुमितिं प्रत्यक्षसामग्र्याः स्वातंत्र्येण प्रतिबंधकत्वे भिन्नविषयेपि प्रत्यक्षसामग्री
काले अनुमित्यनुपपत्तिः । मन्मते त्वनुमानातिरिक्ते प्रकृतसाध्यसाधकमानत्वेन पक्षता कुक्षौ तस्याः प्रवेशो नोक्तापत्तिरत
स्तां शादत आह एवमिति । अनुमितिसामग्री प्रतिबंधिकेति । तथा च भिन्नविषयकानुमिति सामग्र्यभाव घटितप्रत्यक्षसा
मग्र्या स्तात्राभावान्न पूर्वोक्त स्थले अनुमित्यनुपपत्तिरिति भावः । यद्वा अनुमितिसामग्री प्रतिबंधिका । अनुमितिसाम
ग्र्येव प्रतिबंधिका । न तु भिन्नविषये प्रत्यक्षसामग्र्यनुमितौ प्रतिबंधिकेत्यर्थः । तथा च प्रत्यक्षसामग्र्याः समानविषयका
नुमितिं प्रत्येव प्रतिबंधकतया न पूर्वोक्तानुमित्यनुपपत्तिरिति भावः ॥ ॥श्री॥ ॥हेत्वाभासा निति । विज्ञयलक्षणे
तरार्थे कारित्वमत्र सङ्गतिर्बोध्या । ननु लक्षणात्मक साधारणधर्मज्ञानं विना विशेषे जिज्ञासानुदयात् विभागो निष्प्रयोज
नक इत्यतो लक्षणमाह । तल्लक्षणं त्विति । हेत्वाभासलक्षणं त्वित्यर्थः । लक्ष्ये लक्षणं गाहयितुं तथा हीति । ते व्यभिचारादय
ननु यद्विषयकत्वेनेत्यत्र तृतीयार्थोवच्छेदकत्वं तथा च वह्निमान् धूमादित्यत्र वह्न्यभावो नेति व्याप्तिः पर्वतविशेषक वह्न्यभा
वप्रकारक निर्णयत्वेन वह्न्यनुमितिं प्रति प्रतिबंधकत्वे वह्न्यभावविषयकत्वस्य प्रतिबंधकतावच्छेदककोटि प्रविष्टत्वात् । न च
स्वरूपसंबंधेनावच्छेदकतापर्याप्त्यधिकरणत्वं अनतिरिक्तत्वं वावच्छेदकत्वं तृतीयार्थः । वह्न्यभावविषयकत्वस्यावच्छे
दककोटि प्रविष्टस्याप्यवच्छेदकतापर्याप्त्यनधिकरणत्वादतिरिक्तत्वान्नात्याव्याप्तिरिति वाच्यं । पर्याप्ति निवेशे संवा
पत्तेः । अप्रामाण्यज्ञानानास्कंदितत्वस्याधिकस्य प्रतिबंधकतावच्छेदककोटि प्रविष्टत्वात् । अनतिरिक्तत्वं नित्यरूपावच्छेदकत्व
निवेशे च दोषवह्निमान् धूमादित्यादौ वह्न्यभावविशिष्टह्रदादावव्याप्त्यापत्तेः । प्रतिबंधकताभाववति ह्रद इत्येताह
ज्ञानेन वह्न्यभावविशिष्टह्रदविषयकत्वस्य सत्वात् । विशिष्टह्रदस्य ह्रदानतिरिक्तत्वादित्यत आह । यद्विषयकत्वेनेति । एतादृ

यद्विषयकत्वेन ज्ञानस्य अनुमितिविरोधित्वमित्यत्र ज्ञानस्येति षष्ठ्यर्थः निष्ठत्वं तृतीया = न१ = लक्ष्यनिष्ठ लक्षणविषयकज्ञानानुकूलव्यापारानुकूलकृतिमान् इतिशे
अर्थः अवच्छेदकत्वं तथा च ज्ञाननिष्ठ यद्विषयकत्वप्रयुक्तानुमितिप्रतिबंधकतावच्छेदकत्वमिति लक्षणार्थः = ७

प्रत्यक्षसामग्र्याः प्रतिबंधेन नत्र प्रत्यक्षसामग्रीत्वेनेति ।=३

रूपा

मार

तेन नानिर्वंच्यादि[illegible] प्रकृतानुमितितस्मिन्प्रतिबंधकतानतिरिक्तवृत्तिरित्याकारक अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य लक्षणे निवेशनीय तया = ६
बाधभ्रमनिष्ठ यसाधारणस्य १

धि२

लक्षणप्रयोजनमाह। तेनेति। बाधभ्रमस्य बाधभ्रमसाधारणस्य पर्वतविशेष्यक वह्न्यभावप्रकारकत्वादेरित्यर्थः। अनुमि
तिविरोधित्वेपि। अनुमितिविरोधि[illegible]तावच्छेदकत्वेपि। नक्षतिः न वह्न्यभावादावतिव्याप्तिः। इतरथातु वह्न्यभावविषय
कत्वस्य पर्वतविशेष्यक वह्न्यभावप्रकारकत्वरूपानुमितिप्रतिबंधकतावच्छेदककोटि प्रविष्टत्वात्तत्रातिव्याप्तिः स्यादि
तिभावः। यादृशविशिष्टेति विवक्षितेतु तत्रनातिव्याप्तिरित्याह। तत्रेत्यादिना। नचवह्न्यभावविशिष्टपर्वतस्याप्रसिद्धैते
पियादृशविशिष्टपदेन वह्न्यभावत्वविशिष्टं वह्न्यभावमुपादाय तत्रातिव्याप्तिरिति वाच्यं। यादृशविशिष्टेति विवक्षणेऽनति
रिक्तवृत्तित्वस्यैवावच्छेदकत्वस्य लक्षणे निवेशनीयतया वह्न्यभावविषयकत्वस्य प्रतिबंधकत्वाभाववति [illegible]भाव इति
ज्ञाने वृत्तेस्तत्रातिव्याप्तेरभावात्। नचैवं सर्वांशे सावह्न्यभावविशिष्टह्रदादावव्याप्तिरिति वाच्यं। यादृशविशिष्टविषय
कत्वेनेत्यस्य यद्रूपावच्छि[illegible]न्नविषयकत्वे नेत्यर्थकत्वात्तत्त्वमित्यस्य चतद्वत्त्वमित्यर्थकत्वात् ह्रदइतिज्ञाने वह्न्यभावावच्छि
न्नविषयकत्वाभावात्। अथात्रानतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्य विवक्षणेऽनुमितिप्रतिबंधकत्वाभाववति ह्रदोवह्नि
मान्नवेति संशये ह्रदो वह्न्यभाववा[illegible] नित्याहार्यनिश्चये अप्रामाण्यज्ञानास्कंदिततादृशनिश्चये च वह्न्यभावविशिष्टह्र
दविषयकत्वस्य सत्वादसं[illegible]भव इति चेन्न। ज्ञानस्येत्यत्र ज्ञानपदस्यानाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयपरतया तादृश
निश्चयनिष्ठयादृशविशिष्टविषयकत्व[illegible]मनुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वमित्यर्थलाभादिति दिक्॥ ॥
सत्प्रतिपक्षस्यानित्यदोषत्ववादी शंकते। नचयत्रेति। विशिष्टस्याप्रसिद्धत्वादिति। पाषाणमयत्वे वह्न्यभावव्याप्यत्वाभावादि
तिभावः। इष्टापत्तेरिति। तथाचसद्धेतुं प्रति परामर्शेपिनदुष्टत्वमिति भावः। अन्यथा प्रतिबंधकीभूतभ्रमविषयस्यै
= प्रतिबंधकीभूतः यः भ्रमात्मकः [illegible] वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वत
= मर्शः तद्विषयस्यापि पक्षस्येत्यर्थः = ९

अनतिरिक्तवृ
त्तित्वरूपाव
च्छेदकत्वनि
वेशपक्षे = ७

= वह्न्यभाववि
शिष्टह्रदविष
यकत्वाभावात् ८

प्रथ

तत्
[illegible]

१२५

= पर्वतविशेष्यकवह्न्यभावप्रकारकत्वं नास्ति किंतु तर्हि वह्न्यभाववद्वृत्तित्वप्रका = पर्वतो वह्न्यभाववान् पाषाणमयत्वादित्यत्र पक्षस्य = १
= रकत्वं व्यभिचारज्ञानस्य वह्निविधेयकानुमितिप्रतिबंधकत्वं नास्तीति तत्त्वाय धामकृतविरोधित्वलगदनितासर्थं॥ = १

मु॰ रि॰ ६४

पिदोषत्वे। अनित्यदोषत्वापत्तेरिति। पक्षे साध्याभावभ्रमदशायां सद्धेतावपि दोषत्वापत्तेरित्यर्थः। इत्थं चैयादृशविशिष्ट
विषयकत्वेन ज्ञानस्य प्रतिबंधकत्वं तादृशविशिष्टस्य दोषत्वे चैहेत्वादिकमियादिना साध्याभावविशिष्टपक्षपरिग्रहः
यादृशविशिष्टपदेन व्यभिचारादित्यो विशिष्टं व्यभिचारादिकमादाय लक्षणं न संभवति व्यभिचारविषयकत्वस्य प्र
तिबंधकताभ्रन्त्ये व्यभिचार इति ज्ञानवृत्तित्वेनातिरिक्तवृत्तिस्यात्। किंतु व्यभिचारादिविशिष्टहेत्वादिकमादायैवेति
व्यभिचारादिविशिष्टहेत्वादिकमेव दोष इति भावः। ननु व्यभिचारादिविशिष्टस्य हेतोर्दोषत्वे तद्वत्त्वस्य हेताव भावाद्धेतोर्दु
ष्टत्वव्यवहारो न स्यात्। न च तादात्म्येन तद्वत्त्वं विवक्षणीयमिति वाच्यं। तथासति वह्न्यभावविशिष्टह्रदादेस्तादात्म्येन
धर्मेऽभावेन ह्रदपक्षके धूमस्य दुष्टत्वं न स्यादत आह। तद्वत्त्वं चेति। न च वह्निव्यभिचारविशिष्टद्रव्यत्वादेर्धूमेपि सत्त्वा
दति व्याप्तिरिति वाच्यं। यादृशविशिष्टविषयकज्ञानत्वेन यद्धेतुकानुमितिप्रतिबंधकत्वं तादृशविशिष्टाश्रयत्वं तद्धेतुत्व
स्य दुष्टत्वादिति। सत्प्रतिपक्षादेरनित्यदोषत्ववादिनां मतमाह। परे त्विति। ननु वह्न्यभाववद्व्याप्यत्वेयसदनोपादातुराक्यस्यपि
तस्याः धर्मावृत्तितया न धूमस्य दुष्टत्वस्यो दत आह। तद्वत्त्वं चेति। ज्ञानेति। एकज्ञानत्वेन तद्वत्त्वमित्यर्थः। तद्वत्त्वस्य साध्याभावव
त्त्वस्य तत्रैवा बाधकालीन धूमादिसद्धेताविर्त्यर्थः। अत्र प्रतिपरामर्शकालीने धूमादिसद्धेतौ। तत्कल्पनात्। ज्ञानस्य संबंधत्वक
ल्पनात्। ननु सद्धेतावपि बाधित इति व्यवहारेण संबंधत्वकल्पनं ज्ञानस्य भविष्यतीत्यत आह। तत्रेति। बाधभ्रमकालीने स
द्धेतावित्यर्थः। प्रत्युतायं न बाधितः पुरुषस्तु भ्रांत इत्येव व्यवहारादिति भावः। तादृशव्यवहाराव्यवहारयोः स्वानुभवमात्रसा
क्षित्वमाकुरीत्यस्यारसो बीजं। यथाश्रुतविरोधित्वयोगबीजमाहतेनेत्यादिना। ननु तद्धेतुकतत्साध्यकानुमितिं प्रति तद्धेतौ तत्सा
ध्यव्यभिचारस्याभावो हेतुर्वाच्यस्तत्राह। तदभावेति। न क्षतिः। नाव्याप्तिः। ननु अत्र लक्षणे अवच्छेदकत्वं न स्वरूपसंबंधविशे

बाधभ्रमकालीने = ५

वह्निमात्र द्रव्यत्वादि त्युमान = ७

विषय ६

= तदभावानवगाहि ज्ञान त्वाभावान् अवगाहित्वात् पर्वतोव = ५ वह्न्यभाववान् पाषाणमयत्वात् पर्वतस्याकारकत्वं मात्मकप्रतिबंधक
= निमानद्रव्यत्वादित्यत्र व्यभिचारज्ञानस्य अनुमितिप्रतिबंधकत्वं नास्ति द्रव्यत्वं वह्न्यभाववद्वृत्तित्वाकारकं व्यभिचारज्ञानं तस्य
= साध्याभावानवगाहित्वात् कृतः पर्वतविशेष्यकवह्निप्रकारकज्ञानप्रति पर्वतविशेष्यकवह्न्यभावप्रकारकज्ञानं प्रतिबंधकं

पः सर्वोक्तदोषादिसनतिरिक्तत्वमेवनिवेशनीयं। तथाच धूमवान्वह्नेरित्यादौ प्रमेयत्वविशिष्टव्यभिचारेति व्याप्तिस्तादृ
पयकत्वस्य प्रतिबंधकता नतिरिक्तत्वमित्यादत आह। संक्षेपइति। प्रकृतानुमितिप्रतिबंधकतावच्छेदकांतराघटितत्वेनानुमि
तिविरोधितावच्छेदकं विशेषणीयं प्रमेयत्वविशिष्टव्यभिचारश्च प्रकृतानुमितिप्रतिबंधकतावच्छेदकीभूतो यो व्यभिचारस्त
घटित एवेति न तत्रातिप्रसंग इति दिक्। नन्वत्रानुमितितत्कारणज्ञानान्यतरप्रतिबंधकत्वमन्यतरनिष्ठप्रतिबध्यतानिरू
पितत्वघटितं यदि तदा पर्वतो वह्निमान्धूमादित्यादौ वह्न्यभाववद्विशिष्टकदस्यापि दोषताप्रसंगः। तस्य पर्वतो वह्निमान्रूदोवी
मानिति समूहालंबनात्मकप्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वात्। यदि च तादृशान्यतरत्वाव
च्छिन्नप्रतिबध्यतानिरूपितत्वघटितं तदा तादृशान्यतरत्वस्य कस्यचित्प्रतिबध्यतावच्छेदकतयाऽसंभवः। तादृशान्यतर
त्वव्यापकप्रतिबध्यतानिवेशेन व्यभिचारादौ बाधादौ चाव्याप्तिः। व्यभिचारादेरनुमित्यविरोधितया बाधादेश्च व्याप्तिज्ञा
नाविरोधितया तत्प्रतिबध्यतायास्तथाविधान्यतरत्वाव्यापकत्वात्। किंच तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यक
तद्धर्मावच्छिन्नहेतुकानुमितितत्करणज्ञानान्यतरविरोधित्वं लक्षणे निवेशनीयं। अन्यथा पर्वतो वह्निमान्धूमादित्यादौ
पर्वतादेः कांचनमयत्वाभावो हेत्वाभासः स्यात्। एवं च निर्वह्निः पर्वतो वह्निमान्निर्वह्निर्मानित्यादौ नकोऽपि हेत्वाभासः स्या
त्तादृशानुमितेरप्रसिद्धेरत आह। यादृशसाध्येति। संभवेति। वायुर्गंधवान्स्नेहादित्यादौ सर्वहेत्वाभाससंभवइति ल
वः हेत्वाभासलक्षणमुक्त्वाग्रे वक्ष्यमाणेषु अनैकांतिकादिलक्षणेषु कश्चिद्दोषं हृदि निधाय स्वयमनैकांतिकादीनां ल
क्षणान्याह। एवमिति। साधारणादीत्यादिना ऽसाधारणानुपसंहारिणोः परिग्रहः। नन्वेतस्यानुमितितत्करणज्ञानान्यतरवि
रोधिज्ञानविषयत्वाभावात्कथं हेत्वाभासत्वमित्यतो दूषकताबीजमाह। तन्नवेति। एवमग्रेऽपि। क्रियतइति। व्याप्तिघटक

तच्च साध्यवद्धावृत्तत्वं नमावाद्यनियतदोषत्वं तस्येत्याह । इत्थं चेति । असाधारणघटकसपक्षत्वस्य ५

मु॰ टी॰ ६५

व्यभिचारो ऽयं व्यभिचारज्ञानस्य प्रतिबंधकत्वादिति भावः । प्रतिबध्यत इति । व्याप्तिघटकीभूतसामानाधिकरण्यग्रहः प्रतिब
ध्यत इत्यर्थः । एवं चासाधारणासाधारणानुपसंहारिणां व्याप्तिज्ञानप्रतिबंधरूपदूषकताबीजैक्यनैकहेत्वाभासत्वमुपपद्य
ते साधारणे नाव्यभिचारग्रहस्यासाधारणे न सामानाधिकरण्यग्रहस्यानुपसंहारिणा च व्यतिरेकव्याप्तिग्रहस्य प्रतिबं
धादिति भावः । प्राचीनमतमाह । अन्ये त्विति । पक्षे साध्यसंदेहदशायामेवासाधारणस्य हेत्वाभासता न तु निश्चयदशायां

स॰ ५

तदा पक्षस्यैव पक्षत्वे निश्चयस्य घटितत्वेनेत्यर्थः । तत्र । निश्चितसाध्यवति पक्षे ऽसाधारण्येऽत्रयाणामेकहेत्वाभासत्वा
नुपपत्तिर्वदंतीत्यनेनास्वरसः सूचितः । व्यतिरेकव्याप्तिग्रहप्रतिबंधक इति । केवलान्वयिसाध्यके चान्वयव्याप्तिज्ञानादेवा
नुमितिरिति भावः । नन्वेवं साध्याभावसाधकत्वात्सत्प्रतिपक्षादिरुद्धस्य भेदो न स्यादत आह । सत्प्रतिपक्षे त्विति । प्रतिहेतुः प्र
तिकूलो द्वितीयो हेतुः इति विशेषस्तयोर्भेदः । ननु दूषकताबीजैक्येऽपि हेतुभेदात्सत्प्रतिपक्षो हेत्वैक्ये विरुद्धरूपहेत्वाभासां
तरमित्युच्यते तदाय त्रान्वयिनाहेत्वंतरेण प्रतिरोधस्तत्र सत्प्रतिपक्षो यत्र तु व्यतिरेकिणा तत्र तु हेत्वाभासांतरं स्यादतो भेद

स॰ ६

मंतरमप्याह । साध्याभावेति । वस्तुगत्या साध्याभावसाधकहेतावेव तत्त्वसाधकात्वभ्रम इति सूक्ष्मपनाबादि । नं प्रतिभ्र
मे ऽपाशक्तिसत्त्वकत्वं विरुद्धत्वं न तु एवं सत्प्रतिपक्षस्येति भावः । साध्याभावव्याप्येति । एवं साध्यवदन्यत्वव्याप्य
वान्पक्षः पक्षनिष्ठो साध्याभावसाध्यवदन्यत्वव्याप्यावपि बोध्यौ । अन्यतमत्वादिना अनुगमात्तु विभागव्याघातः ।

सत्प्रतिपक्षव्यवहारो पर्यवमन्यपो सत्प्रतिपक्षलक्षणमाह । अगृहीतेति । नियतत्वव्याप्यत्वावच्छिन्नज्ञानभ्रन्यकाले

गो॰ ६५

नो नियतत्वव्याप्यरूतकत्वपरामर्शसत्त्वेऽपि सत्प्रतिपक्षव्यवहाराभावात्कालीनांतमुपस्थितमिति विशेषणं । गृहीताप्रामाण्य
कानियतत्वव्याप्यवत्ताज्ञानकालीनानियतत्वव्याप्यकत्वपरामर्शसत्त्वेऽपि तद्व्यवहाराभावादगृहीताप्रामाण्यकेति

= तथा च पक्षनिष्ठः साध्याभावव्याप्यः पक्षनिष्ठः साध्यवदन्यत्वव्याप्यत्वश्चापि बोध्यः । = ४

गृहवाले तथा व्यवहाराभावादगृहीताप्रामाण्यक संदेहेतीयोक्रा २

प०

मौपस्थितिविशेषणं। तादृशे [illegible] काली नानित्यत्वव्याप्यपरामर्शसत्वेपि तत्राप्रामाण्य [illegible] पस्थितिविशेषणं। व्यवहारमात्रोपयोगिनो निरुक्तरूपस्य प्रकृतानुपयोगः उपस्थितिघटितस्योक्तरूपस्य स्वरूपसत एवोपयुक्तेः स्याभासताया मप्रयोजकत्वादित्य स्वरससंसूचयन्नन्यइति। सत्प्रतिपक्षस्य दूषकताबीजं प्रदर्शयति। अत्रेत्यादिना। सत्प्रतिपक्षस्य संशयजनकत्वं दूषकताबीजं नत्वनुमितिप्रतिबंधकत्वं तदभावव्याप्यवत्ताज्ञानस्यानुमिति [illegible] प्रतिबंधकत्वे मानाभावा दितिरत्नकोशकारमतं दूषयितुमुपन्यस्यति। अन्ये केचिदित्यादिना। अनुमितिर्भवत्येवेति। अनुमितिप्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वे मानाभावात् तत्तदभावानुमितिसामग्रीभ्यामेव तत्तदभावकोटिसंशयानुमि [illegible] त्युपपत्तौ संशयानुमितिं प्रति उभयव्याप्यवत्ता निश्चयत्वेनातिरिक्तहेतुताकल्पने प्रयुक्तगौरवाभावाच्चेति भावः। ननु यद्युभयभासकत्वे उभयज्ञानतदापि नादिदोषसत्वेपि पीतत्वशुक्लत्वोभयस्फुरतावुभयोर्भानापत्तिरित्यत आह। फलबलेन चेति। तथा च तत्र पीतत्वसाक्षात्कारस्यैवानुभविकतया शुक्लत्वग्रहे पित्तरूपदोषस्य प्रतिबंधकत्वं कल्पयित्वा पीतसाक्षात्कारसामग्र्या अधिकबलत्वमेव न तु स्थलदोषसत्यपि स्थाणुत्वपुरुषत्वयोः स्फुरतो संशयस्यैवोदयात्तत्सामग्र्योः समबलत्वमेव कल्प्यत इति भावः। ज्ञानमात्रे। तादृशज्ञानत्वावच्छिन्ने विशेषदोषविशेषाजन्यत्वे गौरवादिति। कार्यकारणभावद्वयकल्पने गौरवादिति भावः। कथमनुमितिरिति। अनुमितेरपि प्रतिबध्यतावच्छेदकाक्रांतत्वादिति भावः। कथं तर्हि उभयव्याप्यवत्तानिश्चयो व्याप्तिकः संशय इत्याशंक्य न भवत्येव तावद्यावत्तन्निश्चये अप्रामाण्यं न गृह्यत इत्याह। यत्र चेति। आश्रयासिद्ध्यादीत्यादिना स्वरूपासिद्धिव्याप्यत्वासिद्ध्योः परिग्रहः। साध्याप्रसिद्ध्यादीनामाधिक्यं निराकरोति। साध्याप्रसिद्ध्यादय इति। आदिना साधनाप्रसिद्धिपरिग्रहः। केषांचिन्मतमाह। एवं वह्निमानित्यादिना वदंतीत्यंतेन [illegible] नास्वरसस्तद्बीजं तु नीलधूमे व्याप्तिसत्त्वे नीलधूमे व्याप्यत्वासिद्धिः। न च तत्र व्याप्तिसत्वेपि नीलधूमत्वस्यानवच्छेदकतया तदवच्छेदेन व्याप्यत्वासिद्धिरेवेति वाच्यं। अ

=व्याप्यतानवच्छेदकतया १

= तादृशकाली = न अनित्यत्वव्या = प्य परामर्शे = १

त० २

सं०

नीलधूम महा वच्छेन = २

=अनतिरिक्तनीलरूपव्याप्यतावच्छेदकत्वस्य नीलधूमत्वेऽपि सत्त्वात् तथा च कोऽर्थः नीलधूमत्वस्य व्याप्यतानतिरिक्तवृत्तित्व

ननिरिक्त... वृत्तित्वरूपावच्छेदकत्वस्य नीलधूमत्वेऽपि सत्त्वात् । स्वरूपसंबंधरूपावच्छेदकत्वाभावाद्धूमत्वासिद्धिरित्यपि न

तथा सति पर्वतमान्नसास्नादिमतश्चाप्युक्तवापि व्याप्यत्वासिध्यापत्तेः सास्नाद्यपेक्षया गोत्वादिजातेर्लघुत्वेन सास्नादेः स्वरू

पसंबंधरूपावच्छेदकत्वाभावात् । अस्तु वा नीलधूमत्वादेः स्वरूपसंबंधरूपावच्छेदकत्वाभावात्तदवच्छेदेन व्याप्त्यभाव

रूपव्याप्यत्वासिद्धिर्नतु तस्या हेत्वाभासत्वं अनुमितिकारणीभूतव्याप्तिज्ञानाविरोधित्वात् । न च वह्निमदन्यावृत्तित्वप्रमे

य वानिति प्रमेयत्वसामानाधिकरण्येन व्याप्तिवगाहिज्ञानादनुमित्यापत्तिवारणाय हेतुतावच्छेदकावच्छेदेन व्याप्तिज्ञानस्यैव

कारणतया तद्विरोधितया निरुक्तव्याप्यत्वासिद्धिर्हेत्वाभास इति वाच्यं । तावताप्यनतिरिक्तवृत्तित्वरूपावच्छेदकत्वज्ञानस्य का

रणत्वेऽपि तत्र स्वरूपसंबंधरूपावच्छेदकत्वाभावावगाहस्य ग्राह्याभावानवगाहितया ऽविरोधित्वात् तस्माद्व्यर्थविशेषणस्थले न

व्याप्यत्वासिद्धिर्हेत्वाभासः पुरुषस्याधिक्येन निग्रहस्थानमिति ॥ ॥साध्याभाववदित्यादिना साध्यवदन्यत्वस्य पक्षादौ सति साध्या

दर्शपरिग्रहः तद्धर्मिकतदभावनिश्चयः अनाहार्याप्रामाण्यज्ञानानास्कन्दितत द्धर्मिकतदभावनिश्चयः बाधबुध्युत्तरक्ष

णे लौकिकसन्निकर्ष जन्यविशिष्टबुद्धेरनुभविकत्वादाह । लौकिकसन्निकर्षाजन्येति । नन्वेवं तदिंद्रियजन्यलौकिकबा

धनिश्चयोत्तरतदिंद्रियजन्यलौकिकविशिष्टबुध्यापत्तिरिति चेन्न । अलौकिकत्वस्य प्रतिबध्यतावच्छेदककोटौ वा निवे

स्यतदिंद्रियजन्यतद्...शिष्टबुद्धौ तदिंद्रियजन्यलौकिकतदभावनिश्चयत्वेन प्रतिबंधकत्वोपगमात् । तदिंद्रिय

जन्योपनीतभानात्मकबाधनिश्चयोत्तरतदिंद्रियजन्य... लौकिकतद्विशिष्टबुद्धेरयासतिबंधकतावच्छेदककोटौ

लौकिकत्वस्य निवेशः । न च लौकिकतदिंद्रियजन्याभावप्रमास्थले तदधिकरणे प्रतियोगिनोऽसत्त्वादेव न तद्विशिष्टलौ

किकप्रत्यक्षापत्तिरित्यलं तथाविधप्रतिबध्यप्रतिबंधकभावेनेति वाच्यं । यत्र प्रतियोग्यधिकरण एव सन्निकर्षादधिक

रणांतरस्थेतरभावस्य लौकिकप्रत्यक्षात्मकारोपो दोषेण निश्चितस्तदुत्तरं तदधिकरणे प्रतियोगिनो लौकिकप्रत्य

क्षापादनात् । तत्राभावलौकिकप्रत्यक्षजनकदोषस्य प्रतिबंधकत्वादेव नेयमापत्तिरन्यथा ऽभावारोपो सन्निकर्षे

=पर्वतः वह्निमान् प्रमेयादित्यनुमित्यापत्तिवारणाय हेतुतावच्छेदकावच्छेदेन व्याप्तिज्ञानमेव कारणं तथा च... नीलधूमत्वस्य हेत्वाभासत्वमागतं क... पर्वतो वह्निमान् इत्याकारक व्याप्तिज्ञानात्मकपरामर्शकत्वे व्याप्यत्वाहेतुतावच्छेदकरूपव्याप्यतावच्छेदकत्व... तथा च नीलधूमत्वव्या... =काकारकव्याप्यत्वासिद्धिरूपतोषज्ञानस्य प्रतिबंधकत्वं ... =वावगाहित्वं ... अस्यैव इति रूपानीलधूमत्वस्य हेत्वाभासत्वमागतमेव... इति वाच्यमित्युक्तम्... सन्निकर्षाजन्यमित्यादि =७

२ = किंच प्रतिबध्यप्रतिबंधकभावांतरकल्पने बीजमाह यत्रेति = २

प्रतियोग्यधिकरणे प्रतियोगिनः सत्त्वादिति = १

प्रतियोगिप्रत्यक्षापत्तिरितितुन। यत्र चित्तस्य द्वव्यस्कदोषेणाभावलौकिकप्रत्यक्षात्मकारोपस्तदुत्तरं प्रतियोगिप्रत्यक्षाप
दनात्। यत्राभावलौकिकप्रमासमकालं तत्तृतीयक्षणे वा तदधिकरणे प्रतियोगिप्रकारकानुभूयमानारोपजनकदोषस
मवधानं तत्राभावप्रमोत्तरं प्रतियोगिनो लौकिकप्रत्यक्षात्मकारोपापादनं वारणाय वा इंद्रियभेदेन तथाविधप्रतिबध्य
प्रतिबंधकभावोपगमात्। शंखो न पीतः शंखो नोरग इति निश्चये पि पित्तमंडूकवसांजनादिदोषवशाच्छंखः पी
तो यं शंखोरग इत्यारोपोदयात्तत्र व्यभिचारवारणायाह दोषविशेषेति। दोषसामान्याजन्यत्वनिवेशे भ्रममात्रस्यैव
बाधाप्रतिबध्यत्वापत्तिरतो विशेषेति। तथा च पित्तमंडूकवसांजनादिदोषान्विशिष्योपादाय तदजन्यत्वं प्रतिबध्यता
वच्छेदककोटौ निवेशनीयमिति भावः। न च पित्तद्रव्यात्मकदोषाजन्यत्वनिवेशो व्यर्थः। शंखः पीत इति भ्रमे शंखा
शेऽनुभूयमानस्यैव पित्तद्रव्यपीतिम्न आरोपोपगमेन तदंशे लौकिकत्वादलौकिकत्वस्य प्रतिबध्यतावच्छेदककोटौ नि
वेशादेव तत्र व्यभिचारवारणादिति वाच्यं। पित्तद्रव्यस्यातीतत्वेनैव स्थानदशायामपि तत्पीतिम्नः शंखादौ प्रत्य
क्षोदयेन स्मर्यमाणारोपस्यैव तत्र नवीनैः स्वीकारात्तदंशे तस्यालौकिकत्वात्। तथा सति शंखः पीत इति प्रत्यक्षो
त्तरं पीतं साक्षात्करोमीति साक्षात्कारित्वग्रहानुपपत्तिस्तद्ग्राहकलौकिकविषयतायास्तत्राभावादिति तु न। लौकि
कविषयताया इव दोषविशेषजन्यत्वस्यापि साक्षात्कारित्वव्यंजकत्वादन्यथाऽयमुरग इति स्मर्यमाणारोपे साक्षा
त्कारित्वग्रहानुपपत्तेः। शंखो न पीत इत्यादि तदिंद्रियजन्यत्वाघटितं तु ध्रुवं तदुत्तरं पित्तादिदोषवशात्तदिंद्रियजन्यः शंखः पी
त इत्यारोपो यद्यनुभवसिद्धस्त[illegible] तदा एवमेकेंद्रियजन्यप्रतिबध्यप्रतिबंधकभावे पि दोषविशेषाजन्यत्वं प्रतिबध्यताव
च्छेदके निवेशनीयमिति ध्येयं। ननु बाधप्रतिबध्यतावच्छेदककोटौ लौकिकान्यत्वस्यानिवेशे बाधनिश्चयोत्तरं लौकिक

अभावाधिकरणे २

= पित्तद्रव्यपी = तिमांशे = ८

तदंशे पीततो = त्री तस्य पीतत्व = प्रकारकप्रत्य = क्षस्य = ६

= चक्षुः संयुक्तस [illegible] चक्षुःसं [illegible] पित्तद्रव्यपीत [illegible] समवायः पित्तद्र [illegible] पीतिमरूपेण [illegible] न तत्र बाधेनेति = ४

= स्मर्यमाणस्य [illegible] पीतिम्नः आरोपः तस्यैवेति = ६

१ = प्राथमिकप्रतिबध्यप्रतिबंधकभावे शंकानिवृत्तिः = १

= हृदो [illegible] वत्स्याभावचा = त्रिसाकारकबाधनिश्चयोत्त = = २ = १

= उपनीतभानात्मकप्रत्यक्षे = तर = ५

सन्निकर्षजन्यसंशयापत्तिरितिचेन्न। भूतले घटवदिदमारक लौकिकप्रत्यक्षो संनिकर्षे स्यात्तं ज्ञेण कथंचिदुपस्थि
तस्य घटाभाववद्भूतले प्रकारत्व या भानवारणाय समानधर्मितावच्छेदकं तल्लौकिकलौकिकप्रत्यक्षसामग्र्या विपरीत
कोटिभानप्रतिबंधकत्वमवश्यमंगीकरणीयं। तथा च बाधनिश्चयोत्तरमपि नापत्तिर्लौकिकसन्निकर्षजन्यसंशय
स्य तत्कोटिरलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधिकायाः सत्वेन विपरीतकोटिभानासंभवात्। तर्हि क्वापि लौकिकसन्निक
र्षजन्यसंशयो न स्यादिति चेदोषः। ज्ञानप्रत्यासत्त्यैव पूर्वोपस्थितकोट्योर्भानसंभवादिति। यत्तु संशयस्य सर्वत्र तत्कोट्यंशे अलौ
किकसंनिकर्षसत्त्वे कथं संशयस्य न लौकिकत्वं कथं वा तत्र संशये विपरीतकोटिभानं। तत्कोटेरलौकिकप्रत्यक्षसाम
ग्र्याः प्रतिबंधिकायास्तत्र सत्त्वादिति तन्न। तत्र लौकिकसंनिकर्षसत्त्वेपि संशयजनकदूरत्वादिदोषस्य लौकिक
प्रत्यक्षप्रतिबंधकस्य सत्त्वेन लौकिकप्रत्यक्षसामग्र्यभावादुभयोरुपपत्तेरित्यन्यत्र विस्तरः। अस्य चिन्मतं दूषयति
नत्विति। प्रतियत्तीहस्यनेनान्वयः। नन्वेवं बाधनिश्चयकाले संसर्गत्वज्ञानाभावादेवानुमित्यभावोपपत्तौ बाधनि
श्चयस्य नानुमितिविरोधित्वमिति हेत्वाभाससत्वं न स्यादत आह। तद्विरोधितयेति। अनुमितिकारणीभूतसाध्य
संसर्गत्वज्ञानविरोधितयेत्यर्थः। नन्वप्रसिद्ध[illegible]नुमितिः कुत्रापि न भवत्येवेत्यत आह। साध्यसंशयेत्यादि।
ननु संशयभिन्नकालेपि सिषाधयिषाकालीनसाध्यनिश्चयात् सर्वं साध्यसंसर्गत्वज्ञानमस्त्येवेत्यत आह। आदीति।
आदिना सिषाधयिषाकालीनसिद्धिपरिग्रहः। ननु संशयांतरोपस्यैवानुमितिरितिवाच्यं। सतिविशेषदर्शने संश
यायोगात्। पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयोऽनुमितिप्रतिबंधकस्तदभावः कारणभूतस्तादृशप्रमा
त्वमेव बाधपदेनाभिधानमतं दूषयति। एवमिति। प्रमात्वज्ञानमपि। प्रमात्वनिश्चयोपि। मानाभावादिति। ग्राह्याभाववान्

व्याप्ति शालि[illegible] परामर्शः मध्ये संशयांतरोपत्सेवानुमितिरिति =३। =परामर्शात्मकविशेषदर्शने =३

मु॰दि॰ ६

कुह साध्य

साध्य॰

६७

=पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयरूपबाधज्ञानस्य =१। =संशयनिश्चयसाधारणाप्रामाण्यज्ञानाभावविशिष्टबाध =
=ज्ञानस्य प्रतिबंधकत्वे सत्त्वात्सर्थः। =३
६=पक्षविशेष्यकसाध्याभावप्रकारकज्ञानप्रमात्वविषयकत्व अनुमितिप्रतिबंधकतानतिरिक्तवृत्ति साध्या[illegible]
१=साध्याभावावगाहिनः

वगाहिनेस्ताहृशज्ञानस्य विरोधित्वे मानाभावादित्यर्थः। ननु पक्षे साध्याभावज्ञानेऽपि तत्राप्रामाण्यज्ञानकालेऽनु
मितेरुदयान्न साध्याभावज्ञानं प्रतिबंधकं। अस्मन्मते तु तदा साध्याभावज्ञाने प्रमात्वनिश्चया भावादेवात्रानुमि
त्युत्पत्तिरत आह। गौरवादिति। तथा च तत्रानुमितिनिर्वाहाय संशयनिश्चयसाधारणाप्रामाण्यज्ञानाभाव एव प्रतिबंध
कतावच्छेदककोटौ निवेश्यते न तु पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयत्वेन प्रतिबंधकत्वे गौरवादित्यर्थः। य
त्र पक्षे साध्याभावज्ञानमस्ति न तु तत्राप्रामाण्यज्ञानं न वा प्रामाण्यज्ञानं तत्रानुमितिर्न भवत्येवेति भावः। साध्याभाव
वत्पक्षघटितप्रमात्वविषयकत्वेऽनुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वसत्त्वात्तु स्याभासत्वं दुर्वारमिति तु न। प्रमे
यत्वविशिष्टव्यभिचारादेरेवताहृशाविशिष्टांतरघटितत्वेनाभासत्वायोगादिति। ननु अगृहीताप्रामाण्यक
साध्याभावनिश्चयस्य प्रतिबंधकत्वे प्रथमोपस्थितप्रमात्वनिश्चय एव तथा स्यादत आह। अन्यथेति। सत्प्रतिप
क्षादावित्यादिनाऽसिध्यादिपरिग्रहः। प्रतिबंधकत्वापत्तेरित्यस्यानुमित्यादावित्यादिः। ननु साध्याभावज्ञानप्रमा
त्वज्ञाने अनुमितिप्रतिबंधस्तदभावे नेत्यन्वयव्यतिरेकाभ्यां प्रमात्वज्ञानस्यानुमितिप्रतिबंधकत्वमत आह। कि
न्त्विति। कश्चिदुपयुज्यत इति। तथा चानुमितितत्कारणज्ञानान्यतरं प्रति साक्षात्प्रतिबंधकीभूतज्ञानविषयत्वाभा
वान्न साध्याभावप्रमात्वं हेत्वाभास इति भावः। व्यभिचारज्ञानादेरित्यादिनाऽसिद्धिज्ञानपरिग्रहः। भेदादिति। तथा
च बाधस्थलेऽसिद्धिव्यभिचारान्यतरनियमेऽपि बाधज्ञानस्य व्यभिचारादिविषयकत्वाभावेन तस्य हेत्वाभासांत
रत्वमिति भावः। न च हेतुमान् पक्षः साध्याभाववानित्याकारकएव बाधग्रहः कुतो न भवति सामग्रीसत्त्वात्। तथा च

८=पक्षविशेष्यकसाध्याभावप्रकारकज्ञानप्रमात्वस्य अनुमितिप्रतिबंधकतावच्छेदकधर्मातिरिक्तपक्षवृत्तिसाध्याभावत्वेन तद्घटितत्वेनाभासत्व[illegible]
४=साक्षात्प्रतिबंधकीभूतं यद्ज्ञानं पक्षवृत्तिसाध्याभावज्ञानं तद्विषयत्वाभावात् =४
२=साध्याभाववद्वृत्तित्वादिस्वरूपव्यभिचारादिविषयकत्वाभाव

=साध्याभाव =वत्पक्षघटि =तप्रमात्वस्य ६ =प्रतिबंधकं =स्यात =८

=अयोगोलकं पक्षमवतत्य हेरि साकारके अयोगोलक=२ ३ =परामर्शात्मकाव्यभिचारज्ञानरूपप्रतिबंधके सत्यपीतिभावः=३
=पक्षकधूमसाध्यकवह्निहेतुके अनुमाने=२

मु॰ दि॰ ६८

दि॰ भ॰

व्यभिचारज्ञानास्तिकेचबाधबुद्धिरितिवाच्यं।परामर्शात्मकाव्यभिचारज्ञानरूपप्रतिबंधकसत्वेनबाधबुद्धेर्व्यभिचा
रविषयकत्वासंभवात्।एकत्रहेतौव्यभिचाराव्यभिचारविषयकैकनिश्चयासंभवाच्च।नन्वयोगोलकपक्षकधूमसा
ध्यकवह्निहेतुकेबाधलौकिकप्रत्यक्षवद्व्यभिचारलौकिकप्रत्यक्षमपिव्याप्तिनिश्चयेसत्यपिभविष्यतीयतआह।
किंचेति।अकिंचित्करइति।व्यभिचारज्ञानंहिअनुमितौनसाक्षात्प्रतिबंधकंकिंतुपरामर्शप्रतिबंधकद्वारा
तथाचपरामर्शोत्तरकालीनंव्यभिचारज्ञानमकिंचित्करमितितत्रबाधबुद्धिरेवप्रतिबंधिकेतिभावः। व्यभि
चाराद्यसंकीर्णमपिबाधंप्रदर्शयति।एवमित्यादिना।बाधस्यैवेति।तत्रपक्षेहेतुसत्वेनस्वरूपासिद्धेःप्रतियो
गिव्यधिकरणसाध्याभाववद्वृत्तिरूपस्यव्यभिचारस्यचाभावादितिभावः।बाधतत्त्वाप्यभिन्नायेहेत्वाभासा
स्तथाप्याअपितन्मध्यएवांतर्भवंतीतिपाठः।बाधःसाध्याभावविशिष्टपक्षादिस्तद्व्याप्यःसत्प्रतिपक्षस्तद्भिन्ना
व्यभिचारविरुद्धासिद्धास्तद्व्याप्यानांतत्रैवांतर्भावइत्यर्थः।व्यभिचारादेरिवव्यभिचाराद्व्याप्यस्यापिव्याप्ति
ग्रहप्रतिबंधकज्ञानविषयत्वेनपंचहेत्वाभासानंतर्गतत्वेनतस्यातिरिक्तहेत्वाभासत्वंस्यादित्यर्थः।नप्रतिबं
धकइति।साध्याभावव्याप्यव्याप्यवत्ताज्ञानस्यसाध्यवत्ताज्ञानविरोधित्वेमानाभावादितिभावः।एवंकृताबीजा
स्यभिन्नतयेति।साधारणस्याव्यभिचारज्ञानेविरुद्धस्यसामानाधिकरण्यग्रहेप्रतिबंधकत्वादितिभावः।असा
धारण्यघटकंपक्षत्वंनिश्चयगर्भंनतुसाध्यवत्समात्रमित्याह।सपक्षइति।एवमग्रेपि।सपक्षत्वविपक्षत्वयोर्निश्च
यनिवेशस्यफलमाह।शब्दइत्यादिना।एवमुक्तमिति।असाधारणःसाध्यासमानाधिकरणइत्यादिनोक्तमित्य

=व्यभिचार= ज्ञानेप्रति= बंधकत्वाप्रतिबंधक= त्वादिकिमर्थ मित्याशंक्याह [illegible] =७

स २

=उत्पत्तिकाल=वच्छिन्नेघटे=६

तू

अन्वयेति॥

६८

134

१ = केवलान्वयिनी पक्षता यस्य हेतोः यन्निरूपिता पक्षता केवलान्वयिनीति वाक्यार्थः = १
= सिसाधयिषाविरहविशिष्टसिद्ध्यभावरू- २ = न तु सिसाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षतेति = १
= पपक्षतायाः = ३ = साध्यनिश्चयविरहे तत्सामग्र्याः संशयसामग्र्याः = ६

र्थः। केवलान्वयिपक्षक इतीति। अत्र पक्षता साध्यसंशयरूपा ग्राह्या तेन सर्वमभिधेयं प्रमेयत्वादित्यादौ यदा सि
द्धिः सिषाधयिषा च तदा साध्यनिश्चयसंभवेन सामानाधिकरण्यघटितव्याप्तिग्रहसंभवात्तस्य सद्धेतोः लक्ष्य-
तया शिषाधयिषाविरहविशिष्टसिध्यभावस्य तदा केवलान्वयित्वेऽपि तत्र नातिव्याप्तिः। अनुपसंहारिणा हेत्वा
भासत्वमुपपादयति। सर्वमभिधेयमित्यादिना। सर्वस्यैव पक्षत्वात्सामानाधिकरण्यग्रहस्थलाभावादिति। सं
शयोसत्त्वे क्षणे निश्चयवारणाय निश्चयं प्रति संशयसामग्र्याः प्रतिबंधकत्वस्यावश्यंवाच्यतया प्रकृते सर्वत्र सा
ध्यसंदेहसत्त्वेतत्सर्वत्र सामग्र्याः सत्त्वेन साध्यनिश्चयस्य कुत्राप्यसंभवेन व्यापकसाध्यसामानाधिकरण्यवि
शिष्टधर्मत्वादिरूपव्याप्तिग्रहानुत्पादान्न तत्रानुमितिरित्यनुपसंहारिणो हेत्वाभासत्वमिति भावः। क्षतेर
भावादिति। तदानीमपि केवलान्वयिपक्षताकत्वरूपस्यानुपसंहारित्वस्य क्षतेरभावादित्यर्थः। तथा च तत्रानुप
संहारित्वस्य सत्त्वात्तस्य व्याप्तिज्ञानानुत्पादप्रयोजकत्वाभावाद्धेत्वाभासत्वानुपपत्तिरिति भावः। न च संशयसा
मग्र्याः सत्त्वात्कथं पक्षैकदेशे साध्यनिश्चय इति वाच्यं। सर्वत्वधर्मितावच्छेदकक संशयसामग्रीसत्त्वेऽपि घट
त्वादिधर्मितावच्छेदकक साध्यनिश्चयोत्पादे बाधकाभावात्। समानप्रकारकत्वेनैव विरोधात्। समानविषयत्वे
न प्रतिबंधकत्वे त्वाह। अस्त्वेवेति। तस्य। सहचारग्रहस्य। तस्य स्वरूपसत एव विरोधित्वेन वेत् ज्ञानस्यानुमि
त्यनुत्पादप्रयोजकत्वाभावादिति भावः। न च तत्र सहचारग्रहप्रयोजकः संशय एव हेत्वाभासस्तस्यापि स्वरू
पसत एव विरोधित्वात्। न च संशयविषयस्य साध्याभावविशिष्टपक्षादेरेव तत्राभासत्वमिति वाच्यं। सर्वमभि
धेयमित्यादावभिधेयत्वाभावविशिष्टपक्षाप्रसिद्धेरित्यन्यत्र विस्तरः। त[illegible]दर्थ इति। तेन साधारणे नातिव्याप्तिरि

= सहचारग्रहे नैवा- हेत्वाकारकस [illegible] = ५ [illegible] पक्षैकदेशे सह- चारग्रहकालेऽपि =

= प्रमेयत्वरू- पसद्धेतोः = २
तरा ४
= प्रमेयत्वरू- पहेतौ = ८
ना

८१ ६ = सर्वत्वं धर्मितावच्छेदकं यस्मिन् स सर्वत्वधर्मितावच्छेदककः एतादृशः संशयस्तत्सामग्रीसत्त्वेऽपि = ६

यत्र्यभावसाधनाधिकरणत्वव्याप्यतावच्छेदकं स्वपर्याप्त्यवच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकतापर्याप्त्यनधि... धर्मांतरताद्दशधर्मांतरविषयकप्रतीतिविषयत्वं स्वव्याप्यतावच्छेदकत्वमिति। तथा च धूमत्वं व्याप्यतावच्छेदकं भवति कथमिति स्वं ध... करणतद [illegible] धिकरणे धू १ = धूमप्रागभावत्वस्य = मैवं मानं यत्व्याप्यतावच्छेदकं स्वधूमत्वं तत्र पर्याप्त्यव्यावच्छेदक...

तिभावः। धूमप्रागभावत्वेति। तस्य व्याप्यतावच्छेदकीभूतधूमत्वघटितत्वेन तत्संग्रहो न स्यादिति भावः। स्वस्य स्व विषयकप्रतीतिविषयत्वघटितस्याभावादु धर्मांतरेति। ननु च नीलधूमत्वस्यापि ताद्दशधर्मांतराघटितत्वमस्त्येव धूमत्वस्य नीलधूमत्वभिन्नत्वाभावादिति वाच्यं। स्वविषयकीये प्रतीति विषयत्वस्य पर्याप्त्यवच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकतापर्याप्त्यनधिकरणत्वपर्यवसितस्य तदर्थत्वात्। शुद्धधूमत्वपर्याप्त्यवच्छेदकताकप्रकारत्वनीलत्वादिविशिष्टधूमत्वपर्याप्त्यवच्छेदकताकप्रकारत्वयोर्भेदात्। नन्वेवं वह्निमदन्यावृत्तित्वस्य वह्निव्याप्यतावच्छेदकत्वानुपपत्तिः। तस्य वह्नित्वरूपताद्दशधर्मांतरघटितत्वात्। धूमान्यत्वादेर्व्याप्यतावच्छेदकत्वापत्तिश्चिया धर्मांतरस्य विशेष्यविधया घटकत्वविवक्षणस्याशक्यत्वादिति चेन्न। स्वसमानाधिकरणपदेन स्वव्यापकस्य विवक्षितत्वात्। वह्नित्वस्य वह्निमदन्यावृत्तित्वव्यापकत्वात् धूमत्वस्य धूमान्यत्वव्यापकत्वाभावाद्दोषासंभवात्। स्वव्यापकत्वं च धर्मांतरस्य स्वघटकसाध्यसंबंधितावच्छेदकत्वेन। अन्यथा धूमालोकान्यतरत्वस्य वह्निव्याप्यतावच्छेदकत्वापत्तेः। धूमत्वालोकत्वयोः प्रत्येकमन्यतरत्वाव्यापकत्वादिति। विरुद्धयोः परामर्शे हेत्वोरित्यत्र विरुद्धयोर्हेत्वोः परामर्श इति भ्रमवारणायाह स्वसाध्येति। स्वं च सत्प्रतिपक्षत्वेनाभिमतो हेतुस्तत्साध्यस्य विरुद्धो यः साध्याभाव इत्यर्थः। ननु सन्निकालीनघट इत्यादिमर्तोक्तमयुक्तं तत्र पक्षे घटे गंधध्वंसान्यत्वाभावादत आह। पक्षतावच्छेदकेति। कालस्यैव देशस्यापि पक्षतावच्छेदकत्वे बाधसंभवात्तदप्रदर्शनेन मूलस्य न्यूनतां परिहर्तुमाह। एवमिति। बोध्यमिति। तत्र पक्षे वृक्षे संयोगसत्त्वेपि पक्षतावच्छेदकमूलावच्छेदेन संयोगाभावादिति भावः॥ ॥इत्यनुमानं॥ ॥श्रीवेंकुंठो विजयतेतराम्॥

136

अतिदेशवाक्यार्थशाब्दबोधे सादृश्यविशिष्टपिंडदर्शनं च विशेषणीभूतं सा= =दृश्यज्ञानमात्रं करणं विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वात् विशेष= =णज्ञानविधया तज्जन्यो विशेषणज्ञानजन्योमिति=७

६=गोसदृशो गवयपदवाच्य इत्येवमतिदेशवाक्यार्थज्ञानं=

॥श्रीगणेशाय नमः॥ अवसरसंगतिमभिप्रेत्याह। उपमितिमिति। तत्र। गवये। सादृश्यदर्शनं। सादृश्यप्रत्यक्षं। तदु पमितिकरणमिति। नवीनमते नैतत्। अतिदेशवाक्यार्थशाब्दबोधं करणमतिदेशवाक्यार्थस्मरणं व्यापारः सादृश्यविशिष्टपिंडदर्शनं सहकारीति संप्रदायमतं तु सहकारितया आवश्यकं सादृश्यविशिष्टपिंडदर्श नस्यैव करणत्वं युक्तमित्युपेक्षितं। स्मरणं जायत इति। सादृश्यविशिष्टपिंडदर्शनस्योद्बोधकतया तादृशवाक्या र्थस्मारकत्वादिति भावः। तदेव व्यापार इति। एतेन सादृश्यविशिष्टपिंडदर्शनोत्तरं यत्रातिदेशवाक्यार्थशाब्द बोधस्तत्रातिदेशवाक्यार्थस्मरणापेक्षाभावान्नातिदेशवाक्यार्थस्मृतिव्यापारकं सादृश्यविशिष्टपिंडदर्शनं क रणं किंतु सादृश्यज्ञानमात्रं करणं विशेषणज्ञानविधया तज्जन्यम [illegible] तिदेशवाक्यार्थज्ञानं सादृश्यविशिष्ट पिंडदर्शनं चोभयं व्यापार इति कस्यचिन्मतं प्रत्युक्तं। यत्र सादृश्यविशिष्टपिंडदर्शनोत्तरमतिदेशवाक्यार्थशा ब्दबोधस्तत्रोपमित्यनभ्युपगमात्। किंतु तदुत्तरं पुनः सादृश्यविशिष्टपिंडदर्शनं ततोऽतिदेशवाक्यार्थस्मरणं तदुत्तरमेवोपमितिरिति भावः। गवयो गवयपदवाच्य इति ज्ञानं जायत इति। एतेनोपमितिर्न प्रमित्यंतरं। किंतु शाब्दबोध एव सिद्धे गोसदृशो गवयपदवाच्य इत्यत्र सदृशपदेनोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वे विधेये विधेयोपमितेर्गवयपदजन्यगवयत्वविशिष्टोऽयं गोसदृशो गवयपदवाच्य इत्याकारकस्यैवोपमि तिस्वरूपत्वादित्यपास्तं। गवयत्वावच्छेदेन गवयपदवाच्यत्वपरिस्थितिं विना शाब्दबोधरूपत्वासंभवात्

सादृश्यज्ञानं = दृष्टान्तं ५

गोसदृशो गवयपदवाच्य इत्येवं सादृश्यविशिष्टपिंडदर्शनं ७

सादृश्यज्ञानं = दृष्टान्तं ८

अतिदेशवाक्य = [illegible]

४ गोसदृशं द्रव्यमित्याकारकात्=४ ।६=संस्थानादिगुरुधर्मावच्छेदेन६

स्य२

तिः। न च गोसादृश्यं गवयत्वस्य न प्रत्यक्षेणोपस्थितौ कथं गवयत्वावच्छेदेनैव गवयपदवाच्यत्वोपमितिर्न तु सादृश्यावच्छेदेनेति वाच्यं उपस्थितेस्तौल्येपि गवयत्वस्याल्पापेक्षया गोसादृश्यस्य गौरवज्ञानेन तदवच्छेदेन गवयपदवाच्यत्वोपमितेरनुदयात्। गवयपदाद्गवयत्वप्रकारकशाब्दबोधानुपपत्तेश्च तत्प्रकारकशाब्दबोधे तदवच्छेदेन शक्तिग्रहस्य हेतुत्वात्। न च द्रव्यत्वविशिष्टे सादृश्यज्ञानाद्गवयत्वावच्छेदेन गवयपदवाच्यत्वोपमितेरनुदयात् तद्धर्मविशिष्टे सादृश्यज्ञानं तद्धर्मावच्छेदेनोपमितिजनकं वाच्यं। तथा च यत्र गवयत्वास्फूर्त्यानुपस्थितिस्तदा सादृश्यस्य संस्थानादिगुरुधर्मविशिष्टे यत्र तदवच्छेदेन गवयपदवाच्यत्वोपमितिरिति वाच्यं ३ इष्टापत्तेः। तस्याः भ्रमत्वेन तादृशगुरुधर्मावच्छेदे गवयादिपदवाच्यत्वासाधकत्वादिति। इदं तल्लक्षणं। वैधर्म्यविशिष्टपिंडदर्शनं करणं। उष्णादिविधर्मगुणवती पृथिवीसतिदेशवाक्यार्थस्मृतिर्व्यापारः। पृथिवीत्वावच्छेदेन पृथिवीपदवाच्यत्वोपमितिः फलमित्यपि बोध्यं।

७५ ननूपमानस्य प्रमाणांतरत्वे मानाभावः। न च प्रत्यक्षादिप्रमिति विजातीयप्रमितिकरणत्वात्तस्य प्रमाणांतरत्वं उपमितेः प्रत्यक्षादिप्रमितितो विजातीयत्वाभावादिति चेन्न। चक्षुरादिव्यापारविगमेपि उपमितेरुत्पादेन चाक्षुषादित्वासंभवात्। न वा मानसत्वं। मानसोत्तरमनुव्यवसायानुपमिनोमीति प्रतीतेर्विषयत्वात्। उपमित्युत्तरं साक्षात्करोमीति प्रतीतेरनुदयेन तत्र प्रत्यक्षत्वसत्वे प्रमाणाभावाच्च। अन्यथा अनुमितेरपि मानसत्वापत्तेः। नाप्यनुमितिः। व्याप्त्यादिज्ञानं विना उदयात्। न शाब्दं। पदज्ञानाजन्यत्वात्। न स्मृतिः। अननुभूतार्थ

३=अलौकिकमानसत्वं=३

६ = घटत्वावच्छिन्नघटरूपोऽर्थः बोधकत्वेन भवतु इतीश्वरेच्छा तथा च वाक्यार्थः बोध्य इत्यत्र प्रत्ययार्थः विषयत्वं प्रकृते च =
= घटशक्त्यजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितघटपदार्थनिष्ठविशेष्यतासंबन्धेन इतीश्वरेच्छेति एवं सर्वत्र = ५

॥ श्रीगणपतये नमः ॥ उपजीव्योपजीवकभावसंगतिमभिप्रेत्याह । सत्त्वे पदज्ञानं लिंगमिति । एवकारार्थस्य सत्त्वस्य तु
ब्दस्य व्यवच्छेदं स्पष्टयति । मुक्तावल्यां न तु ज्ञायमानमिति । मो निश्छेदाविद्यादिना क्लिष्टादिबोधकविजातीयस्त्रे त
शब्दः संग्रहः । अन्यथा पदार्थज्ञानमात्रस्य व्यापारत्वे तत्रापि । पदजन्यपदार्थोपस्थितावपि । घटकत्वं संसर्गस्यार्थः । अन्य
था शब्दस्यानुपादाने । ननु शक्तिर्यदा शक्तिस्तदा गंगापदात्तीरादेर्बोधो न स्यात् शक्त्या पदजन्यतीरोपस्थितेरभा
वादत आह । शक्तिश्चेति । अन्यतरसंबंधः । अन्यतरात्मकः संबंधः । अत्रैव । पदजन्यपदार्थोपस्थितावेव । साचेति । य
द्यपि ईश्वरेच्छाया ऐक्या घटत्वावच्छेदो बोद्धव्य इतीश्वरेच्छा पटेऽपि स्यादिति प्रसंगः । एवं गंगापदजन्यबोधविषयत्वप्रका
रकेच्छायास्तीरेऽपि सत्त्वात् तस्यैव तीरबोधोपपत्तेर्लक्षणोच्छेदापत्तिः । तथापि गंगादिपदवाच्यत्वव्यवहारस्य नीरादिभिन्नेऽभा
वाद् गंगादिपदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेनेश्वरेच्छैव गंगादिपदानां शक्तिः तीरादिनिष्ठ
विशेष्यताया गंगादिपदजन्यबोधविषयत्वप्रकारतानिरूपितत्वेऽपि न तस्यास्तादृशविषयतात्वेन तादृशप्रकारतानिरूपि
तत्वमपि तु शुद्धविषयतात्वेनेति नातिप्रसंगो न वा लक्षणोच्छेद इति । आधुनिके नास्ति । आधुनिकैः पित्रादिभिरेकादशेऽह
नि संकेतिते नाम्नि । इतीश्वरेच्छाया इति । एकादशेऽहनि काले नाम्नि उच्चारणविषयनामत्वेन सामान्यरूपेण सः अर्थः । आधुनिक
संकेतितेति । आधुनिकमात्रसंकेतितेन नदीवृद्ध्यादिपदे तु संप्रदायमतं स्वरसं हृदि निधाय नवीनमतं प्रदर्शयति । नव्यास्त्विति ।
न शक्तिरिति । तथा सत्याधुनिकसंकेतितान्न घटादिपदाच्छाब्दबोधो न स्यादिति भावः । मतद्वयेऽप्यपभ्रंशस्थले गगर्यादिप
दे शक्तिभ्रमादेव बोध इत्यवधेयं ॥ व्याकरणादिति । भूसत्तायां वर्तमाने लट् इत्यादि व्याकरणादित्यर्थः । लाघवादिति । ल
तिल्वजातेः शक्यतावच्छेदकत्वे लाघवादित्यर्थः । न च कर्तुरनभिधानादिति अनभिहित इत्यधिकारीयेण कर्तरि तृतीय
३ = आधुनिकमात्रसंकेतितेन नदीवृद्ध्यादिपदे शक्त्यस्वीकारे = ३

= बोधविषयत्वप्रकारतानाम बोधविषयत्वनिष्ठप्रकारता =

ते४

आदिना व्याख्याः घटपदादिः = ७

= तीरादिनिष्ठवि = शेष्यताया = ९

= स्त्रियाख्यो नदी । वृद्धिरादैच् इत्यादि सा = विसर्जः । = ४

सत्येनानभिहिते कर्त्तरि तृतीयाभिधानादिति भावः। तत्र। तृतीयायां। तंत्रेस्यात्। प्रयोजकः स्यात्। ननु कर्तृगतसंख्या
भिधानएव किं प्रयोजककर्मसाकांक्ष्यत प्रयोजकं दर्शयति। संख्याभिधानेति। चैत्रः पचति तंडुलं इत्यादौ कर्मसादिगु
णत्रिक प्रथमांतपदोपस्थाप्य तंडुलादिव्युदासायाह। कर्मत्वाधनवरुद्ध इति। ननु चैत्र एव मैत्रो गच्छतीत्यत्र आ
ख्यातेनैकवचनत्वरूपेणोक्तायाः संख्यायाश्चैत्रे ऽन्वयः स्यात् कर्मत्वाधनवरुद्धत्वात् प्रथमांतपदोपस्थाप्यत्वाच्च। किं
च पचकमन्नं भुज्यत इत्यादौ चान्नादौ संख्यान्वयानुपपत्तिः पाचककर्मत्वस्यान्ने अन्वयेन कर्मत्वाधनवरुद्धत्वाभा
वादत आह। कर्मेत्यादीत्यस्येति। तथा च कर्मत्वपदमितरपरं अनवरुद्धत्वं चाविशेषणतया विवक्षितं। वस्तुतस्तु
तस्यापि न विवक्षा। अविशेषणत्वमात्रस्य विवक्षितत्वात्। अविशेषणत्वं प्रकारताभिन्नत्वं तस्य च शाब्दबोधात्पूर्वं चै
त्रादावपि सत्वाच्चैत्र एव मैत्र इत्यादौ चैत्रेपि संख्यान्वयापत्तिः। न च चैत्रीयं साहस्यमित्यवांतरवाक्यार्थबोधस्य पूर्वंस
त्वात्कथं अविशेषणत्वं चैत्रस्येति वाच्यं। यत्र खलेकपोतन्यायेन बोधस्तत्र चैत्रीयं साहस्यमित्यवांतरवाक्यार्थबोध
स्य पूर्वमभावादतो विशेषणत्वतात्पर्यविषयपर्यंतानुधावनं। न च चैत्र एव पचति चैत्रश्चैत्रं पश्यतीत्यादावेवकारार्थअ
न्यस्मिन्कर्मत्वादौ च चैत्रस्य विशेषणत्वात् कथं तत्र संख्यान्वय इति वाच्यं। विशेषणत्वमात्रेण तात्पर्यविषयत्वस्य विव
क्षितत्वाच्चैत्रस्योक्तस्थले विशेषणत्वे [illegible] मुख्यविशेष्यत्वाभ्यां तात्पर्यविषयत्वात्तत्र संख्यान्वयोपपत्तिः। यदि च चैत्र एव मैत्र इ
त्यादौ यदा चैत्रादेर्विशेषणत्वतात्पर्यविषयत्वं तदा चैत्रेपि संख्यान्वयापत्तिः। न च शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वान्नैवमि
ति वाच्यं। नानार्थातिरिक्तस्थले शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वे मानाभावादित्युच्यते तदा। विशेषणत्वं विशेषणत्वमा
त्रप्रयोजकप्रथमांतत्वं तदानुपस्थाप्यत्वमत्र बोध्यं। न विशेषणत्वतात्पर्यं। तथा च तंडुलं पचतीत्यादौ यदा … विशेषणत्वमु

नविशेषणत्वमात्रतात्पर्य।१

७१

=धात्वर्थातिरिक्तविशेषणत्व मुख्यविशेष्यत्वोभयाभाववत्त्वं धात्वर्थातिरिक्तविशेषणत्वमिति =५

^संख्यामुविषयीकृत्यापिभावनान्वयबोधस्यानुभवसिद्धतयाभावनान्वयबोधत्वस्यअन्यता
वच्छेदकत्वावस्यकत्वं =

ख्याः विशेष्यत्वाभ्यां तंडुलबोधतात्पर्ये तत्र तंडुले संख्यान्वयवारणाय प्रथमांते त्यादी तिभावः। इदमुपलक्षणं। चैत्रेण
सुप्यते इत्यादौ धात्वर्थस्वापादौ संख्यान्वयवारणाय प्रथमांतपदोपस्थाप्यत्वस्यावश्यकत्वात्। द्वितीयदलस्य प्रयो
जनांतरेण प्रयोजनं वक्तुमन्यथाप्रथमदलार्थमाह। यद्वेति। चैत्रादेर्वारणमिति। तस्य साक्षादन्यविशेषणत्वा ...दितिभा
वः। द्वितीयांतपदोपस्थाप्यत्वादिति। प्रथमांतपदोपस्थाप्यत्वाभावादित्यर्थः। अन्यकल्पे चैत्र एव पचतीत्यादौ चैत्रे संख्या =यद्यपि क्षेत्र
न्वयोपपादनं तु सुधिभिर्विभावनीयं। इदं सवधेयं। संख्यान्वयबोधप्रतिस्यात् त्वेण प्रथमांतपदोपस्थाप्यत्वं हेतुः। न५
आख्यातेन भावनानवगाहि संख्याबोधस्य कुत्राप्यजननात् संख्यान्वयबोधत्वव्यापकभावनान्वयबोधत्वावच्छि
न्नहेतुत्वस्य ततादृशप्रथमांतपदोपस्थाप्यत्वस्य रूपकारणविरहेणैव प्रथमांतपदानुपस्थाप्ये संख्यान्वयापसत्त्वं =कर्मीभूततंडु
भवात्। नन्वनिरुक्त ... प्रथमांतपदोपस्थाप्यत्वस्यअन्यतावच्छेदकं भावनान्वयबोधत्वं संख्यान्वयबोधत्वं वे लादौ =७
कार्यतावच्छे
दक त्वे =१
सत्त्वविनिगमनाविरहः संख्यान्वयबोधत्वस्य तथात्वेमानाभावात्। लकारसामान्यस्य व्यापारोऽर्थ इतिमीमांस
कमतं दूषयति। गौरवादिति। अन्यत्वादिघटितस्य व्यापारत्वस्य यत्नत्वजात्यपेक्षया गुरुत्वादितिभावः। नन्वाख्या
तस्य नयत्नार्थकत्वं रथो गच्छतीत्यादौ तदभावे ... ख्यात ... पदप्रयोगादत आह। रथ इति। रथो गच्छतीत्यादौ गम
नानुकूलव्यापारस्य न बोधः किंतु गमनाश्रयत्वस्यैवेति नवीनमतमाश्रित्याह। आश्रयत्वे वेति। लक्षणा नि
रूढलक्षणा। क्वचित्तथैव पाठः। चक्षुर्जानातीत्यादौ व्यापारे जनकत्वे वा लक्षणास्वीकारात्। जानातीत्यत्राख्यात
स्याश्रयत्वे लक्षणानियमो न संभवतीत्यत आह। आदीति। आदिना इच्छतीति यतते संग्रहः। इदमत्र बोध्यं तंडुलं
पचति चैत्र इत्यादौ कर्मसंबंधितार्थः। तत्र तंडुलस्य आधेयतया अन्वयः। कर्मत्वस्य पाके। पाकस्याख्यातार्थे ...
दें: २

घटकानयने साकारकवाक्यजन्यं घटकर्मकमानयनं मत्कार्यमित्याकारकं ज्ञानं अत्र ख्यातार्थः कार्यत्वं तादृशज्ञानस्यानुमिति
ज्ञाकारः अयं पुरुषः घटकर्मकानयन धर्मिककार्यत्वप्रकारकज्ञान = २ = पाककर्मीभूतः = ३ वानिसाकारक इति = ८

तौ तस्याश्चैत्र इति तंडुलकर्मक पाकानुकूलकृतिमांश्चैत्रः इति बोधः चैत्रेण पच्यते तंडुल इत्यादौ इति स्यतीयार्थः तस्यामा
धेयतया चैत्रादेरन्वयस्तस्याश्च धात्वर्थपाके तस्यात्मनेपदार्थफले तस्य चाश्रयता संबंध इति तंडुले। चैत्र इति प्रातिपदिकार्थस्य पाक
जन्यफलाश्रयः तंडुल इत्यन्वयबोधः। कृतांतु कर्त्रा कर्म चार्थः चैत्रः पक्ता तंडुलः पक्व इत्यभेदान्वयात्तु रोधात्मार्थयोर्भेदे
नान्वयस्य व्युत्पन्नत्वादित्यन्यत्र विस्तरः। तथोक्तमिति उपमाननिरूपणावसर इत्यर्थः। शक्तिग्रह इति। भवतीति शेषः। ब्रे
शेन व्युत्पन्नत्वादिति। गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वति इति कोशस्य उभयत्र शक्तिग्राहकत्वादिति भावः। लाघवादि
ति। नीलादिमत्त्वापेक्षया नीलत्वादिजाति लघुतया शक्यतावच्छेदकत्वादित्यर्थः। नीलादिविशिष्टे तु लक्षणेति। गुणव
चनानामनुपालुगो इति स्मरणात्तु सेतमतुपूर्वविशिष्टार्थबोधसंपादकमलंलक्षणैः सपि वदंति। तद्घटानयनं ननु व्यव
हारेणानयनादिना अनुमिते घटानयनादिधर्मिककार्यताज्ञाने पदानां कारणत्वं लाघवात् तद्व्यावच्छेदेनैव गृहीतं। एवं
च साक्षात्परंपरया कार्यत्वान्वितं विषयकशाब्दत्वावच्छिन्नं प्रति पदत्वेन कारणत्वमिति कार्यकारणभावः पर्य
वसितः। इयमेव कार्यान्विते पदानामानुभाविकी शक्तिः। एवं च कार्यान्वितविषयकशाब्दत्वव्यापकीभूत कार्यविष
यकत्वावच्छेदकेन नकार्यतावाचकत्वं आदिपदाभावात्कथं को शब्दितः शक्तिग्रह इति प्राभाकराक्षेपं त
न्मतदूषणेन दूषयितुं तन्मतसिद्धमर्थं प्रदर्शयति इत्थं चेत्यादिना। एतेन स्मारकशक्तिप्रसंगे आनुभाविकश
क्तिप्रदर्शनमनुचितमित्याशंका निरस्ता। ननु भूतले नीलो घट इत्यादितः कार्यता विषयकबोधापत्तिः। तत्र तादृश
पदानां सामर्थ्यावधारणादिति त्वयैवोक्तत्वादित्यत आह। कार्यताबोधं प्रति चेति। सामर्थ्यात्तदभावादिति। कार्यताबो
धं प्रति पदानां स्वजन्यकार्यत्वोपस्थितिद्वारा हेतुत्वं घटादिपदानां कार्यत्वानुभवं प्रति हेतुत्वेपि घटादिपदेषु कार्यत्वस्मा

त्वावच्छि ५ घटादि ७

३ = कार्यतान्वित घटादिपदानां ३

मु.र. ७२

न्ना २

ज्ञानके नेति शोध: = ८

त्या

ये ७ घ १

घटादिपदा = नां = ८

मे

ता ८

७२

४ = कार्मतान्वितविषयक एवेति = ४ = इदं नाम। इहसकारतरौ मधुर पिकोरौ ति इति वाक्यं शक्तिग्रहस्योदाहरणं न कुतः = ति उ॰ र्थ धर्मिणि नामार्थान्वयस्याकत्सन्नत्वात् कोर्थः सहकारतरुनिष्ठ मधुर = ब्दानुकूल उ क तिस्ति उ॰ र्थः वादि इति विनि ष्टेति उ॰ र्थ धर्मणि पि

त्यार

रकशक्त्यभावेन स्मारकशक्त्या कार्यत्वोपस्थापक लिंगादिपदाभावान्नेभस्तले घट इत्यादितः शाब्दबोध इति भावः। लाघवेनेति। कार्यान्वितघटशाब्दत्वापेक्षया घटशाब्दत्वस्य कार्यतावच्छेदकत्वे लाघवेनेत्यर्थः। अतएव कार्यत्वाविषयकबोधं प्रति पदानां हेतुत्वादेव तत्कारणत्वेन सुखदुःखयोः कारणत्वेन तद्धेतुतया तादृशशाब्दबोधे हेतुतया व्यभिचारादिति। घटादिपदैः कार्यताविषयक एव बोधो जन्यत इति नियमे व्यभिचारादित्यर्थः। कार्यत्वाविषयकबोधस्यापि चैत्रपुत्रस्ते जात इत्यादिपदैर्जननादिति भावः। अध्याहार्यमिति। तथा च तत्रापि लोडादिजन्यकार्यत्वोपस्थितेः सत्वेन कार्यताविषयकबोधस्यैवोत्पादान्नतादृशनियमे व्यभिचार इति भावः। तदभावाच्चेति। तं पश्येत्यादि कार्यताबोधकपदाध्याहारासंभवाच्चेत्यर्थः। भट्टमतं प्रक्षिपन्स्वमतमुपसंहरति। इत्थं चेति। लाघवादिति। अन्वितघटशक्तिकल्पनापेक्षया घटमात्रे तत्कल्पने लाघवादित्यर्थः। यवपदस्येत्यस्य देहलीदीपकन्यायेनान्वयः। [illegible] तत्र हि तादृशव्यवहारेण कंगोदीर्घशूककेरा यवपदस्य शक्तिरिति संदेहे सति हि। यवपदस्येति। वाक्यशेषाद्दीर्घशूकके शक्तिनिर्णय इत्यन्वयः। ननु कथं यवपदस्य वाक्यशेषाद्दीर्घशूकके शक्तिः। कंगावपि शक्तिसत्वे बाधकाभावादत आह। नानाशक्तीति। कथं तर्हि हर्यादिपदे नानाशक्तिकल्पनेत्यत आह। हर्यादिपद इति। विनिगमकाभावादिति। तत्र लोकशास्त्रोभयत्र तुल्यत्वात् सत्वेऽपि च वाक्यशेषस्येव विनिगमकत्वादिति भावः। आख्यातस्य यत्नार्थकत्वमिति। ननु विवरणस्य कथं शक्तिग्राहकत्वं तदाचकपदाभावादिति वाच्यं। आख्यातं यत्नत्वविशिष्टशक्तौ यत्नत्वविशिष्टशक्तिं करोति प्रतिपादितार्थप्रतिपादकत्वादित्यनुमानविधया तस्य शक्तिग्राहकत्वात् प्रसिद्धपदस्येति। प्रसिद्धार्थकपदस्येत्यर्थः। ति उ॰ र्थ धर्मिणि नामार्थान्वय [illegible] स्याव्युत्पन्नतया नेदं शक्तिग्रहस्यो

= पलत्व विशि = ष्टेना कृयत = करोतीत्याकृ = रके विवरण = तादृशाकरोति नाप्रतिपादितः कोर्थः यत्नत्वाव = ति उ॰ र्थस्य धर्मित स्मिन्निति = १

= [illegible] र्थप्रतिपादकत्वादिति = २

विवरणस्य र

उ॰ र्थ धर्मिणि नामार्थान्वे = यस्य कोकिले = रूप नामार्था = न्वयस्य अव्यु = त्पन्नत्वादिति =

पद १ पदवाच्ये

द्विविध

143

=पाकानुकूलकृतिविशिष्टे तिङर्थे धर्मिणि हि न निर्दिष्टत्व दृष्टान्तस्या=
=भेदसंबंधेनान्वयदर्शनेन तथान्वयदर्शने नेति=

दाहरणमितितुन। येयः अस्यपचतीत्युत्तोन्नतं सोनिर्दिष्टस्यादेतिङर्थ धर्मिणि तथान्वयदर्शनेनेतादृशानियमस्याप्र
सिद्धेः। प्रसंगात्परमतनिराकरणपूर्वकं स्वमते जात्यादिविशिष्टे शक्तिं व्यवस्थापयितुं मीमांसकमतमाह। जातावेवेति
जातिविशिष्टे शक्तिस्वीकारे। ज्ञातावपि शक्तिग्रहस्यावश्यकतानागृहीताविशेषणान्यायात्। तथाच जातावेव शक्ति
लाघवात्। तदुक्तं विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे इति भावः। यस्यां कस्यांचिद्व्यक्तौ शक्तिः सर्वासु वेति वि
कल्प्याद्ये दोषमाह। व्यभिचारादिति। अगृहीतशक्तिकव्यक्तावपि शाब्दबोधोदयेन तत्र शक्तिज्ञानाभावाद्व्य
भिचार इति भावः। द्वितीयं तमाह। आनन्त्यादिति। व्यक्तिभेदेन शक्तिभेदापत्त्या गौरवं स्यादित्यर्थः। असंभवादिति।
जातिभासकसामग्र्या एव व्यक्तिभासकत्वादिति भावः। इदमेव कथमिति चेत् शक्तिविशेष्यकजातिप्रकारकशाब्दबो
धे जातिविषयकशक्तिज्ञानत्वेन हेतुत्वात्। न च तादृशबोधे व्यक्तिशक्तिज्ञानत्वेन हेतुत्वमुपगम्य व्यक्तावेव शक्तिः
क्लृप्ताङ्गीक्रियत इति वाच्यं। तथा सति उक्तानन्त्यादिदोषप्रसंगादिति। शक्तिं विनेति। पदजन्यपदार्थोपस्थितेः शाब्द
बोधं प्रति हेतुतया व्यक्तिशक्तिं विना तज्ज्ञाननिर्वाहादिति भावः। लक्षणेति। तावतैव वृत्त्या पदजन्यपदार्थोपस्थितेर्नि
र्वाहादिति भावः। अनुपपत्तिप्रतिसंधानं विनापीति। गामानयेत्यादौ गोत्वजातेरानयनान्वयानुपपत्त्या गोपदस्य
गवि लक्षणास्वीकारेऽपि गौरस्तीत्यादौ गोत्वजातेरस्तित्वाद्यन्वयानुपपत्तेर्लक्षणाबीजस्याभावेन लक्षणायाः स्वी
कर्तुमशक्यत्वादिति भावः। स्वमते पूर्वोक्तदोषमाशंक्य वारयति। नन्वेत्यादिना। एकस्या इति। ईश्वरेच्छारूपाया
स्तस्या एकत्वादित्यर्थः। न चाननुगम इति। गोव्यक्तीनामननुगततया विषयतासंबंधेन शक्तिज्ञानकारणतायाम
वच्छेदकत्वासंभव इत्यर्थः। गोत्वादेरेवेति। तथाच गोशाब्दबोधे गोत्वविशिष्टविषयकशक्तिज्ञानत्वेन हेतुत्वान्नो

=विषयतासंबंधेन शाब्दबुद्धिं प्रति विषयतासंबंधेन व्यक्तिविषयशक्तिज्ञानं कारणं तथा च गोविषयकशाब्दबोधे गोविषयशक्ति=
=ज्ञानकारणतायां अवच्छेदकत्वासंभवः कारणतावच्छेदकत्वासंभवः कारणतावच्छेदकीभूतगोव्यक्तीनामननुगतत्वादिति ता=

मु. १९ ७३
=जातिधारा= =क्ति= २४
=व्यक्ति विषय= =शक्तिज्ञान= =हेतुत्वेन= ८

=व्यक्तौ ५
व्यक्ति विशेष्यकजातिप्रकारकशाब्दबो=धे= ८
७३

गोत्वप्रकारकशाब्दबोधे इति धरणीयं =२=

=गोत्वं गोपदशक्यं न अथवा गोपदं गोत्वेशक्तं न इत्याकारकं यद्विपरीतज्ञा=
=नं तस्य अविरोधिन इति =१३

कदोष इति भावः। ननु सर्वत्र पदजन्यपदार्थोपस्थितेर्हेतुत्वे मानाभावः। कथमन्यथा शाब्दबोधे संसर्गभानं। न चैवं प
दाननुपस्थितघटादेरपि भानापत्तिरिति वाच्यं। गोविशेष्यकगोत्वप्रकारकशाब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेन हेतुत्व
स्यो त्वादेतादृशातिप्रसंगविरहादित्यत आह। किंचेति। तदाव्यक्तौ शक्तिरिति। गोत्वेशक्यत्वेति विशिष्यज्ञान
प्रमात्मकमेव तन्मते अन्यथाख्यात्यभावात् प्रमायाश्च वस्तुसाधकत्वादिति भावः। समानप्रकारकत्वेनेति। ईदृश
शक्तिज्ञानस्य गोत्वप्रकारकत्वाभावेन गामानयेत्यादौ गोत्वप्रकारकस्मरणशाब्दबोधयो रनुपपत्तिरित्यर्थः।
न च गोपदं गोत्वे शक्तमित्येतादृशशक्तिग्रहस्यैव शाब्दबोधहेतुत्वात्तस्य शक्यत्वेन गोत्वप्रकारकत्वात्तत्प्रकारक
शाब्दबोधानुपपत्तिरिति वाच्यं। शक्तिग्रहे यदंशे गोत्वाप्रकारकत्वं शाब्दबोधस्यापि तदंशे गोत्वादिप्रकारकत्वमित्ये
तादृशासमानप्रकारकस्य परमतेऽसिद्धत्वात्। अत एव अपूर्ववादे अपूर्वस्यापूर्वमनुपस्थितत्वात् कथं तत्र शक्तिग्रह
इत्याशंक्य कार्यत्वेन घटादिषु शक्तिग्राहकयोग्यतया शाब्दबोधे अपूर्वभानमित्युक्तं तैरिति। ननु कार्यत्वाद्युपाधि
प्रकारकशाब्दबोधस्थले तादृशासमानप्रकारकत्वस्य तदनुमतत्वेऽपि जातिप्रकारकशाब्दबोधस्थले तादृशसमान
प्रकारकत्वेन तदनुमतमत आह। किंचेति। शक्यतावच्छेदकं वाच्यमिति। गोत्वधर्मिकशक्यत्वज्ञानस्य पदधर्मिक
गोत्वादिशक्तिज्ञानस्य वा शाब्दबोधे हेतुत्वे गोत्वत्वावच्छिन्नगोत्वविषयतायाः निवेशआवश्यकः निर्धर्मितावच्छेद
कशक्तिज्ञानस्य गोत्वांशे निष्प्रकारकशक्तिज्ञानस्य वा विपरीतज्ञानाविरोधिनः शाब्दबोधहेतुत्वात्। तथा च
गोत्वत्वे शक्यतावच्छेदकत्वावगाहितादृशप्रमायाः विषयसाधकत्वात्। गोत्वत्वे शक्यतावच्छेदकत्वसिद्धिरिति
भावः। तथैव गौरवमिति। न च गोत्वत्वावच्छिन्नविषयकशक्तिज्ञानस्य कारणत्वेऽपि सा भ्रमो न तु तस्य विषयसाध

=शक्यतावच्छेदकत्वरूपविषय= =गोत्वं शक्यमित्याकारस्य=५
=साधकत्वादि[illegible]ति =२

=न्वयः तत्पदार्थं इ विषयता रूपस्य गोपदार्थ विशेषणे गोत्वे =
=अन्वयइति समन्वयात् एवं च तादृशबोधविषयत्वे न शक्ति = व
=विषयत्वं गोत्वे न ते इत्यर्थः । गोत्वे विशेषणत्वं अंशेऽपि २ को १ अत्रैव =

=शक्यतावच्छेदकत्वं = ४

पा १

मु॰ टि॰ ७४

कत्वमिति वाच्यं । तथासति प्रतीतेः कारणतावच्छेदकतांशेऽपि भ्रमत्वस्यैव तत्त्वेन शक्यतया कारणतावच्छेदकत्वादीनां कुत्रापि सिद्धिर्न स्यात् । अस्तु वा गोत्वत्वादीनामवच्छेदकत्वं तथापि गवेतरासमवेतत्वादिघटितगोत्वत्वादेर्धर्मितावच्छेदकताया सत्त्वविषयतायाः शाब्दबोधकारणतावच्छेदकत्वे दृष्टत्वेनाप्युक्तं गौरवं दुर्वारमेवेति । स्वमतमुपसंहरति तस्मादिति । यत्ताविषेपि जात्याकृतिविशिष्टव्यक्तावेव । अवयवसंस्थानरूपायाः आकृतेः शक्यत्वेऽपि न तदवच्छेदकत्वं सामानाधिकरण्यसंबन्धस्य शक्यतावच्छेदकत्वे वच्छेदकत्वस्य कल्पने गौरवात् । अत एव परस्परपरित्यागेन परस्परबोधाभावाच्चैव शक्तिरेतद्बोधनायैव सूत्रे जात्याकृतिव्यक्तयः पदार्थ इत्येकवचनमिति संप्रदायः । नव्यास्तु । संस्थानानुपस्थितावपि गोत्वादिना गवादिरन्वयबोधाज्जातिविशिष्टव्यक्तावेव शक्तिः संस्थाने च पृथगेव शक्तिः । युक्तं चैतत् । जातिसंस्थानव्यक्त्योरेकपदार्थयोरेव परस्परमन्वयबोधः । सौत्रं पदार्थ इत्येकवचनं जातिव्यक्त्योरेकशक्तिज्ञापनायेवेत्याहुः । तच्छब्दस्यैव बुद्धिविषयतावच्छेदकत्वे भूतलघटत्वाद्यवच्छिन्ने शक्तिः । अथ घटत्वादीनां शक्यतावच्छेदकत्वे शक्यतावच्छेदकभेदाच्छक्तिभेदापत्तिः । न च शक्यतावच्छेदकत्वेऽपि शक्यतावच्छेदकतावच्छेदकस्य बुद्धिविषयतावच्छेदकत्वस्यैक्यान्न शक्तिभेद इति वाच्यं । तस्य शक्यतावच्छेदकतावच्छेदकत्वे शाब्दबोधे तद्भानापत्तेरिति चेन्न । बुद्धिविषयतावच्छेदकत्वस्योपलक्षणतया शक्यतावच्छेदकतावच्छेदकत्वात् उपलक्षणस्य शाब्दबोधे भानानङ्गीकारात् । घटत्वादेश्च शक्यतावच्छेदकत्वं न विशेषणत्वेनैव । अतस्तस्य शाब्दबोधे भानं । विशेषणत्वं च तत्सदृशजन्यबोधविषयत्वेन शक्तिविषयत्वं । उपलक्षणं च । तत्सदृशजन्यबोधविषयत्वेन शक्यविषयत्वमिति । एवमिदंपदस्य द्विपदार्थ ? ताप्यादमेतदोः प्रत्यक्षबुद्धिविषये । अदसः परोक्षबुद्धिविषये शक्तिः । अत एव ते पादि न्तार्थकत्वं ।

विशेष ४

उपस्थिति = का उदाहृति पूरतु — टीपं - ७

बुद्धिविषयतावच्छेदकत्वस्य = ५

७४

टी॰ ५

=गोरूपैकपदार्थयोरपि =एवं लवं - ८

शे॰ २

शे॰ २

२ = अयं गोपदार्थः गोपदजन्यबोधविषयतानान्तर्भवतीति सं॰ भगवदिच्छा तथा च गोत्वे विशेषणत्वं नाम गोपदजन्यबोधविषयता = २
२ = विशेष्यीकृत गोपदार्थे यथावर्तते तथा विशेषणे गोत्वेऽपीति कृतः यत्पदार्थस्य विषयतारूपपदार्थस्य गोपदार्थे विशेष्ये अ = २

= पद्मं पंकजनिकर्तृ इत्याकारकपद्मधर्मिकयोगार्थबुद्धेः = ८ = विरोध्यविषयकत्वानस्य ग्राह्याभावानवगाहि ज्ञानस्य =
= व्यक्तिवाचकज्ञानस्येति यावत्। एवं च प्रकृते पंकजपदं पद्मत्वा =
= वच्छिन्ने रूढमित्याकारकं यत् रूढिज्ञानं

ग८ व्यक्तया ४ त्या ३

एवं सतोपि। इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदो रूपं। अदसस्तु विप्रकृष्टं। तदिति परोक्षे विजानीयादित्यपि वदंति [illegible] पदस्य [illegible] सर्वविशिष्टे शक्तिः। सर्वपदस्य व्यापकत्वेन सर्वे घटाः रूपवंत इत्यादौ घटत्वव्यापकरूपवत्त्व मित्यपि बोधः। तत्पदस्य तत्कालीनसंबोध्यं चैत्रादि [illegible] तावच्छेदकं। एवं महत्पदस्य तत्कालीनस्य तं चो[illegible]रयित्व चैत्र दिग्स्थानं [illegible] यथा महत्त्वं नास्तराजसादौ न मसदा रूढवे बोध इत्याहुः। विरत [illegible] शक्तं पदं विभजते। शक्तं पदमि ति। कश्चिदिति। [illegible] इत्यर्थः। एवमग्रेपि। मंडलादीत्यत्र केषुचित्पुस्तकेषु मंडपादीति पाठः। आमादिकः। प्रतिबंधकत्व दिति। नन्वरूढिज्ञानस्य योगार्थबुद्धौ प्रतिबंधकत्वे पंकजेपि योगार्थस्य पंकजनिकर्तृत्वस्य बोधो न स्यादिति वाच्यं। पद्मत्वावच्छिन्नविशेष्यतानिरूपितपंकजपदयोगजन्यपंकजनिकर्तृत्वावच्छिन्नविषयताशालि बोधं प्रति रूढिज्ञान स्य प्रतिबंधकत्वेन पद्मधर्मियोगार्थबुद्धेः प्रतिबध्यतावच्छेदकानाक्रांतत्वादिति। विरोध्यविषयकज्ञानस्य प्रतिबंधकत्वे नक्कज्ञानविघटकत्वेन वेति नियमभंगस्वरसंभवैः इत्यनेन स्वमतं मणिकारमतमाह। वस्तुतस्त्विति। सन्निधानादिति रूढ्यर्थस्य सन्निहितोपस्थितिकत्वादित्यर्थः। व्यक्तिवचनानां सन्निहितविशेषपरत्वनियमादिति भावः। व्यक्तिवचनानां किंचिद्व्यक्तितात्पर्यकाणां सन्निहितविशेषपरत्वमुपस्थितविशेषपरत्वमित्यर्थः। तथाच पद्मतात्पर्यसत्त्वेन रूढ्यर्थयो गार्थयोः परस्परान्वयबोधजनकसामग्र्यंतरसत्त्वेन रूढ्यर्थएव योगार्थान्वयो न कुमुदादाविति। न रूढिज्ञानस्य योगि गार्थबुद्धौ प्रतिबंधकत्वं। एवं च रूढ्यर्थयोगार्थयोः परस्परान्वयबोधसामग्री सत्त्वादेव न कुमुदादेः पंकजपदाद्बोधः। यत्र च परस्परमन्वयबोधसामग्रीविरहस्तत्र कुमुदादेर्बोधो भवत्येव। परंतु कुमुदत्वेन रूपेण कुमुदत्वविशिष्टपंक

तादृशरूढिज्ञानस्य =
= पद्मं पंकज =
= निकर्तृ =
= इत्याकारक =
योगार्थज्ञा =
ने प्रतिबंधक =
त्वं नास्ति कुतः
ग्राह्याभावान
वगाहित्वात्
अत्र ग्राह्य पं =
कजनिकर्तृ =
त्वं तदा भावा =
नवगाहि =
त्वात् अ
यमेव प्राची
नमते अस्व =
रसः इति ता =
त्पर्यं = ८

= योगार्थतात्पर्यकाणामिति यावत् = ४ = रूढ्यर्थपरत्वमितियावत् = ४ न ३ = व्यक्तयाविवेचनेनावयवशक्तिद्वारा व्यते। अर्थात् ये स्थानितथेत्यर्थस्तेन नहयोः दोन व्यभिचारः = ५
= सन्निहितोपस्थितिर्यस्य रूढ्यर्थस्य तत्त्वं तस्य भावस्तस्मादित्यर्थः = ५

त ३ त्वा ४ त्वा ७ क १ म ६

नरपरसामग्रीविरहस्य उपलक्षकमिति ॥ तत्र बाधप्रतिसंधानं = ३
* पद्मत्वेन बोधः ५

मु॰ टि॰
७५

जनिकर्तृत्वेन वा लक्षणया शुद्धपंकजनिकर्तृत्वेन तु शक्त्यैवेत्या[illegible]हः। यत्र रूढ्यर्थे त्यादिना। प्रतिसंधीयत इत्यनंतरं कुमु
दत्वेन च बोधे तात्पर्यमिति स्मरणीयं। लक्षणयेति। पंकजनिकर्तृकुमुदत्वेन बोधो लक्षणयेत्यर्थः। रूढ्यर्थयोगार्थयोः
परस्परसामग्रीविरहोपलक्षकमेतत्। तेन रूढ्यर्थबाधप्रतिसंधानासत्त्वेपि यत्र सामग्र्यंतरविरहस्तत्रापि लक्षणया
कुमुदबोधो भवत्येव। अवयवशक्तिमात्रेणेति। मात्रपदेन लक्षणानादरः सूचितः। निर्वाहः। पंकजनिकर्तृत्वेन कुमु
दत्वाद्यबोधनिर्वाह इत्यर्थः। पद्मत्वेनैव बोधः। लक्षणयैवेति। रूढ्यर्थतावच्छेदकपद्मत्वजाते स्तत्राभावेन रूढ्यातद्बोधे
नासंभवादिति भावः। लक्षणा द्विविधा। जहत्स्वार्था। अजहत्स्वार्था चेति। तत्राद्यां प्रदर्शयति। गंगायामिति। वक्ष्य
माणास्वरसादाह। तात्पर्यानुपपत्तिर्वेति। साच। लक्षणा च। द्वितीयां प्रदर्शयति एवं काकेभ्य इति। दध्युपघातके।
शकविडालादिसाधारणदध्युपघातकत्वविशिष्टे एकसार्थवाहित्वे एकसार्थवाहित्वविशिष्टे। छत्रिपदलक्षणा
भिधानं च वाक्यलक्षणावादिमताभिप्रायेण। न्यायमते तु छत्रपद एव एकसार्थे लक्षणा प्रत्ययार्थेऽस्य संबंधी। तथा चै
कसार्थवंतो गच्छंतीत्यन्वयः। एकसार्थवाहित्वं चैकसार्थ एव न तु एकसार्थगंतृत्वं। नैराकांक्षेण यांतीत्यस्यानन्वया
पत्तेः। न चाजहत्स्वार्थेति विरुद्धमिति वाच्यं। वाक्यलक्षणावादिमते नैव तदभिधानादिति। क्वचित्। गंगापदस्य तीरे तात्प
र्ये जहत्स्वार्थे क्वचित् पदस्य मत्स्यादौ तात्पर्ये ग्रहस्त्वैतेनैव रूपेणेति। न च गंगायामित्यादौ गंगातीरत्वेन बोधे जहत्स्वा
र्थत्वानिरिति वाच्यं। तीरत्वेन लक्षणायामेव जहत्स्वार्थत्वस्य सर्वसंमतत्वात्। गंगातीरत्वेन भाने त्वजहत्स्वार्थैव लक्ष
णेति। एवं सर्वोक्तस्थले युधिष्ठिरपदे शक्यमंचाः क्रोशंतीत्यादौ वपि युधिष्ठिरत्वमंचत्वस्थ त्वादिना बोधे अजहत्स्वार्थैव लक्ष
णेति ध्येयं। अत एव [illegible]। तद्धर्मविशिष्टे लक्षणाग्रहस्य तेन रूपेण उपस्थिति शाब्दबोधं प्रति हेतुत्वादेव। एवं चेपस्तुत
= तीरत्वादिविशिष्टे तीरादौ = ९ = तीरत्वादिरूपेण = ९

७५

148

तीरत्वादेः९

पस्थाप्यस्यापि लक्ष्यतावच्छेदकस्य गंगात्वस्य बोधानेनुकूलं । अतिप्रसंगस्य तद्धर्मविशिष्टस्यादिनेव वारणादिति भावः । इदमु
पलक्षणे । गंगापदशक्यप्रवाहसंयोगस्य तीरत्वेन बाधादित्यपि द्रष्टव्यं । लक्षितलक्षणायाः आधिक्यमाशं
क्य लक्षितलक्षणायामंतर्भावमाह । यत्रेत्यादिति । परंपरासंबंधरूपेति । स्ववाच्यरेफद्वयघटितपदवाच्यत्वादिरू
पा । नन्वद्विरेफो यत्रेति श्रुतमत्यादि द्विरेफपदेन स्वशक्यरेफद्वयसंबंधि भ्रमरपदं लक्ष्यते । भ्रमरपदेन च शक्त्या
त५ भ्रमरोपस्थाप्य इत्येतावतैव सामंजस्ये अलं द्विरेफपदस्य भ्रमरे परंपरासंबंधरूपलक्षणया । एवं च लक्षि
तेन लक्षणं ज्ञापनमिति लक्षितलक्षणा शब्दार्थोप्यस्तीति वाच्यं । तथासति द्विरेफमानयेत्यादितः कर्मत्वादेर्भ्र
मरपदार्थान्वयानुपपत्तेः । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वादिति । ननु तच्छाब्दबोधे तच्छक्तपदज्ञानत्वेन हे
तुत्वाल्लाक्षणिकार्थे शाब्दबोधः कथं स्यादित्यत आह । किंत्विति । पदांतरैः समभिव्याहृतं शक्तं पदं । शक्तिलक्षणेत्यन्य
न्यतरसंबंधेन यः इतरपदार्थैस्तदन्वितो यः स्वार्थ इत्यर्थः । कुमतिः पशुरित्यादि सर्वं लाक्षणिकस्थले शाब्दबो
य५ धेस्याऽनुभवसिद्धतया लाक्षणिकस्यानुभावकत्वेमिति तु न्याः । ननु शक्यसंबंधो न लक्षणा । तथासति वाक्य
=शक्यार्थो स्य शक्याभावात्तत्र लक्षणा न स्यादिति मीमांसकाक्षेपं द्वेषपत्या निराकुरुते । वाक्येष्विति । ननु गंभीरायां न घोष
=प्रसिद्धा=४ इत्यादौ नदीपदस्य नदीतीरे लक्षणास्ती तीरे गंभीरपदार्थस्यैकदेशान्वयापत्तेः पदलक्षणाया असंभवेन वाक्य
लक्षणावश्यकीत्यत आह । यत्र गंभीरेति । क्वचिदिति । चैत्रस्य गुरुकुलमित्यादावित्यर्थः । स्वीकृतत्वादिति । पद
भेदेन व्युत्पत्तिभेदास्वीकृते तथा व्युत्पत्तिकल्पनादित्यर्थः । नदीपदस्येति । न च विनिगमनाविरहेण गंभीरपदस्य लक्ष

स्वाश्रयजन्यबोधविषयः=५

=स्वपदजन्यबोधविषयः अर्थस्तत्संबंधस्यैव=३
स्ये =गंगापदजन्यप्रवाहत्वावच्छिन्नविषयकबोधनिष्ठजन्यतानिरूपि=

णा। नदीपदं तात्पर्यग्राहकमिसस्यापि चकुं शक्यत्वात्कथं नदीपदमत्रैव लक्षणाभिधानमितिवाच्यं। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरुत्तरपदस्यैव लक्षणाया युक्तत्वात्। अत्र मीमांसकमतानुयायिनः। वाक्यलक्षणयैवोपपत्तौ गंभीरपदस्य तात्पर्यग्राहकत्वकल्पनमयुक्तं। न च वाक्यस्य शक्त्यभावाच्छक्यसंबंधरूपा लक्षणापि न संभवतीति वाच्यं। स्वबोध्यसंबंधस्यैव लक्षणापदार्थत्वात्। गंगायां घोष इत्यादौ गंगापदबोध्यस्य प्रवाहस्य संबंधस्तीरे इति लक्षणा। गभीरायां नद्यामिति वाक्यस्य स्वबोध्यो गभीराभिन्ना नदी तत्संबंधस्तीरे इति वाक्ये लक्षणा। एवं समासात्मके चित्रगुरिति वाक्येऽपि चित्रगुपदस्यावयवशक्त्या चित्राभिन्ना गौः स्वबोध्या॥ स्वजन्यबोधविषयस्यैव स्वबोध्यत्वात्। तत्संबंधस्य स्वामिनि सत्त्वादित्याहुः। तन्न। स्वबोध्यत्वं हि न स्वजन्यबोधविषयत्वं। गंगायां घोष इत्यादौ गंगायामित्यस्यापि लाक्षणिकत्वापत्तेः। अतस्तत्त्वेन बोधकत्वं वाच्यं। न च तावतापि निर्वाहः। अपभ्रंशस्यापि लाक्षणिकत्वापत्तेः। अतस्तत्त्वावच्छिन्नकैतास्यैवनिवेश्यः। तथा च तत्त्वावच्छिन्नबोधकत्वं। वरं कतरस्तु। स्वबोध्यत्वं यदि स्वजन्यशाब्दबोधविषयत्वं तदा गंगायां घोष इत्यादौ गंगापदलक्षणानुपपत्तिः। गंगापदेन तत्र प्रवाहशाब्दबोधाजननेन प्रवाहस्य गंगापदबोध्यत्वाभावात्। किंतु शक्ततया स्वजन्यज्ञानविषयत्वं तद्वाच्यं। न च शक्तेयं साधिका। समवायेन घटपदस्मारितगगनस्यापि स्वबोध्यत्वापत्त्या तत्संबंधज्ञानात् घटपदेन पटादेः शाब्दबोधप्रसंगात्। एवं च शक्यसंबंधापेक्षया शक्ततयास्वबोध्यसंबंधस्य गुरुत्वान्न तस्य लक्षणात्वमिति॥ किंच गभीरायां नद्यामिति सप्तम्यंतस्य गभीरनदीतीरलक्षकत्वे घोषे तादृशतीराधेयत्वबोधानुपपत्तिः। आधेयत्वैकपदाभावान्नामार्थयोर्भेदसंबंधेनान्वयस्याव्युत्पन्नतया आधेयतासंबंधेन तीरस्य घोषादावन्वयासंभवात्। गभीरायां नदीति सप्तमीभिन्नस्य तीरलक्षकत्वे सप्तम्यर्थाधेयत्वादौ तादृशतीरादेरन्वयापत्तिः। प्रत्ययानां प्र

ताबोध२

=गगनसंबंध=
शक्यवच्छिन्नबोधे =शक्तत=५

तजनकत्वमि
तिशक्तत्वेन बोध
कत्वमित्यस्य
निष्कृष्टार्थः ७
एवमग्रेपि
=लक्षणेति पू
=रणीयं=५

के७=सप्त=
=म्यंतस्यापि
लाक्षणिकत्वा
पत्तेः कथं स्वज
न्यः शक्यं तग
गापदजन्यः प्र
वाहत्वनिर्वाहि
ताकारकः बो
धः तद्विषय=
ःसुगवाहे पि
९६ वर्तते
पिर
तादृशप्रवाह=
संबंधस्य तीरे
सत्वादिति=७

=तादृशनदीतीरवृत्तिर्यस्य घोषस्य सः तादृशतीरवृत्तित्वसंसर्गेणेति=३

स्य२

ऌसर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः। गभीरायां नदीति भागस्य सप्तमी श्रुतिस्वाभावात्। नच गभीरायां नद्यामि-
ति सप्तम्यन्तं गभीरनदीतीरवृत्तित्वे लक्षणास्विति शंक्यं। तादृशस्थले घोषादावन्वयानुपपत्तेः। नामार्थयोर्भेद-
संबंधेनान्वयस्याव्युत्पन्नत्वात्। सप्तम्यन्तभागस्य तादृशतीरवृत्तौ लक्षणामुपगम्य तस्याभेदेन घोषादावन्वयः स्यादपि
न। अभेदेनान्वयबोधे समानविभक्तिकत्वस्य तंत्रत्वादित्यास्तां विस्तरः। एवं अवयवलक्षणैव न तु वाक्ये लक्ष-
णेत्यर्थः। गोपदस्येति। प्रत्ययार्थान्वयानुरोधेनोत्तरपदलक्षणायाः युक्तत्वात् इति भावः। गोमतीति। गोस्वामिनीति। न
स्त्रीक्रियत इति। गोधर्मिकान्वयबोधे गोधर्मिकत्वनिश्चयस्य हेतुतायाः आवश्यकत्वात्। अन्यथा चित्रगुर्गोस्त्रीसाद-
वपि अपदार्थस्य गोस्वामिरूपस्यैकदेशे गवि चित्रान्वयप्रसंगादिति। यद्यपि घटभिन्न्यमित्यादौ एकदेशान्वयो दृश्य-
ते। तथापि तादृशस्थले न तथान्वयो न स्त्रीक्रियत इति हृदयं। निपातातिरिक्तेति। निपातपदमव्ययस्याप्युपलक्षकं। ते-
न चंद्र इव इत्यादौ इवार्थसादृश्ये चंद्रस्य प्रतियोगितयान्वयोपपत्तिः। अन्यथा अव्ययनिपातातिरिक्तनामार्थ-
योरपि नान्वयबोधस्वीकारे तथान्वयबोध इति। भेदेनान्वयबोधः स्यादित्यर्थः। साक्षादेव। प्रत्ययार्थमद्वारीकृत्यै-
व। भूतले घट इत्यादावाधेयतासंसर्गेणापि घटभूतलयोरन्वयात् साक्षादिदमव्युत्पन्नमिति शङ्कादिति भावः। ने-
त्यः। न यथा न्योन्याभावस्य स्मरणं कस्यामिति। तथा चात्रापि प्रत्ययार्थद्वारैव राजपुरुषयोरन्वयान्नोक्तव्युत्पत्तिविरोध
इति भावः। परे तु। राजपुरुष इत्यादेः तत्पुरुषेण लक्षणा। व्युत्पत्तिवैचित्र्येण स्वत्वादिसंसर्गेणैव राज्ञः पुरुषादावन्व-
यः स्वीक्रियते। अन्यथा दृष्टोऽस्ति राजमातंगा ...स्येवामी तुरंगमा इत्यत्र छत्रेण राज्ञः परामर्शो न स्यात्। तस्यैकदेश-
स्वत्वसंसर्गकपुरुषविशेष्यकबुद्धित्वावच्छिन्नं प्रति ... राजपुरुषपदसाकारकभानपूर्वी विशि-
=राजपदार्थस्य=१

१=राजपुरुष ...
=पदार्थस्य ...
=स्वीकारे ...
२=राजप्रकारक

स्य२ ता

भेदे५

२ ... =२

साहि संव्यासज्यवृत्तिचैत्रेवर्त्ततेमैत्रेपि। गमनकर्तृत्वं अव्यासज्यवृत्ति प्रत्येकं भिन्नं वर्त्तत इति [illegible] यत्र अन्वयासंभवं इति बो धयितुं रपदस्य

सादिसाकुः द्वंद्वेतु। इतरेतरद्वंद्वेतु। धवखदिरावित्यत्र धवत्वं खदिरत्वं च प्रत्येकं नोद्देश्यतावच्छेदकं। सुपामुद्देश्यतावच्छेदकत्व्या प्यसंख्याबोधकत्वस्याकाशावित्यादिवाक्ये प्रामाण्यापत्तेः। क्रियाकृतत्वेन धवद्वयस्य खदिरद्वयस्य बोधापत्तेः। परंतु खदिरं धवखदि रसहिताश्रये लक्षणानुपगम्यते। एवं चोद्देश्यतावच्छेदकं साहित्यव्याप्यत्वं न धवद्वयस्य खदिरद्वयस्य सत्त्वा स्य। अपितु धवखदिरउभयस्थं तिष्ठति तस्येति न धवद्वयादेर्बोध इति मीमांसकमतं शंकते। ननु साहित्येति। साहित्याश्र यइत्यर्थः। सहवृत्तित्वरूपं साहित्यं लक्ष्यमुत क्रियान्वयित्वमिति विकल्प्याद्यं दूषयति। साहित्यस्यान्ययोरपीति। द्वि तीयं शंकते। नचेकेति। अनुभवाद्यभावात्। वस्तुतस्त्वेकक्रियान्वयित्वस्य धवखदिरयोः सत्त्वे प्येकक्रियान्वयित्वस्य शाब्द बोधाभावादित्यर्थः। इदमुपलक्षणं। चैत्रमैत्रौ गच्छत इ [illegible] यादौ चैत्रादिपदस्य यदि साहित्यविशिष्टे लक्षणा तदा साहित्यस्य व्यासज्यवृत्तितया तदवच्छेदेनाव्यासज्यवृत्तेर्गमनकर्तृत्वस्यान्वयासंभवइत्यपि बोध्यं। ननु यदि द्वंद्वेन लक्षणा तदा कर्मधारयद्वंद्वस्य को विशेष इत्यत आह। किंत्विति। चार्थे द्वंद्व इत्यनुशासनात्। तत्र चार्थश्चत्वारः। समुच्चयान्वा चयेतरेतरसमाहारभेदात्। तत्र समुच्चयान्वाचययोः सामर्थ्याभावान्न समासः। इतरेतरयोगसमाहारे सामर्थ्ये समासः। तत्र चार्थस्य भेदव्याप्यत्वाद्वंद्व इत्याशयः। इत्यादावित्यादिपदेन प्रमाणप्रमेयेत्यादिसूत्रपरिग्रहः। कथमिति। यत्र समासघटकयोर्यत्र भेदस्तत्रैव द्वंद्वः। तदा नीलघटयोर्भेदाभावात्कथं द्वंद्वः। एवं प्रमाणप्रमेयेत्यादिसूत्रे आत्मशरीरे न्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति सूत्रोपात्तद्वादशविधप्रमेयांतर्गतमनोबुद्ध्यादि याणां प्रमाणत्वेन प्रमाणप्रमेययोर्भेदाभावात्कथं द्वंद्व इत्यर्थः। लक्षणेति। तथा च तयोर्भेदसत्त्वाद्द्वंद्व इति भावः। नन्वस्तु द्वंद्वः स सर्गतो नीलघटत्वयोरभेदाभावादत आह। अभेदइत्यस्य चेति। केचित्तु। पदार्थत्वं पदजन्यप्रतीतिविषयत्वं। तथा च पदा र्थभेदाक्वचित्पदार्थतावच्छेदकभेदात्द्वंद्वः। प्रकृते च नीलत्वघटत्वयोः पदार्थतावच्छेदकयोर्भेदाद्द्वंद्वः। अस्तु वा पदार्थ

मु॰ १८॰ ७१

८८

८९

पदार्थ ५

९०

९१

योः १

७१

=क्रियाजन्यफलशालित्वं कर्मत्वं भेरीमृदंगं वादयेदित्यत्र भेरीमृदंगसमाहारे क्रियाजन्यफलं अभिघाताख्य
=संयोगस्तच्छालित्वरूपकर्मत्वासंभवादित्यर्थः =८

=सकृदुच्चरितः शब्दः सकृदर्थं प्रतीययतीति नासकृत् =२

=अर्थ इति पदं अर्थपदं तस्य अर्थः ...
= ... तु सा पदजन्य पदार्थोप ...
=परूपः तस्य एकदेशो व ...

रव १ तावच्छेदकभेदे द्वंद्वः। न चैवं घटौ इत्यादौ द्वंद्वः स्यात् प्रसक्तत्वेन तदपवादकः सरूपैकशेषो न स्यादिति वाच्यं। इष्टापत्तेः। तत्र घट
पदोपस्थापितेषु बहुषु तात्पर्याद्वैव बहुघटबोधसंभवात् सकृदुच्चरित इत्यादिव्युत्पत्तौ मानाभावात्। सरूपैकशेषविधेस्तत्रि
यादावेव सार्थकत्वात्। अस्तु वा सकृदिति व्युत्पत्तिः परंतु सकृदित्यर्थपदार्थैकदेशे तत्र विशेषणं। वस्तुतो बोधविशे
षणमेवत... तिन दोष इत्याहुः। समाहार इति। अहिनकुलमित्यादावहिनकुलयोः समाहार इति प्रतीतेरनुभवसिद्ध
इत्यर्थः। वस्तुतस्तत्राहिनकुलमात्रप्रतीतेर्नोत्तरपदे समाहारलक्षणा न वा शक्तिरित्यभिप्रेत्योक्तं यदीति। सर्वपदमिति।
प्रत्ययानामिति युसत्त्वे विनिगमकत्वादिति भावः। कथमिति। कथं समाहारबोध इत्यर्थः। तत्र हेतुमाह। समाहारेति। वा
दनासंभवादिति। अभिघाताख्यसंयोगावच्छिन्नक्रियाया एव वादनपदार्थतया धात्वर्थतावच्छेदकीभूततादृशाभिघा
ताख्यसंयोगस्य समाहारे असंभवेन वादनकर्मत्वासंभवादित्यर्थः। परंपरासंबंधेन। स्वाश्रयरत्तित्वरूपेण तदन्वयात्। वा
दनकर्मत्वान्वयात्। एवमिति। उत्तरपदे समाहारलक्षणेत्यर्थः। नव्यमतमाह। परे त्विति। बुध्यत इत्यस्य न तु समाहारो
पीति शेषः। ननु यदि समाहारो न बुध्यते तदा एकत्वस्य कुत्रान्वयः। समाह्रियमाणयोरेकत्वाभावात् अत आह। प्रत्येकमेकत्व
मिति। तच्चैकवचनं साधुत्वार्थमित्यपि वदंति। ननु पाणिपादमित्यादिसमुदायस्य समाहारबोधकत्वाभावे कथं तस्य समाहार
संज्ञेत्यत आह। समाहारसंज्ञा चेति। तत्रैवेति। तथा च पारिभाषिकेयं संज्ञा न त्वर्थे तेन अन्यत्रापि प्रसंगादिति भावः। ननु ताद
शसंज्ञायाः किं प्रयोजनमत आह। अन्यत्रेति। समाहारातिरिक्ते द्वंद्व इत्यर्थः। तथा च नित्यैकवचनक्लीबलिंगत्वादिपदसंख्या
र्थत्वान्नत्वस्याः वैयर्थ्यमिति भावः। पितरौ श्वशुरावित्यादाविति। चैत्रस्य पितरावित्यादिविरूपैकशेषस्थले इत्यर्थः। ल

समाहारसंज्ञायाः =१

संज्ञा ३
=समाहारद्वंद्व इति ... द्वंद्वे इतरेतरद्वंद्व इत्यर्थः =२

... ति वि ...
सकृदिति वि
=शेषणं =३

=अर्थसकृ
त्प्रतीयत इ
कारकं बो
विशेषणमे =४

अत्र स्व त्रो
... नेन समाहा
रः =८

= श्रोत्रपीच ब्राह्मणस्य श्रमलपो निवाचयशिवश्च शिवो = ३

मु.टि. ७८

त्रणेति। एकस्यचैवात्रादेः पित्रद्वयासंभवेन तत्र विरूपैकशेषं विनागत्यभावादिति भावः। विरूपैकशेषस्येपि तत्र लुप्तमा
त्रादिस्मरणेनैव शाब्दबोधान्न लक्षणेत्यन्ये। एवमन्यत्रापीति पुमान् स्त्रियेत्यनेन न यत्रैकशेषस्तत्रेदं पतीप्रजाजकरणे
श्रीलणावानयेत्यादौ शिवो नमस्कुर्यादित्यादौ भ्रातरौ पुत्राविति सत्रापि शमाणांतरेण स्त्रीपरलक्षणेन भ्रातृपुत्रौ स्वसृ
दुहितृभ्यामिति विरूपैकशेषात्। भ्रातृपदे भ्रातृस्वस्रोः पुत्रपदे च पुत्रदुहित्रोर्लक्षणेत्यर्थः। न लक्षणेति। बहुलाद्व
ययोग्यानेकोपस्थितेः शक्तितश्च संभवादिति भावः। ननु स्वरूपेति। स्त्रीशूद्र यत इति शेषः। वेदानधिकारादिति। स्त्रीशूद्रौ
नाधीयतामित्यनेन निषेधादिति भावः। याजनासंभवश्चेति। अध्ययनविधिसिद्धज्ञानासंभवादिति भावः। तत एवेति। श्रु
तिबोधितयाऽनानुपपत्त्यैवेत्यर्थः। ननु निषादस्य विद्याकल्पने गौरवमत आह। लाघवेनेति। ननु स्त्रीशूद्रौ नाधीयतामि
ति श्रुतेः प्रमाणापत्तिभिया लाघवमाहं चिंत्कर। तत्र शूद्रपदस्य निषादेतरशूद्रपरत्वे निषादस्य वेदांतराध्ययनप्रसंगः।
अध्ययनपरस्य यागोपयुक्ताध्ययनेतराध्ययनपरत्वे च शूद्रांतरस्यापि यागोपयुक्ताध्ययनप्रसंग इति चेन्न। विशेषत
आप्ताध्ययनेतराध्ययनपरत्वाद् अध्ययनपदस्य तेन निषादस्य यागोपयुक्ताध्ययनेतराध्ययने निषेधः। शूद्रांतरस्य
७५ त्वध्ययनमात्रनिषेधः सिध्यतीति दोषत्वादिति। ननु लक्षणाकल्पनेपि न दोषः। शक्यसंबंधरूपलक्षणायाः क्लृप्तत्वात्।
न च शाब्दबोधं प्रति लक्षणाज्ञानस्य हेतुत्वे [illegible] कल्पनमधिकमिति वाच्यं। निषादानां स्थपतीरिति यु
त्सर्पानिषादसंबंधघटितस्वरूपस्यानुभवस्य लौकिकवाक्ये क्लृप्तत्वान्मदनुरोधेन लक्षणाज्ञानहेतुत्वस्य सर्वसिद्धत्वे ७८
न वेदे अधिकस्याकल्पनादिति चेन्न। शक्यसंबंधरूपलक्षणायाः ज्ञानस्य शक्तिज्ञानं विनासंभवेन शक्तिज्ञाने
स्य तत्रोभयसिद्धतया भवन्मते वैदिकवाक्यजन्यशाब्दबोधात्पूर्वं लक्षणाज्ञानव्यक्तिकल्पनागौरवस्य वज्रले

पत्यादिति॥उपकुंभमर्द्धपिप्पलीस्यादावित्ति॥अत्रकुंभस्य समीपमित्यस्वपदविग्रहः।अव्ययीभावस्यनित्यसमास
त्वात्‌।पूर्वपदार्थप्रधानतयेति॥कुंभपदलक्षितस्यकुंभसंबंधिनउपपदार्थसमीपेऽभेदेनान्वयात्‌॥कुंभसंबंध्यभिन्न
समीपमित्युपपदार्थविशेष्यकोऽन्वयबोधस्त्यर्थः॥केचित्तु॥ उपपदार्थःसामीप्यंनतुसमीपंसमीपेउपपदलक्षणास्वी
कारेतुपदद्वयलक्षणापेक्षयोपकुंभपदस्यैवकुंभसमीपेलक्षणाउपपदंतात्पर्यग्राहकं।कुंभसमीपमितिवान्वयबोधस्स्यात्‌।
अत्रयद्यर्द्धपिप्पलीतितत्पुरुषेशक्तिनिराकरणंपुनरुक्तंपूर्वंतत्पुरुषेतन्निरासात्तथापिपूर्वमुत्तरपदार्थप्रधानराजपुरु
षादौतन्निराकरणंपूर्वपदलक्षणयाइदंचपूर्वपदप्रधानेऽर्द्धपिप्पल्यादितत्पुरुषेउत्तरपदलक्षणयातन्निराकरणमिति
पौनरुक्त्यदोषेनरुक्तमितिध्येयं॥वैय्याकरणमतंदूषयति॥इत्थंचेति॥पदत्वावच्छेदेति॥समासघटकी भूतपदशक्तिलक्षणाभ्या
मित्यर्थः।आसत्तिर्योग्यताकांक्षेतिक्रमोन्तास्त्ते।स्वरूपसत्याएवकारणत्वंलभ्यते।ननुयोग्यताज्ञानादिवदासत्तिज्ञानस्य
ज्ञानपदस्यसमासघटकत्वेनसमासाघटकासत्तिपदार्थेनानन्वयात्स्वरूपसत्याश्चासत्तेःकारणत्वंनसंभवति।गिरि
र्भुक्तमित्यादौगिरिपदाग्निमत्पदयोरव्यवधानक्रमेणशाब्दबोधोदयेनव्यभिचारादतोमूलस्थमासत्तिपदंआसत्तिज्ञानपरत
याव्याचष्टे॥आसत्तिज्ञानमिति॥आसत्तिर्योग्यतेतिविसर्गश्चान्यपाठस्तत्रसुगुरेव।ननुसन्निधानंतुपदस्यासत्तिरुच्य
तइतिमूलोक्तस्यासत्ति लक्षणस्यगिरिर्भुक्तमित्यत्रातिव्याप्तिः।तत्रापिगिरिपदभुक्तपदयोरव्यवधानसत्त्वाद
तोव्याचष्टे॥यत्पदार्थेति॥अपेक्षितः।तात्पर्यविषयः।तयोरिति।तयोःपदयोरित्यर्थः।तादृशपदयोरव्यवधानमासत्तिस्तत्
परिच्छित्तिःकारणमित्यर्थः।तथाचगिरिपदार्थभुक्तपदार्थयोरन्वयोनतात्पर्यविषयोपितुगिरिपदार्थाग्निमत्पदार्थयोरेवेतिव
योरव्यवधानाभावान्नातिव्याप्तिरितिभावः।तेन॥एतादृशायत्तत्पदगर्भासत्तिनिर्वचनेन।ननुनीलोघटोद्रव्यंपटस्स्यत्र
नीलपदार्थपटपदार्थयोर्यत्रान्वयोर्वक्तुरतात्पर्यविषयोननुनीलपदार्थघटपदार्थयोस्तत्रनीलपदार्थघटपदार्थयोरासत्तिर्नस्या
र्यो।

सामीप्यविक्ति = छ = १

शक्तिनिरासात्‌ = ५

नि = भ्रमप्र = मासाधार = णं आसत्ति = ज्ञानं तत्पर = तया = ७

155

तदर्थयोरन्वयस्यतात्पर्यविषयत्वाभावादत स्तत्रोपपत्तिमाह। नीलो घट इत्यादिना। तर्हि तत्र कथं नीलो घट इति शाब्दबोध
इत्यत आह। भ्रमाच्छाब्दबोध इति। तथा च भ्रमाच्छाब्दमात्रं। न तु तत्रासत्तिरिति भावः। ननु तत्रान्वयधीासत्तिभ्रमस्तदा शाब्दबोधोपि भ्र
मात्मकं स्यात् न च तथा पटे घटे नीलस्य सत्वेन विषयबाधाभावादासत्तिभ्रमाच्छाब्दबोधप्रमांगीकारे चासत्तिभ्रमाच्छाब्दभ्रमप्र
मात्मकं स्यात्। न च तथा पत्तौ घटे नीलस्य सत्वेन विषयबाधाभावादासत्तिभ्रमाच्छाब्दबोधप्रमांगीकारे चासत्तिभ्रमाच्छाब्दभ्रम
तिप्राचीनमतं गाथाविरोध इत्यत आह। आसत्तिभ्रमेणेति। न क्षतिरिति। आसत्तिभ्रमस्य न शाब्दभ्रमप्रयोजकत्वं। किं तु योग्यता
भ्रमस्य आसत्तिभ्रमाच्छाब्दोपि प्रमेति प्राचीनगाथांतु निर्युक्तिकत्वादश्रद्धेयैवेति भावः। क्वचित्तु स्तके न शाब्दबोध इत्यनंतरं नीलो घ
ट इत्यतः सर्वतात्पर्यगर्भीसत्तिरिति पाठः। स च यत इत्यादिस्मरणेन यत स्तात्पर्यगर्भीतात्पर्यविषयीभूतान्वयबोधविषयीभूतार्थबोध
[illegible] रूपो [illegible] सर्वनिरुक्तासत्तिरतो न शाब्द
कपदाव्यवधान [illegible] पातांतरं व्याख्यानिरूक्तमिति। न चैकाया आसत्तेः श्लोकेऽभावाद्विशेषदर्शनि पदाव्यवधानरूपस्या
बोध इत्यर्थकतया व्याख्येयः। पातांतरं व्याख्यानिरुक्तमिति। श्लोकादौ योजनावाक्यादेवान्वयबोधोपगमात्। न चाख्यातोक्तासत्तिर्मौनिश्लोकेन
पितवाभावाच्छाब्दप्रमाणं स्यादितिवाच्यं। श्लोकादौ योजनावाक्यादेवान्वयबोधोपगमात्। न चाख्यातोक्तासत्तिर्मौनिश्लोकेन
संभवति। तत्र पदाभावेन पदाव्यवधानस्याभावात् उक्ता सत्तौ ज्ञानविलंबेन शाब्दबोधाभावाच्च। विलंबव्यवधानेन। इत्यापदजन्य
पदार्थोपस्थितिरासत्तिस्तत्राव्यवधानांशेन निवेशानां। शाब्दबोधप्रतिपदजन्यपदार्थोपस्थितेः कारणताया अव्यवधानेन
वक्तुमसंभवात्। तस्मादित्यापदजन्यपदार्थोपस्थितिरासत्तिरिति भावः। न च व्यवधानेन पदोपस्थितिः शाब्दबोधे कारणमित्यु
क्तौ। अनेकपदघटितवाक्यस्थले व्यवधानेन पदोपस्थित्यसंभवादित्याशंकते। नन्विति। अव्यवधानेनासत्तेरिति। अभेदेप
व्यवधानसंभवादिति भावः। ननु तर्हि शाब्दप्रतज्ञानसंस्कारस्मरणे तिप्रतिते विशेष्यकतत्प्रकारकसंस्कारत्वेन जनकत्वात्कथं प्रत्येकप
दसंस्कारैर्नानापदविशेष्यकस्मरणं भिन्नविषयकत्वादत आह। नानासन्निकर्षेति। संभवादिति। यथा च घटचक्षुःसंयोग
स्य पटप्रत्यक्षे कारणत्वाभावेपि घटचक्षुःसंयोगपटचक्षुःसंयोगाभ्यामेकं प्रत्यक्षं तथा तत्तत्पदगोचरसंस्कारस्य भिन्नवि
षयकत्वेनाजनकत्वेपि तत्संस्कारजन्यस्मरणमेकमेव जायते बाधकाभावादिति भावः। अन्यथा नानासंस्काराणामेकस्म
=घटः पटश्चेत्याकारकं समूहालंबनात्मकमेकं प्रत्यक्षमिति=२

[illegible] ७८

तिः

यः

अथ प्रत्ता... लिखादिश्लोके

विलंबो

७१

= खंडवाक्यार्थशाब्दबोधसाधारणपदजन्यपदार्थ = नानावर्णगोचरपदस्मरणाद्वार = १
= र्थोपस्थितित्वेन = १०

रणजनकत्वाभावे। नानावर्णैरिति। नानावर्णानां प्रत्येकसंस्कारैरित्यर्थः। एकस्मरणं। नानावर्णगोचरमेकस्मरणं पदस्मरणं वृत्त्या अस्तु तर्हि विनाशिना
नामिकाणां पदजन्यपदार्थोपस्थितीनामपि मेलनासंभवात् सर्वत्र शाब्दबोधे पदजन्यपदार्थोपस्थितिः समूहालंबनात्मकैव कारणं एवं सर्वेषु यु च
गपदेव सकलपदार्थानां विशेष्यविशेषणमिति न्यायेनैव शाब्दबोधः। ननु विशिष्टस्य वैशिष्ट्यमिति रीत्या तज्जनकविशेषणतावच्छेदकप्रकार
कनिर्णयस्य पूर्वमभावादिति प्राचीनमतं प्रदर्शयति। परं त्वित्यादिना। एकदेशेति। नव्ये घटमानयेत्यादौ घटीयाकर्मतेत्यबोधानंतरं घटकर्मकान
यनेत्यादिबोध इति क्रमेण सर्वः। रक्षायुवानस्तस्यतदाकुरित्यादिः। अयमद्य युवष्ठ सुभ्रूः कपोतैः अश्वैरेतैरचिरसन्निहितकाले कानां पदार्थानां साम्य
बोध्यं केचिदित्यनेन स्वरचितमस्वरसंप्रकाशयन्नेतां तरमाह परे त्विति। यद्यदिति। स्वार्थाक्षिप्तं स्वार्थे योग्यं यद्यसंनिधानं प्रपद्यते स्वार्थोपस्थि
तिविषया भवतीति तेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यते अनंतरं च महावाक्यार्थबोध इत्यर्थः। इत्थं च पूर्वोक्तसमूहालंबनात्मकपदार्थ
स्मरणं विनापि निर्वाह इति भावः। ननु घटमानयेत्यादौ चरमपदार्थस्मृतिकाले घटादिपदार्थस्मरणे नाशात्समूहालंबनस्मृतिरावश्यकीति वाच्यं।
तत्र घटस्मरणनाशेपि घटीयकर्मतेत्याकारकावांतरशाब्दबोधस्यैव पदजन्यपदार्थोपस्थितित्वेन तेनैव घटकर्मकानयनेत्यादिमहावाक्यार्थबोधनि
र्वाहात्। न हि पदजन्यपदार्थस्मृतित्वेन शाब्दबोधहेतुत्वमपि तु शाब्दबोधसाधारणतादृशोपस्थितित्वेनैवेति। एवं चैतन्मते खंडवाक्यार्थबोध
पूर्वकमहावाक्यार्थबोधः। अत एव सर्वत्र खंडवाक्यार्थबोधरूपस्य विशेषणतावच्छेदकप्रकारकविशेषणनिश्चयस्य पूर्वं सत्त्वात् विशिष्टस्य
वैशिष्ट्यमिति रीत्यैव महावाक्यार्थबोध उपपद्यत इति। यत्र खंडवाक्यार्थबोधनाशोत्तरमहावाक्यार्थबोधस्तत्रापि खंडवाक्यार्थसमानाका
रस्मरणं च कल्प्यमित्यसावाविशिष्टवैशिष्ट्यनिर्वाह इत्याह। तथैव पदार्थस्मरणेति। अत्रेदं बोध्यं। यत्र खंडवाक्यार्थबोधानंतरं चरमपदस्मृतिस्त
दुत्तरं तदर्थस्मृतिस्तत्र खंडवाक्यानुभवस्य नाशात्समूहालंबनस्मरणमावश्यकं। एवं च यत्र न विशिष्टवैशिष्ट्यबोधसामग्री तत्र विशे
ष्ये विशेषणमिति रीत्यैव बोधः। यत्र तत्सामग्री तत्र विशिष्टस्य वैशिष्ट्यमित्यन्यत्र विस्तरः। अवांतरवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधे
अवांतरवाक्यार्थस्मरणमेव कारणं। ननु समूहालंबनस्मृतिः। न हि शाब्दबोधे पदजन्यपदार्थोपस्थितिः कारणं। लाघवेन पदार्थोप
स्थितेरेव हेतुत्वात्। अत एव च द्वारमित्यादौ न पिधेहीति पदाध्याहारः किंतु अर्थाध्याहार एवेति प्राभाकरमतं दूषयति। इदं तु बोध्यमिया

157

रपदोत्तरा[illegible]पदरूपानुपूर्वीविशेषज्ञा[illegible]नाव्यवहितोत्तरद्वारकर्मकपिधा[illegible]नानुकूलकृतिमात्राकारकशाब्द=
[illegible]स्वावच्छिन्नं प्रति द्वारमित्याकारकानुपूर्वीविशेषस्यैव कारणता एवं पिधेहीत्याकारकआनुपूर्वीविशेषज्ञानान्यव=
हितोत्तरशाब्दबुद्धित्वावच्छिन्नं प्रति पिधेहीत्याकारकआनुपूर्वीविशेषज्ञानस्य कारणता तथा च परस्परं न व्यभिचा=
पार इति= =नासंभवः=

दिना। पदजन्येति। पदार्थोपस्थितिमात्रस्य हेतुत्वे प्रत्यक्षादिनाउपस्थितस्यापि शाब्दबोधापत्तिरिति भावः। ननु प्रत्यक्षोपस्थितस्य[illegible]देः शा
ब्दबोधाभावस्तात्पर्याभावात् तत्त्वेपि इष्टापत्तिरत आह। किं चेति। तेनेति। द्वारं कर्मेति पिधानं कृतिरिति वाक्यात् द्वारकर्मकपि
धानान्वयबोधानुदयात् द्वारं पिधेहीत्यानुपूर्वीरूपाकांक्षाज्ञानहेतुत्वस्यावश्यं वाच्यतया तादृशाकांक्षाज्ञानार्थं पिधेहीति पदाध्या
हारआवश्यक इति भावः। ननु द्वारकर्मकपिधानानुकूलकृतिबोधे आनुपूर्वीविशेषस्य द्वारपदोत्तरामपदरूपस्य पिधेहीत्याकारक
स्य वा ज्ञानं कारणमस्तु न द्वारं कर्मत्वं पिधानं कृतिरित्यस्माच्छाब्दबोधापत्तिः। तथा च द्वारमित्युक्ते पिधेहीति पदस्य नाध्याहारः। न
नु तादृशानुपूर्व्योः परस्परं व्यभिचारः। अव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशात्। न च यत्र द्वारं पिधानं कृतिरिति द्वारक
र्मकं पिधेहीति बोधे तत्रापि द्वारकर्मकपिधानानुकू[illegible]शाब्दबोधापत्तेरिति वाच्यं इष्टापत्तेः। प्रत्यक्षानुमानादिनाउपस्थि
तस्यैव निराकांक्षपदोपस्थितस्यापि बोधे बाधकाभावादत आह। तथापि पुष्पेभ्य इति। स्पृहयतीत्यादि इत्यादिनान्वेष्यति इत्यादि
इत्यर्थे इति अत्र तत्सादिपरिग्रहः। चतुर्थ्यनुपपत्तेरिति। कर्मत्वार्थकस्य स्पृहयतियोगे एवानुशासनेन बोधनादिति भावः। अत्रेदं चि
न्त्यम्। अस्त्वेवं रीत्या कश्चित्तदाध्याहारस्तावता पि तदन्योपस्थितित्वेन न शाब्दबोधहेतुत्वं गौरवेण पदार्थोपस्थितित्वस्यैव कारणताव
च्छेदकत्वात्। तथा च द्वारमित्यादौ कथंचिदुपस्थितस्य पिधानादेर्बोधे बाधकाभावादर्थाध्याहारपक्ष एवोचित इति। तत्र पदार्थे तत्र
तद्वत्ते सति न तत्पदार्थे तत्पदार्थवत्त्वं योग्यतेत्युक्ते तत्रायुक्तमनुपयुक्तं च। स्वस्मिन् स्वाधिकरणत्वाभावात् ज्ञानस्य शाब्दबोधहेतु
त्वाच्चेत्यतः प्रथमं तत्पदमेकपदार्थपरं द्वितीयं च तत्पदमपरपदार्थमित्यभिप्रायेण व्याचष्टे। एकपदार्थ इति। योग्यताज्ञानस्य शाब्द
बोधहेतुत्वे मानमाह। तज्ज्ञानाभावाच्चेति। असर्वत्वादिति। सर्वत्र शाब्दबोधात्पूर्वमनिश्चितत्वादित्यर्थः। क्वचित्संशयस्येति। संश
यनिश्चयसाधारणयोग्यताज्ञानत्वेन हेतुत्वादिति भावः। अत एव निर्णयमपि दर्शयति। क्वचिदिति। भूतले घट इति प्रात्यक्षिक
निर्णयोत्तरमपि निशाब्दबोध इत्यर्थः। नव्यास्त्विति। ननु योग्यतानिश्चयस्य प्रतिबंधकत्वे तदभावत्वेन हेतुत्वं वाच्यं। तदपे
क्षया लाघवेन योग्यताज्ञानहेतुत्वस्यैवोचितत्वादत आह। तदभावनिर्णय[illegible]स्येति। बाधनिर्णयकालेपि लौकिकसन्नि

=प्रत्यक्षादिना ७

अ२

=यथा प्रत्यक्षादिना उपस्थितस्य घटादेः घटवद्भूतलमित्याकारक=
=शाब्दबोधः तथा द्वारं पिधानं कृतिरिति द्वारकर्मकपिधेहीति=
=वे साकारक निराकांक्षोपस्थितस्यापि द्वारादेः [illegible] शाब्द

=प्रथमं द्वारप=
=कर्मविशिष्ट=
=तद्वितीयं द्वार=
=पदं प्रथमावि=
=भक्तयन्त=६
बोधयं=

रूप
ः२
न्यपदा
स्थिति
पर५

तैवन्ह्यनुमितिर्जायतामिति अनुमितीच्छा वर्त्तते परामर्शादिरूपा अनुमितिसामग्री नास्ति तथा पर्वते वह्निप्रकारकप्रत्यक्षं ... माभवत्वि = चर्त्तते एवं च वह्नि = जायते एवं सति ...

४ निश्चयेऽपि पित्तादिदोषवशात् पीतः शंख इति ११ = तिप्रत्यक्षेच्छा नास्ति सन्निकर्षादिरूपा प्रत्यक्षसामग्री
= विधेयकानुमितिः वह्निप्रकारकं प्रत्यक्षं च उभयमपि न जाय

कर्षजन्यतद्विशिष्टबुद्धेरुदयादाह। लौकिकसन्निकर्षाजन्येति। शंखो न पीत इति प्रत्यक्षोदयाद्दोषविशेषाजन्येत्युक्तं। शुक्तौ ने
दं रजतमिति ज्ञानोत्तरदोषजन्यस्येदं रजतमिति भ्रमस्य वारणाय विशेषेति। पित्तमण्डूकवसाजनादिदोषेत्यर्थः। तज्ज्ञानमा
त्रे। तद्विशिष्टबुद्धिमात्रे। सिद्धमिति। तथा चायोग्यताज्ञानस्य शाब्दबोधं प्रति प्रतिबंधकत्वस्य क्लृप्तत्वात्तेनैव निर्वाहे अयो
ग्यताज्ञानस्यातिरिक्तप्रतिबंधकत्वं न कल्प्यत इति भावः। ननु यत्र नायोग्यताज्ञानं न वा योग्यताज्ञानं तत्र शाब्दबोधापत्ति
रत आह। योग्यताज्ञानविलंबेति। तथा चेष्टापत्तिरिति भावः। आकूतस्यस्वरसस्तद्धीजंतु यद्विषयकमनुमित्यादिकं न जातं शा
ब्दबोध एव जातस्तद्विशिष्टबुद्धौ अयोग्यताज्ञानाभावत्वापेक्षया लाघवेन योग्यताज्ञानत्वेनैव हेतुतासिद्धिः। यद्विशेषयोरि
ति व्याप्तिबलाच्छाब्दबोधसामान्ये योग्यताज्ञानत्वेन हेतुतासिद्धिरीश्वरेति। एवमिच्छायाउन्नेअक्तानुरोधेनायोग्यताज्ञान
प्रतिबंधकत्वस्य विशेषपर्यवसानात्क्लृप्तप्रतिबध्यतावच्छेदकस्यानुमितित्वादेः शाब्दबोधसाधारण्याभावाच्छाब्दबो
धे अयोग्यतानिश्चयस्यातिरिक्तप्रतिबंधकताकल्पने गौरवाल्लाघवेन योग्यताज्ञानस्य हेतुत्वं युक्तमिति। न चायोग्य
ताज्ञानस्य हेतुत्वे अप्रामाण्यनिश्चयाभावस्तत्र विशेषणं तदपेक्षया अप्रामाण्यज्ञानाभावविशिष्टयोग्यतानिर्णयाभा
वहेतुत्वे लाघवमिति वाच्यं। योग्यताज्ञानस्य हेतुत्वे तदभाववति तत्प्रकारकमित्येकविधाप्रामाण्यग्रहाभावनिवेशेन लाघ
वादयोग्यतानिश्चयस्य प्रतिबंधकत्वे तु तदभावाभाववति तदभावप्रकारकं तद्वति तदभावप्रकारकमिति द्विविधाप्रामाण्य
ग्रहाभावनिवेशेन प्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकतद् भाववत्यभावे प्रतियोगितासंबंधेन तत्प्रकारकमित्य
प्रामाण्यग्रहाभावनिवेशेन च गौरवात्। ...धनिश्चयस्यैव तदभाव... व्याप्यतदभावावच्छेदकनिश्चययोः प्रति
बंधकत्वेनातिगौरवात्। प्रतिएवं योग्यताज्ञानस्य शाब्दबोधाजनकत्वे शाब्दसामग्रीकाले योग्यताज्ञानाभावविशिष्टत्व
मानसवारणाय तत्र शाब्दसामग्र्याः प्रतिबंधकत्वं कल्पनीयमिति गौरवं। योग्यताज्ञानस्य शाब्दबोधजनकत्वे तु तच्चयो

= मान्यप्रतिब = ध्यप्रतिबंधके = भावो वक्तव्यः = अनुमितीच्छा = विरह ... प्रत्य = क्षेच्छाविरह ... विशिष्ट =

= यद्विशेषयोः = कार्यकारण = भावः असति = बाधके तत्सा = मान्ययोरपीति ६

अयोग्यताज्ञा = नं प्रतिबंध = क तथा स = ति प्रतिबंध = क सत्त्वेऽपि प्र = त्यक्षं वह्नि = प्रकारकं = स्यात् कथ = मयं विप्रत्य

... स्र्व ... = ७ = = वह्न्यभावाभाववति वह्न्यभावप्रकारकं। वह्निमति वह्न्यभावप्रकारकमिति = ५। = तदभावावच्छेदकनिश्चयो नाम पाषा = णमयो वह्न्यभाववान् पर्वतः पाषा = णमय इत्याकारकः = २ =

=घटपदविरहप्रयुक्तत्वाभावात्=४

प्यताज्ञानाभावरूपविषयाभावादेव। न तादृशं मानसमिति तत्र शाब्दसामग्री प्रतिबंधकत्वं न कल्प्यत इति लाघवमित्यवसेयं। ते
न पदेन सह। तस्येति। तत्सदविशिष्टत्वं तत्सदस्यार्थः। घटमानयेत्यत्र घटपदं विना अम्पदस्यान्वयाननुभावकत्वात् घटपदविशि
ष्टत्वम् अम्पदस्याकांक्षा। घटः कर्मत्वमित्यादौ कर्मत्वपदे घटपदवत्त्वं तु नाकांक्षा। कर्मत्वपदे घटीयाकर्मतेति शाब्दबोधाननुभाव
कत्वेऽस्य घटपदविरहे प्रयुक्तत्वात्। अत्र चाननुभावकत्वं तादृशपदपरिचायकं न तु आकांक्षास्वरूपांतर्गतं। यद्वा अननुभा
वकत्वम् अप्याकांक्षास्वरूपांतर्गतं शाब्दबोधस्वरूपसत्त्वे प्रयोगस्तज्जनितान्वयबोधकाद्वाव्यात्पुनरन्वयबोधापत्तिः।
एकपदे अपरपदवत्त्वं तादृशज्ञानं एवोपयुज्यते। तेन। क्रियापदेन। तस्य। कारकपदस्य। अत्र चैकपदे अपरपदवत्त्वम् अपरपदा
व्यवहितोत्तरत्वं तत्र चाव्यवधानांशस्यासत्त्वेऽप्युपलाभः। आसत्तेः पदाव्यवधानरूपतायाः पूर्वमुपवर्णितत्वात् उत्तरत्वं च क्रियाकार
कपदयोर्नोपेक्षितं। येन। पचति पचति चैत्र इति वाक्यद्वयादन्वयबोधादतः क्रियाकारकपदयोराकांक्षा नास्त्येव। किंतु प्रकृ
तिप्रत्यययोरेव। तत्राव्यवधानांशस्य सत्त्वालाभात् असिये प्रकृत्युत्तरत्वरूपाकांक्षाज्ञानं कारणमित्याह। वस्तुतस्त्वित्यादिना
अयमेति पुत्रो राज्ञः [illegible] जनितान्वयबोधदशायां राजपदस्य पुत्रपदेनेव पुरुषपदेनाप्याकांक्षासत्त्वात् राज्ञः पुरुष इत्यन्व
यबोधः स्यादत आह। अयमेतीति। तथा च राजपुरुषपदयोराकांक्षायाः सत्त्वेऽपि तात्पर्याभावान्न तथान्वयबोध इति भावः।
स्यादेवेति। भवत्येवेत्यर्थः। ननु पुरुषेण पुत्रेण च राजपदस्य तात्पर्यज्ञानेऽपि पुत्रपदराजपदयोरेव यत्रैकवाक्यता निश्चयः पुरु
षपदराजपदयोरेकवाक्यतानिश्चयस्तत्र पुरुषपदेन सह निराकांक्षायाः सत्त्वाद्राज्ञः पुरुष इति बोधापत्तिरिति चेन्नाय
सदं विनेत्यस्य समभिव्याहृतयत्सदं विनेत्यर्थकतया समभिव्याहारस्याकांक्षाशरीरप्रवेशात् समभिव्याहारश्चेदं
पदमेतत्सदेन सहान्वयबोधयत्विति पदतात्पर्यं। प्रकृते च तत्ज्ञानाभावान्न दूरुदिताकांक्षाज्ञानाभाव इति। समभिव्याहा
रस्याकांक्षाशरीरप्रवेशः। किंतु स्वातंत्र्येण तज्ज्ञाने शाब्दबोधे कारणमित्यन्ये। नव्यास्तु। अथ तात्पर्यज्ञानस्य राजपद

=पदतात्पर्यज्ञानाभावात्=२

णि

=पदतात्प=
=र्यनिश्चयः५

८१

=अर्थतात्पर्यनिश्चये=२ =पदतात्पर्यज्ञानहेतुत्वे=१

पुरुषविषयकराजसंसर्गकप्रतीतीच्छयोच्चरितमित्याकारकज्ञानत्वादिनाहेतुत्वादेवातिप्रसंगाभावेसमभिव्याहारज्ञान
हेतुत्वेमानाभावः।निरुक्ततात्पर्यनिश्चयेपुर्वोक्तसमभिव्याहारस्यपदतात्पर्यरूपस्यसंशयेव्यतिरेकनिश्चयेवैभव वा।
त्येवशाब्दबोधइत्यन्यत्रविस्तरः।इदंतुबोध्यं।आकांक्षालक्षणपदपदार्थपदज्ञानपरंमौनिश्लोकानुरोधादतएवाध्याह
तपदेनाप्याकांक्षानिर्वाहः।अध्याहारश्चाश्रुतपदानामनुसंधानं।अतएवसर्वापेक्षयाऽऽधुनातनस्य।यतःस्वस्था
नस्थितस्यपुनरनुसंधानमात्रवृत्तिः।नेदीयःस्थानांतरस्थितस्यानुसंधानमनुषंगः।दवीयःस्थानांतरस्थितस्या
नुसंधानमनुवृत्तिरियंच सिंहावलोकितमंडूकप्लुतिगंगास्रोतोवत्त्रिधेति।निराकांक्षज्ञानस्यप्रतिबंधकत्वे
नसाकांक्षज्ञानस्यहेतुत्वमितितुनसत्।तथासत्याकांक्षाभावत्वाद्यतदवच्छेदकधर्मज्ञानानांप्रतिबंधकत्वेगौ
रवादित्यलं।नच।कुत्रेतीति।घटमानयेतीत्यादौकर्मत्वविशेष्यकाधेयतासंसर्गकघटप्रकारकप्रतीतीच्छावक्तुस्त
त्पर्यतादृशेच्छयोच्चरितमिदंवाक्यमित्याकारकंश्रोतुस्तात्पर्यज्ञानंशाब्दबोधेकारणमित्यर्थः।तत्रयुक्तिमाह।संधवे
ति।आदिनाश्वेताधावतीत्यादेःपरिग्रहः।तत्रकदाचित्सैंधवत्वगुणविशिष्टस्यकदाचित्कुतुरादेर्बोधस्यतात्पर्यवशा
न्नियम्यत्वात्।कश्चित्तुलवणस्येति।कश्चित्तुभयोरित्यपिबोध्यं।इतिनस्यादिति।इतिनियमोनस्यादित्यर्थः।इ
दमुपलक्षणं।तात्पर्यसंशये व्यतिरेकनिर्णयेचशाब्दबोधानुदयाच्छाब्दबोधेतात्पर्यज्ञानंकारणं।यत्संशयइतिव्या
प्तेरित्यपिबोध्यं।प्रकरणादीति।आदिनासंयोगविप्रयोगसाहचर्यादीनांपरिग्रहः।प्रकरणादीनांहेतुत्वनियतपूर्ववर्तिताव
त्वेनानन्यथासिद्धिमात्रकल्पनेलाघवादितिभावः।अननुगमादिति।तथाचपरस्परजन्यंशाब्दबोधेपरस्परंव्यभिचा
रेणनहेतुत्वंसंभवतीतिभावः।इत्थंचेति।शाब्दबोधत्वावच्छिन्नंप्रतितात्पर्यज्ञानस्यहेतुत्वेचेत्यर्थः।एवमग्रेपि।प्रकृतस्य।
४=यत्संशयव्यतिरेकनिश्चयोयत्रप्रतिबंधकौतत्नि

हररः=५

मु-दि. ८२

कार्यद्रव्यानधिकरणकार्याधिकरणकालविशेषात्मकखंडप्रलयस्य। आगमेति। नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योति
रभून्न चान्यदित्याद्यागमेत्यर्थः। इष्टं च। शुकवाक्येऽपि। संवादिशुकवाक्यजन्यशाब्दबोधेऽपि। शिक्षयितुरेवेति। ईश्वरेच्छाया
विसंवादित्वाभावादिति भावः। अन्यत्विति। क्वचिदित्यस्य विवरणं नानार्थादाविति। गृहीतनानार्थशक्तिकादावित्यर्थः।
तेन गृहीतनानार्थशक्तिकस्य गृहीतनानार्थलक्षणकस्य गृहीतविभिन्नार्थशक्तिलक्षणकस्य च संग्रहः। आदिना एकार्थगृ
हीतलक्षणकस्य च संग्रहः। मीमांसालाघवज्ञानात्मकस्तर्कः। परिशोधितेति। सहकृतेत्यर्थः। तत्रानुमानं। आकुरित्यस्य
रसो भवनं तद्वीजं तु गृहीतनानार्थशक्तिकपदजन्यानुभवत्वापेक्षया लाघवेन पदजन्यानुभवत्वस्यैव तात्पर्यज्ञानजन्यतावच्छे
दकत्वमुचितमित्यन्यत्राधिकमनुसंधेयं। सुगमतयेति। सुगमस्य स्वयमप्यूहयितुं शक्यतया उरुह एवादो सुधिया
जिज्ञासोदयादिति भावः। तथा चावसरसंगत्या अनुभवानंतरं स्मरणनिरूपणमिति भावः। तत्र। स्मरणे। नस्यादिति।
अनुभवस्य नष्टत्वादिति भावः। ननु अनुभवस्य व्यापारद्वारा कारणत्वं यौर्यौ तेऽव्यवहितपूर्वक्षणवर्तिस्वस्वव्यापा
रान्यतरवत्त्वं। तथानुभवनाशेऽपि तज्जन्यसंस्कारस्य सत्त्वान्निराबाधमत आह। समानप्रकारकेति। नष्टत्वादिति। तथा च
तादृशमपि कारणत्वमनुभवे न संभवतीति भावः। तेनैव। संस्कारनाशकेन समानप्रकारकस्मरणेनैव। संस्कारांतरस्ये
रेति। स्मरणस्य तृतीयक्षणे नाशेन स्वरूपतो हेतुत्वासंभवादिति भावः। फलस्य। प्रत्येकविषयकक्रमिकस्मरणरूप
स्य। संस्कारनाशकत्वाभावादिति। समानप्रकारकत्वाभावादिति भावः। कालस्य रोगस्य वेति। अन्यथा उक्तसमूहालं
बन संस्कारस्य नाशाप्रसंगादिति भावः। नवेष्टापत्तिः। अन्यथावित्वेन विनाशानियमात्। ननु कालादेः कालत्वा
दिना नाशकत्वे संस्कारमात्रस्य क्षणिकत्वापत्तिस्तत्तत्फलेन तथात्वे गौरवमत आह। चरमफलस्यैवेति। चरमफ

समूहालंब
नकस्मृत्य:
अन्यसंस्का
रस -२

५६ ८२

= अवश्यवक्तव्यत्वं अवसरसंगतिः -८

= रोगः आदिपदार्थः -२

162

खं नु २

ले वैजात्यं कल्पयित्वा तेन रूपेण नाशकत्वं वाच्यमिति भावः। नक्रमिकेति। न स्मरणोत्तरस्मरणोत्पत्त्यर्थः। दार्ढ्यपदार्थ
त्वादिति। तथा च पुनः पुनः स्मरणात् दृढतरसंस्कारोत्पत्तिः। विद्यमानसंस्कारस्यैव पुनः पुनः स्मरणेन स्फोट
तुद्बोधकसमवधानं जायते। उद्बुद्धात् तस्मात् स्मरणोत्तरमिति भावः। व्यभिचारसंशय इति। अनुभवत्वेन हेतुत्वे व्य
भिचारसंशय इत्यर्थः। तथा च न विशेषधर्मेण व्यभिचारज्ञानमिति भावः। व्यभिचारसंशयाभावादिति। स
हकृत्तु भूततस्थले संस्कारनाशकस्य चरमस्मृतेस्तदानीमभावेन संस्कारनाशाभावादनुभवत्वेन हेतुत्वेपि न
व्यभिचारसंदेह इति भावः। यद्यप्यनन्तसंस्कारतन्नाशकल्पनागौरवस्य फलमुखत्वेन न दोषत्वमन्यथा
विशिष्टज्ञानकल्पनागौरवभिया अनुमितिं प्रति विशिष्टज्ञानत्वेन हेतुता विलयप्रसंगात् तथापि ज्ञानत्वेन
हेतुत्वे उपेक्षात्मकत्वं न स्मृतिव्यक्तिभेदस्य कारणतावच्छेदककोटिप्रवेशेन गौरवं। अनुभवत्वेन स्मृतिहे पो
तुत्वे तु न स्मृतिव्यक्तिभेदस्य निवेशो न लाघवमिति लाघवज्ञानरू[illegible] नैवाकस्यात् व्यभिचारशंका। किंच
त्वा त्कारीत्यत्र तात्पर्यं। जन्यसाक्षात्कारत्वादिति। ईश्वरीयसाक्षात्कारे व्यभिचारवारणाय जन्येति। नन्वचितिलाघ
वात्त्वगिंद्रिय[illegible]च कारणत्वमस्त्वत आह। एवमिति। असमवायिकारणसंयोगाश्रयत्वेन
ति। भावकार्यस्य सासमवायिकारणकत्वनियमादिति भावः। तन्मनसो विभुत्वे चेति। तदसन्निधानं मन
सो विभुत्वेन संभवतीत्यर्थः। तथा सतीति। दृष्टसामग्रीसत्वेप्यदृष्टविलंबात् कार्यविलंबांगीकार्य इत्यर्थः।
चक्षुरादीनामपीति। चाक्षुष[illegible]दूरत्वयोरदृष्टत्वादुरहाभ्यामनुपपत्तेरि त१

जन्मस्य न्नीतसाक्षात्कारिस्य चे३ २ = चक्षुरादिरूपदृष्टसामग्रीसत्वे = २

तिभावः। भ्रांतत्वादिति। अव्यवहितकालोत्पत्तिकत्वस्य दोषत्वादिति भावः। उभयोपपत्तिरिति। मनसः संयो
गे एकेंद्रियमात्रसंबंधादक्रमेव ज्ञानं विज्ञात्रोतु नानेंद्रियैर्मनः संबंधायुगपन्नानाज्ञा नानासुसत्तिरिति भा
वः। यद्यपि नानेंद्रियैर्मनः सन्निकर्षकाले चाक्षुषाद्युत्पत्तिकाले रासनाद्यनुत्पादस्य रासनादिकं प्रति चाक्षु
षसामग्र्याः प्रतिबंधकत्वेनैवोपपत्तेर्मनसो विभुत्वेपि बाधकाभावस्तथापि तथा प्रतिबंधकत्वे गौरवमित्यभि
मानः। न च त्वङ्मनोयोगस्य ज्ञानमात्रहेतुत्वात् चाक्षुषसामग्रीकाले स्पार्शनसामग्र्याः नियमतः सत्त्वात् स्पार्श
नापत्तिर्मनसोणुत्वपक्षेपि तुल्यैवेति वाच्यं। अनन्यगत्या स्पार्शनं प्रति चाक्षुषादिसामग्र्याः प्रतिबंधकत्वस्वी
कारादेव मे पि रासनादिप्रत्यक्षे चाक्षुषादिसामग्रीप्रतिबंधकत्वाकल्पनप्रयुक्तलाघवस्याणुत्वपक्षे निष्प्र
त्यूहत्वात्। यद्वा ज्ञानसामान्यं प्रति त्वङ्मनोयोगस्याहेतुत्वाभिप्रायः। अत एव तदसंबंधात्त्वगादिभिः परैर्ज्ञानं
नोत्पादितस्यूक्तं प्राक्। मूर्धात्वङ्मनोयोगस्य ज्ञानसामान्यं प्रति हेतुत्वेपि सुषुप्तौ ज्ञानानुत्पादनिर्वाहस्तत्रोपपा
दितमधस्तात्। एवं मनसो विभुत्वे आत्ममनःसंयोगस्यानुपपत्तिरात्ममनसोः कर्मभावेन कर्मजन्यसंयोगस्य विभुत्ववादि
मते असंभवाद् अजसंयोगमानाभावात् यदपि परमाणवो मनांसि जैनंत। धर्मिणां अतिरिक्ताया भिन्नजाते कल्पनापेक्षया क्लृ
प्तानामेव धर्मिणां तत्रोपपत्त्यौ हेतुत्वस्य युक्तत्वात्। नियमस्तु हृदयप्रदेशगमहादिनि नव्यैरुक्तो। तदपि न। यत्संयोगव्यतिरेकात् सुषुप्ति
काले ज्ञानानुत्पादस्तस्य मनसो जन्यस्यांगीकरणीयत्वात्। न च ज्ञानविशेषस्य प्रतिबंधकत्वादेव सुषुप्तिकाले ज्ञानानुत्पाद इ
ति वाच्यं। अनंतानां ज्ञानविशेषाणां प्रतिबंधकत्वे गौरवात्। न चोदासीनमनःसंयोगस्य सुषुप्तिकाले सत्त्वादापत्ति
रिदमस्य [illegible] मनस एव ज्ञानादिहेतुत्वेन वक्तव्यं। तदपेक्षया चादृष्टविशेषाकृष्टभौतिकपरमाणूनामेव
हेतुत्वमुचितमिति वाच्यं। तस्य भौतिकत्वे पृथिवीत्वजलत्वादिकं व्यत्रविनिगमकाभावादुभयकल्पने च जाति

=मनो रूपा= =नन धर्मिणां= ६

८३

मनस्यन्वितरूपितसंगतिमेवं तद् तन्निरूपणानंतरं निरूपणविषयः =

प २

जाति १

॥श्रीगणेशायनमः॥अवसरसंगतिमभिप्रेत्याह।द्रव्यं निरूप्येति।तस्मिन्निरूपिते प्रतिबंधकीभूतजिज्ञासान्तरनिवृत्तेरिति भावः।इति चेदिदमिति पाठः।ननु रूपत्वस्य संज्ञायाः गुणनिष्ठकारणतावच्छेदकत्वं स्यादित्याशंक्याह।न हीति।रूपत्वादीत्यादिनाऽसंसर्गादेः परिग्रहः।यद्यपि गुणत्वजातौ प्रत्यक्षमेव प्रमाणं।रूपादिषु संयुक्तसमवेतसमवायेन गुणत्वप्रत्यक्षसंभवात् तथाप्यतींद्रियरूपादौ तत्प्रत्यक्षासंभवेन तत्साधारण्यं गुणत्वस्य न घटत इत्यनुमानं प्रदर्शितं।न च रूपत्वादिना सांकर्यभिया अतींद्रियरूपादौ गुणत्व-सिद्धिः।गुरुत्वादौ धर्मिग्राहकमानेन तत्सिद्धिरित्यनुमानप्रदर्शनं व्यर्थमिति वाच्यं।रूपादावप्येषामसाधारणगुण इति प्रत्यक्षस्यासिद्धेः।इदमत्र बोध्यं।सकलगुणसाधारणी एका कारणता नास्त्येवेति कथं तदवच्छेदकतया गुणत्वस्य सिद्धिः।न च चतुर्विंशतिगुणेषु प्रत्येकं याः कारणताः तासामेव पक्षतया स्वाह सकलकारणतावच्छेदकतया गुणत्वसिद्धिरिति वाच्यं।तथा सति द्रव्यकर्मरूपसामान्यवतियाः कारणता सा किंचिद्धर्मावच्छिन्नेत्यनुमानेन रूपभिन्नत्रयोविंशतिगुणसाधारणवैजात्यस्यापि सिद्धिप्रसंगात्।पारिमाण्डिल्यस्य साध्यकारणतायां गुणत्वस्याव्याप्तिप्रसक्तताया अनवच्छेदकत्वाच्चेत्यन्यो विस्तरः।कर्मादावतिव्याप्तेरिति।आदिना सामान्यपरिग्रहः।उक्तस्य लक्षणत्वं प्रतिपादयति।सर्वतिती।ति।द्रव्यत्वव्याप्यतावच्छेदकत्वस्य फलमाह।द्रव्यत्वमिति।जातिपदस्य फलमाह।द्रव्यत्वमिति।सत्तारूपजातिमादाय द्रव्यादावतिव्याप्तिवारणाय सत्ताभिन्नेति।तथापि सामान्यवत्त्वे सतीति।सत्तायोर्विशेषणस्य फलमाह।जात्यादीनामिति।तत्र।तेषु।गगनादावतिव्याप्तेरिति।आदिना कालादिपरिग्रहः।यथाश्रुतं चैतत्।सामान्यत्वे सति कर्मान्यत्वे सति कर्मवदवृत्तिपदार्थविभाजकोपाधित्वेऽतिव्याप्तेरभावात्।वेगेन स्थितिस्थापकोऽप्युपलक्षणीय इति पाठः।वेगपदस्य भावनान्यसंस्कारपरत्वादिपरिग्रहः।इदमुपलक्षणं।वेगाश्रयत्वेन द्वारेणानुक्तसमुच्चायकेन गुरुत्वस्यापि संग्रहात्।ननु मूर्त्तगुणत्वं मूर्त्तवृत्तिगुणत्वं संख्यादावतिव्याप्तमत आह।अमूर्त्तेष्विति।तथा चामूर्त्तावृत्तित्वे सति गुणत्वं प्रदर्शितं मूर्त्तगुणानां साधर्म्यमित्यर्थः।न चैतदपि मूर्त्तमात्रवृत्तिसंख्यामतिव्याप्तमिति वाच्यं।अमूर्त्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्या

तिभा गुः=२ या

165

संख्यात्वाद्यव्याप्यादेश्च व्युदासः। वेगस्थितिस्थापकसंग्रहाय संस्कारत्वान्येति। द्वितीयेऽवच्छेदकान्तेनबुद्ध्यादे ८१

व्यजातिभिन्नगुणत्वस्य मूर्त्तत्वव्याप्यतावच्छेदक गुणवृत्तिजातिमत्त्वस्य वा विवक्षितत्वात्। अत्र चाद्येऽन्त्यांतेन द्वित्वांतेन च मूर्त्तत्वादेर्व्युदासः। मूर्त्तत्वे एते मूर्त्तगुणा इत्यत्रापि पर अपरभेदे विशेषो बोध्यः। ननु धर्मैत्यादिमूर्त्तत्वेनैतेषां अमूर्त्तवृत्तिगुणत्वं साधर्म्यमुक्तं तत् संख्यादावतिव्याप्तमत आह। मूर्त्तेष्विति। मूर्त्तावृत्तिगुणत्वमेतेषां साधर्म्यमित्यर्थः। न च तथाप्यमूर्त्तमात्रवृत्तिसंख्यादावतिव्याप्तिरिति वाच्यं। मूर्त्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिभिन्नगुणत्वस्य मूर्त्तत्वाभाव व्याप्यतावच्छेदकपरिमाणवृत्तिजातिमत्त्वस्य वा विवक्षितत्वात्। आद्येऽन्त्यांतेन संख्यादिरूपादिव्युदासः। सत्तामादायासंभववारणाय गुणत्वव्याप्येति। कर्मण्यतिव्याप्तिवारणाय विशेष्यीतिगुणत्वस्य निवेशः। द्वितीये परममहत्त्वत्वजातिमादायातिव्याप्तिवारणाय वृत्तीति। ननु उभयेषां गुणा मता इति मूर्त्तत्वेन संख्यादिपंचानामुभयवृत्तिगुणत्वं साधर्म्यमुक्तं तच्च रूपादावतिव्याप्तमत उभयपदं मूर्त्तामूर्त्तपरतया व्याचष्टे। मूर्त्तामूर्त्तेति॥ न च मूर्त्तमात्रवृत्तिसंख्यादावव्याप्तमिति वाच्यं। कालवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य उभयत्वसमव्यापकतावच्छेदकजातिमत्त्वस्य वा विवक्षितत्वात्। नन्वनेकाश्रितत्वं संयोगादावव्याप्तमनेकपदस्य बहुत्वविशिष्टशक्तत्वादत आह। संयोगेति। तथा चैकत्वभिन्नसंख्याविशिष्टवाचकत्वमनेकपदस्येति न तन्ना व्याप्तिरिति भावः। स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणगुणत्वस्य विवक्षितत्वान्नाव्याप्तिरिति केचित्। एकैकवृत्त्यन्य इति मूर्त्तत्वस्य स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकैकत्व काइत्यर्थः। यद्वा स्वाश्रयान्योन्याभावव्यापकात्यन्ताभावप्रतियोगिन इत्यर्थः। स्वार्थे ठगिति। विनयादिभ्यः स्वार्थे ठग्विधानाद्विशेषशब्दस्य तद्गणगतत्वात्। विनयादेराकृतिगणत्वादिति भावः। विशेषगुणा इत्यर्थ इति। विशेषगुणत्वं च भावनान्यायोग्यवृत्तित्वे सति स्पर्शावृत्ति धर्मसमवायी तदन्यत्वे सति गुरुत्वाऽजलद्रवत्वान्यगुणत्वं। अत्र जात्यादावतिव्याप्तिवारणाय विशेष्यं। गुरुत्वनैमित्तिकद्रवत्वयोर्वारणाय गुरुत्वेत्यादि। सांसिद्धिकद्रवत्वसंग्रहाय जलेति। संयोगादिवारणाय सत्यंतं॥ भावनायामव्याप्तिवारणाय धर्मान्यांतं सत्यंतघटक समवायिविशेषणं। सत्तादिकमादायासंभववारणाय स्पर्शासंगत

मुक्ता० ८४

८४

166

यस्पर्शौ रत्नानीति। संख्या आदिर्यस्य परत्वमन्ते यस्येति व्युत्पत्त्या परिमाणपरत्वयोरेव ग्रहणमिति भ्रमवारणायादिपद
ग्राह्यगुणान् विशिष्य दर्शयति। संख्यापरिमाणे इत्यादिना। गुरुत्ववेगाविरत्र मूले वेगपदं भावनातिरिक्तसंस्कार
परं। तेन स्थितिस्थापकस्यापि संग्रहः। मूले सामान्यगुणा इति। तत्त्वं च रूपस्पर्शान्यत्वे सति द्रव्यविभाजकोपाधिव्या
प्यतावच्छेदकसंयोगविभागवेगद्रवत्वाद्यवृत्तिजातिभिन्नगुणत्वं। द्रव्यविभाजकतावच्छेदकं पृथिवीत्वादि तद्व्याप्यता
वच्छेदकं च गंधत्वादि तद्भिन्नत्वस्य संख्यादौ सत्त्वाल्लक्षणसमन्वयः। अत्रोष्णशीतयोः शुक्लरूपे वायोरनुष्णाशीतस्पर्शे च
पृथिव्यादिशुक्लरूपस्पर्शव्यावृत्तजातिविशेषमानाभावाच्छुक्लरूपानुष्णाशीतस्पर्शयोरतिव्याप्तिवारणाय सत्यंतं।
शब्दविशेषजनकतावच्छेदकं आकाशावच्छिन्नकठिनावयवद्वयविभागतेजोवेगातिशयेषु यतोऽग्निसंयोगनाश्यतावच्छेद
कजातसवच्छिन्नघटादिवृत्तिद्रवत्वे चाव्याप्तिवारणाय वृत्त्यंतं जातिविशेषणं। कर्मादावतिव्याप्तिवारणाय विशेष्यं। पृ
थिवीत्वादिव्याप्यतावच्छेदकतत्तत्संख्यात्वादिभिन्नत्वस्य तत्तत्संख्यायामभावादव्याप्तिवारणाय जातिपदं। द्रव्यविभा
जकोपाधेर्व्यापकत्वं तत्तद्वृत्तित्वेन विवक्षितं। ननु तादृशोपाधित्वेन। अन्यथा संख्यात्वादेरपि तादृशजातित्वादसंभ
वापत्तेरिति। संख्यादिरपरत्वांतो द्रवत्वं स्नेह एव च इत्यत्र च मूले स्नेहपदं वेगस्याप्युपलक्षकम्। स्थितिस्थापकस्यातीन्द्रि
यत्वं वक्ष्यते। ननु द्वीन्द्रियग्राह्यत्वं रूपादावतिव्याप्तं तेषां मनसापि ग्रहात्। बाह्यद्वीन्द्रियग्राह्यत्वमपि तत्रैवातिव्याप्तं। रूपा
दीनां चक्षुरादीन्द्रियाग्रहणात्। अतीन्द्रियसंख्यादावव्याप्तं। तत्र चेन्द्रियग्राह्यत्वस्यैवाभावादत आह। चक्षुषात्वचापीति।
चक्षुस्त्वगुभयग्रहणयोग्यत्वं तदर्थः। चक्षुस्त्वगुभयग्राह्यभावनावृत्त्यन्यधर्मसमवायित्वमिति तु निष्कर्षः। संस्कारत्वा
दिकमादाय भावनायामतिव्याप्तिवारणाय भावनावृत्त्यन्येति। कर्मादौ तद्वारणाय गुणत्वनिवेशः। ननु बाह्यैकैकेन्द्रिय

मु॰ टि॰ गु॰
८५

ग्राह्यसंख्यादावतिव्याप्तं तेषामुभयग्राह्यत्वे ऐकग्राह्यत्वानपायाद्व्याप्तं चातीन्द्रियरूपादौ तेषामिन्द्रियग्राह्यत्वस्ये
वाभावादत आह। रूपादीनामिति। चक्षुरादीति। चक्षुरादिनैवेत्यर्थः। तथा चैकैकमात्रग्राह्यत्वस्य
विवक्षितत्वात् संख्यादौ नातिव्याप्तिः। ग्राह्यत्वात्। ग्रहणयोग्यत्वात्। तेन नातीन्द्रियरूपादावव्याप्तिः। तथा च चक्षुष्ट्वगुभ
याग्राह्यबहिरिन्द्रियग्राह्यगुणसमवेतजातिमत्त्वमेव तेषां लक्षणमिति भावः। न च त्रसरेणुनिष्ठापकर्षस्य चक्षुरिन्द्रि
येणाग्रहणात् तत्रातिव्याप्तिरिति वाच्यं। परिमाणान्यत्वेनापि गुणस्य विशेषणीयत्वात्। गुरुत्वादृष्टभावने स
त्रभावनापदं वेगभिन्नसंस्कारपरं। तेन स्थितिस्थापकस्यापि संग्रहः। न चातीन्द्रियत्वमिन्द्रियजन्यप्रत्यक्षाविषयत्वे
यदि तदा गुरुत्वादावसंभवस्तेषामलौकिकप्रत्यक्षविषयत्वात् लौकिकप्रत्यक्षाविषयत्वविवक्षणे चातीन्द्रियरूपादाव
तिव्याप्तिरिति वाच्यं। लौकिकसाक्षात्कारविषयगुणत्वन्यूनवृत्तिसंस्कारत्वान्यधर्मसमवाय्यन्यगुणत्वस्य विवक्षि
तत्वात्। सत्तादिकमादायासंभववारणाय गुणत्वन्यूनवृत्तीति। भावनास्थितिस्थापकयोरव्याप्तिवारणाय संस्कारत्वा
न्येति। अपि सा तावतिव्याप्तिवारणाय गुणपदम्। गुरुत्वे ऽकारणगुणोत्पन्न इत्यत्र नकारणमकार णं तस्य गुणा इति भ्रम
वारणायाह। मुक्तावल्यां कारणगुणेनेति। समवायिकारणसमवेतगुणेनेत्यर्थः। अत्र कारणत्वमवि वक्षितं समवायि
त्वमात्रं बोध्यं। नतादृशा इति। तथा च कारणगुणोत्पन्नाः कारणगुणोत्पन्नाः न कारणगुणोत्पन्ना अकारणगुणोत्पन्ना
इति विग्रहेण स्वाश्रयसमवायिसमवेतगुणजन्यत्वं कारणगुणोत्पन्नत्वं तादृशगुणाजन्यत्वमकारणगुणत्वं लभ्यमिति
भावः। यद्यपि द्विनिष्ठरूपे ऽन्येऽपि च पाकजरूपादाववयवावयविनोर्द्वित्वस्य तत्कारितिरिक्तद्वित्वस्य द्व्यणुकादौ कर्मजन्यविभा
गसंयोगवेगयोः पाकजद्रवत्वे चातिव्याप्तं तथाप्यकारणगुणोत्पन्नमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं विवक्षितमि
त्यदोषः। अकारणगुणोत्पन्नमात्रवृत्तित्वं चैककारणगुणोत्पन्नावृत्तित्वं। रूपादिनिष्ठपाकजन्यतावच्छेदकवेजात्यसंयोगविभा

निरुक्त

८५

168

गवेगनिष्ठकर्मजन्यतावच्छेदकवैजात्यमणुपरिमाणनिष्ठवैजात्यं परममहत्त्वं चादायातिव्याप्तिवारणाय साक्षाद्व्याप्येति।
संस्कारत्वान्यगुणत्वव्याप्यव्याप्यत्वे सति गुणत्वव्याप्यत्वं तदर्थः। अन्यथा भावनात्वस्य गुणत्वसाक्षाद्व्याप्यत्वाभावाद्भावना
यामव्याप्तिप्रसंगात्। इदमपि परत्वापरत्वयोरतिव्याप्तिरवशिष्यते। साऽपि परत्वापरत्वादिभिन्नत्वेन जातेर्विशेषणीयत्वान्निर
सनीयेति ध्येयं। मूले स्युः कारणगुणोद्भवा इति। कारणगुणोत्पन्नत्वं च न तत्त्वं स्वाश्रयसमवायिसमवेतगुणजन्यत्वं।
हस्तपुस्तकसंयोगविभागादिजन्यकायपुस्तकसंयोगविभागादावतिव्याप्तेः। न च स्वाश्रयसमवायिमात्रसमवेतगुण
जन्यत्वं तच्च हस्तपुस्तकसंयोगादिश्च न स्वाश्रयसमवायिमात्रसमवेत इति वाच्यं। तथाप्यवयवावयविनोरेकत्वाभ्यां जनितेऽ
वयवावयविद्वित्वादावतिव्याप्तेः। तथापि स्वाश्रयसमवायिमात्रसमवेतस्वसजातीयगुणजन्यत्वं तत्। अवयवैकत्वादेरवयवा
वयविद्वित्वसजातीयत्वाभावेन तत्रातिव्याप्तेरभावात्। न च संख्यात्वेन तयोः साजात्यमस्तीति तद्दोषतादवस्थ्यम्। गुणत्वव्या
प्यव्याप्यजात्या साजात्यस्य विवक्षितत्वात्। अवयवावयविरूपादीनां नीलत्वादिना साजात्यसत्त्वान्नासंभवः। ननु तथापि नित्य
रूपे संख्यादिषु च यज्जन्यपरिमाणैककर्मजवेगेऽव्याप्तिरिति चेन्न। स्वाश्रयसमवायिमात्रसमवेतस्वसजातीयगुणजन्य
वृत्तिजातिमत्त्वस्य विवक्षितत्वात्। नित्यरूपादौ च तादृशरूपत्वादिकमादाय लक्षणसमन्वयात्। अत एव संख्यात्वपृथक्त्वाति
रिक्तत्वेन भावनायाः संस्कारत्वेन च तादृशजातिर्विशेषणीया। तेन तादृशसंख्यात्वं पृथक्त्वं चादाय द्वित्वद्विपृथक्त्वादौ नातिव्या
प्तिः। न चावयववेगजन्यावयविवेगवृत्तिसत्तागुणत्वसंस्कारत्वमादाय भावनायामतिव्याप्तिः। न चैवं जातिघटितलक्षणता
दृशरूपत्वादिजातिमादाय पाकजरूपादावतिव्याप्तिरिति वाच्यम्। तादृशजातिमत्त्वे सति पाकजान्यस्य विवक्षितत्वादिति स
र्वं चतुरस्रं। लक्षणतावच्छेदके पाकजान्यत्वविशेषणस्य प्रयोजनमाह। मुक्तावल्यां पाकजरूपादीनामिति। कारणगुणपूर्वक
त्वाभावात्। कारणगुणपूर्वकव्यवहाराभावात्। अत्र पाकजरूपरसगंधस्पर्शपाकजद्रवत्वं द्वित्वादिद्विपृथक्त्वादिसंयोग

त्वा॰

मु॰ द॰ पु॰
८६

विभागपरत्वापरत्वानां नकारणगुणपूर्वकत्वं न चाकारणगुणपूर्वकत्वं साधर्म्यमिति ध्येयम्। एवमन्यत्रापीति। अथशब्देत्रिकरत्वादिम
त्त्वेन संयोगादिद्वयविभुविशेषगुणानामव्याप्यवृत्तित्वं साधर्म्यप्रदर्शनायैतत्रापि यथाश्रुते कर्मादावतिव्याप्तेरीश्वरीयज्ञाना
दावव्याप्तेश्चाव्याप्यवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यमित्यर्थः। मूले एकपृथक्त्वेत्यत्र एकशब्दस्त्वेत्येके इत्यत्रैकत्वमेकपृथक्त्वं
चेत्यर्थो बोध्यः। वैशेषिकगुणइत्यत्रोत्पन्न इत्यस्यान्वयः। मुक्तावल्यामुष्णस्पर्श इति। अवयवगतउष्णस्पर्श इत्यर्थः। उष्ण
स्पर्शस्य। अवयविगतोष्णस्पर्शस्य। एवमग्रेऽपि। कारणे कार्यैकार्थप्रत्यासत्त्या कार्ये कार्यैकार्थप्रत्यासत्त्या च गुरुत्वस्यासमवायिका
रणत्वमिति प्रदर्शनाय गुरुत्वपतनयोरित्युभयमुक्तं। एवमग्रेऽपि। संग्रहे। सत्त्वादिसंयोगविशेषे। भेर्याकाशसंयोगो
ऽसमवायीति प्रथमान्तसंयोगपदघटितपाठः। भावकार्यस्यासमवायिकारणजन्यत्वनियमात्। भेर्याकाशसंयोग
स्य शब्दं प्रत्यसमवायिकारणत्वमावश्यकमिति भावः। यद्यपि भेरीदण्डसंयोगस्य शब्दे निमित्तत्वं न तु तत्र तस्यासमवा
यिकारणत्वं भेर्याकाशसंयोगस्यासमवायिकारणत्वं न तु तत्र तस्य निमित्तत्वमित्येकव्यक्तेर्न द्विविधहेतुत्वं तथापि संयोग
जातीयस्य द्विविधहेतुत्वमस्त्येवेति भावः। एवमग्रेऽपि। मूले संयोगादिद्वयेत्यत्र यत्नान्तरं द्विविधेत्यस्य प्राक् परापरत्वद्वि
त्वादिद्विपृथक्त्वादिकं पुनरिति पाठः। क्वचित्पुस्तके प्रमादादायातः। परत्वादीनामकारणत्वेन द्विविधाकारणस्य तत्रा
भावात्। न च परत्वादीनामपि स्वध्वंसं स्वप्रत्यक्षं प्रति हेतुत्वात्कथमकारणत्वमिति वाच्यं। ध्वंसप्रत्यक्षातिरिक्तं प्रत्यकारण
त्वस्य विवक्षितत्वात्। विस्तरस्त्वन्यत्रानुसंधेयः। मुक्तावल्यामव्याप्यवृत्तिरित्यस्य दैशिकेत्यादिः। तेन रूपादौ नातिव्याप्तिः। नील
त्वादीत्यादिना रक्तत्वादिपरिग्रहः। अन्यथा। नीलादीनामेकव्यक्तित्वे। ननु लाघवादेव नीलारुणादिव्यक्तैक्यं सेत्स्यती
त्यत आह। लाघवमिति। प्रत्यक्षबाधितमिति। नीलो नष्टो रक्त उत्पन्न इति प्रत्यक्षबाधितइत्यर्थः। अन्यथेति। लाघवमात्रेण
नीलारुणादीनामैक्याभ्युपगम इत्यर्थः। उत्पन्नो घटो विनष्टो घट इत्यादिप्रतीतेर्न घटादेरैक्यमित्यत आह। उत्पादविनाशेऽपि। एत

८६

ना। ईदृशजातिसाधकप्रमाणेन। रसादिके। रसत्वादिके। आदिना गंधत्वादिपरिग्रहः। संयोगादावतिव्याप्तिमाशंक्याह।
चक्षुर्ग्राह्यमितीति। चक्षुर्ग्राह्यमित्यस्येत्यर्थः। तेन चक्षुरिति प्राक्प्रतीकधारणेपि न पौनरुक्त्यं। विशेषगुणत्वमिति। विल
क्षणगुणत्वमित्यर्थः। वैलक्षण्यं च चक्षुर्भिन्नाग्राह्यत्वं। न च तथापि प्रभाभित्तिसंयोगेऽतिव्याप्तिरिति वाच्यं। चक्षुर्मात्रग्रा
ह्यत्वस्य चक्षुर्मात्रग्राह्यसमवेतविशेषेऽतिव्याप्त्यापत्त्या चक्षुर्मात्रग्राह्यत्वस्य जातिविशेषणत्वस्वीकृत्य चक्षुर्मात्रग्रा
ह्यजातिमद्गुणत्वविवक्षणस्यावश्यकतया तेनैव प्रभाभित्तिसंयोगेऽतिव्याप्तिवारणादिति। प्रभात्वमादाय प्रभायाम
तिव्याप्तिवारणाय गुणपदं। अग्रेपि। स्पर्शलक्षणेप्येवं रीतिर्बोध्येत्यर्थः। अप्रत्यक्षत्वप्रसंगादिति। द्रव्यचाक्षुषं प्रति समवा
यसंबंधेनोद्भूतरूपस्य हेतुत्वादिति भावः। व्याप्यवृत्तिजातीयेति। व्याप्यवृत्तिवृत्तिजातिश्च सविषया वृत्तिर्बोध्या। तेन
व्याप्यवृत्तीश्वरज्ञानजातीयस्यास्मदादिज्ञानस्याव्याप्यवृत्तित्वेपि न क्षतिः। ननु वृक्षाणां बहुत्वेप्येकं वनमितिवत्
रूपसमुदायगतमेकत्वमादायैकं चित्रमित्यनुभवोपपत्तिरत आह। नानेति। गौरवादिति। चित्रमिति प्रतीतिविषय
ताया अनेकत्र कल्पने गौरवादित्यर्थः। ननु चित्ररूपाधिकरणे घटादौ स्वाश्रयसमवेतत्वसंबंधेन कपालनीलादीनां
कारणानां सत्त्वात्कथं तत्र न नीलाद्युत्पत्तिरित्यत आह। इत्थं चेति। उक्तलाघवेन चित्ररूपसिद्धौ चेत्यर्थः। प्रतिबंधकत्वक
ल्पनादिति। समवायेन नीलं प्रति स्वसमवायिसमवेतत्वसंबंधेन नीलातिरिक्तरूपत्वेन पीतरूपं प्रति पीतातिरिक्तरूप
त्वेन प्रतिबंधकत्वमिति रीत्या प्रतिबध्यप्रतिबंधकभावकल्पनात्। अन्यथा नानाजातीयकपालारब्धे घटे नीलकपाला
वच्छेदेन पीतोत्पादापत्तेर्गौरवादिति भावः। अत्र नव्याः। नानाजातीयरूपवत्कपालारब्धे घटे पीतकपालावच्छेदेन नी
लापत्तिवारणाय न तथा प्रतिबध्यप्रतिबंधकभावः कल्प्यते। किं त्ववच्छेदकतासंबंधेन नीलादिकं प्रति समवायेन

मु॰रि॰मु॰ ५

नीलादेः कारणत्वं कल्प्यते। चित्ररूपांगीकारे तु समवायेन नीलादिकं प्रति स्वाश्रयसमवेतत्वसंबंधेन नीलत्वादिना हेतु
त्वस्य सर्वैरुक्तप्रतिबंध्यप्रतिबंधकभावस्य च कल्पने गौरवमित्याहुस्तन्न। अवच्छेदकतासंबंधघटितो कार्यकार
णभावांगीकारे पृथगवच्छेदकतासंबंधेन कपालादौ जायमानस्य नीलादेः समवायेन घटादाविव गगनादावप्युत्पत्तिवा
रणाय समवायेन नीलादिकं प्रति स्वाश्रयसमवायसंबंधेन हेतुत्वस्य तवाप्यावश्यकत्वात्। किंच चित्रमिति प्रतीति
विषयतायाः अनेकत्र कल्पने गौरवं। एकत्र च कल्पने लाघवमिति लाघवानुरोधेनातिरिक्तचित्रसिद्धौ सर्वोक्तप्रतिब
ध्यप्रतिबंधकभावकल्पनागौरवस्य न दोषत्वं फलमुखत्वादित्यन्यत्र विस्तरः। स्पर्शो व्याख्यात इति। कोमलकठिनस्पर्शे तद्
स्पा॰ ७ वदवयवाभ्यामारब्धे घटादौ स्पर्शानंगीकारे घटे स्पार्शनत्वापत्तिरित्यादिरीत्या चित्रस्पर्शोऽप्यावश्यक इति भावः। अवयवि
नीरसत्वेऽपि क्षतेरभावादिति। न च चित्रो रस इति प्रतीतिविषयतया अतिरिक्तचित्ररससिद्धिरिति वाच्यं। तादृशप्रतीते
रवयवगतनानारसेनोपपत्तौ अतिरिक्तचित्ररसस्य प्रागभावध्वंसादिकल्पने गौरवात्। न चैवं द्व्यणुकरसस्यायो
ग्यतया मधुरादिरसप्रतीतिनियामकत्वासंभवेनास्तु द्व्यणुके मधुरादिरसश्चतुरणुकाद्यंत्यावयविपर्यंतं मधुरादिरसत्वे
मानाभावः। द्व्यणुके मधुररसेनैव मधुरादिप्रत्ययोपपत्तेरिति वाच्यं। समवायेन मधुररसं प्रति स्वसमवायिसमवेतत्वसंबंधे
न मधुररसस्य हेतुतया द्व्यणुकगतमधुररसान्यथानुपपत्त्या क्लृप्ततया तादृशकारणबलाच्चतुरणुकादौ मधुररसोत्पत्ते
र्दुर्वारत्वात्। ननु घटावयवेष्वपि पाकः नतु परमाणावत आह। नो हस्तेति। न संयोगगत इति। कठिनः संयोग इति प्रतीति
स्तु कठिनस्पर्शवद्द्रव्यप्रतियोगिकत्वमवगाहत इति भावः। रूपादेर्नोपाक इति। रूपादीनां परावृत्तिरित्यर्थः। पाकेन सं ५
भवतीति। रूपादिपरावृत्तिप्रयोजकस्तेजःसंयोगो न संभवतीत्यर्थः। रूपादिपरावृत्तिर्न संभवतीति यावत्। रूपादिनाशोत्पत्तिसा
क्षात्परासाधारणसर्वावयवावच्छेदेन तेजःसंयोगस्य हेतुतया अवयविनां वह्न्यवयवेषु सत्त्वे अवयविनि रूपादिनाशोन

संभवति तद्धेतोः सर्वावयवावच्छेदेन तेजःसंयोगस्याभावादिति भावः। न च विद्यमानेऽपि घटादौ सर्वावयवावच्छेदेन तेजःसंयोगः कुतो नोत्प
द्यत इति वाच्यं। तथा सति आरंभकसंयोगावच्छेदेनावयविनि तेजःसंयोगसत्त्वकाले तदवच्छेदेनावयवेष्वपि नोदनाभिघातयोर
न्यतरस्योत्पाद नियमेनावयवेषु विभागहेतुक्रियोत्पादेनारंभकसंयोगनाशाद् अवयविनाशापत्तेः। न चावयवेषु तेजोभि
घातानंतरं पंचमक्षण एव नाशस्वीकारेण तत्पूर्वमवयविनि रूपादिनाशोत्पादाभ्युपगमे बाधकाभाव इति वाच्यं। तत्र पूर्वावयवि
नाशावयव्यंतरोत्पादयोरावश्यकत्वात् पूर्वावयविनि रूपादिपरावृत्तिजनकविजातीयतेजःसंयोगस्य मानाभावेन तत्कल्पनात्।
अवयविरूपनाशे आश्रयनाशस्य हेतुत्वोत्पादाजन्यत्वस्य च यावत्तावच्छेदककल्पने गौरवाद् अवयविनाशं विना पाके ना
वयविरूपनाशासंभवात्। अवयविनीलादौ अवयवनीलादेर्हेतुतायां व्यभिचारापत्त्या पाकेन च यौवनि नीलाद्युत्पादासंभवा
त्तस्मिन्मानः। अवयविषु न इष्टापत्तिः। घटारंभककपालादिपरमाणुपर्यंतेष्वग्निसंयोगेन सर्वेषां तेषां घटादिद्व्यणुकपर्यंतं नाशसं
भवादिति भावः। स्वतंत्रेषु कार्यद्रव्यध्वंसविशिष्टेषु। ननु तत्र संस्थानभेदादिः कथं न प्रतीयत इत्यत आह। तेऽत्र समिति। व्यू
हः संस्थानं वैशद्यमुत्पत्तिः प्रक्रिया। द्व्यणुकरूपो नोऽद्योतादि उत्पत्तिनिरूपणं क्रियत इति शेषः। विभागजविभागानंगीकारे इ
ति। कारणाकारणविभागात् कार्याकार्यविभागवत्। कारणमात्रविभागात् कारणाकारणविभागानंगीकार इत्यर्थः। द्व्यारंभकसं
योगप्रतिद्वंद्विविभागजनकक्रियायास्तदनारंभकसंयोगप्रतिद्वंद्विविभागजनकत्वनियमे मानाभावादिति भावः। अत्र वि
भागग्रंथे वक्ष्यमाणविकल्पसकलप्रसंगाभियाउक्त नियमांगीकार आवश्यकः। एवं च द्व्यणुकारंभकपरमाणुक्रिया
या द्व्यणुकारंभकसंयोगप्रतिद्वंद्विविभागजनितस्तत्रतया परमाणुक्रियया तत्परमाण्वाकाशादिसंयोगप्रतिद्वंद्विविभागोत्प
त्तिर्न संभवति। न च तन्नाशात् परमाण्वाकाशविभागः स्यादिति वाच्यं। तथा सति नाशाकविभागाभावेन परमाण्वाकाश
संयोगस्य नित्यत्वापत्तेः। एवं च परमाण्वाकाशसंयोगरूपस्य पूर्वदेशसंयोगस्य प्रतिबंधकस्य सत्त्वात् परमाणोरुत्तरदेशसं
योगानुत्पत्तौ परमाणुगतक्रियानाशानुत्पत्तेः स्यात् तस्मात् परमाण्वाकाशविभागजनकः परमाणोर्विभागो वाच्य इत्यभिप्राय

यानात्। तदंगीकारेस्विति। अनयोः पक्षयोः प्रथमपक्षएवसम्यक्। यदवच्छेदेनकमलारंभकसंयोगस्तदवच्छेदेन क्रियानुसरा
चनविकसत्कमलभंगप्रसंगइति ध्येयं। तत्रैव विभागजनकत्वे। कर्मत्वे। कर्मलक्षणस्यातिव्याप्तिः संयोगविभागयोरन
पेक्षं कारणं कर्मेति सूत्रस्य संयोगस्य विभागस्य वाऽनपेक्षं कारणं कर्मेति लक्षणमित्येतात्पर्यमित्यभिमानेन दूषितोयलक्षणस्य
तत्रातिव्याप्त्यभिधानमिदं। वस्तुतस्तु। संयोगविभागयोरनपेक्षं कारणं कर्मेति सूत्रं। तत्र संयोगस्यानपेक्षं कारणमित्युक्ते
कारणाकारणसंयोगेऽतिव्याप्तिस्तस्यैव कार्यसंयोगे किंचिदनपेक्ष्य कारणत्वात्। एवं विभागस्यानपेक्षमित्युक्ते कारणाकार
णविभागेऽतिव्याप्तिरत उक्तं संयोगविभागयोरिति। अनपेक्षत्वं च स्वोत्तरोत्पन्नभावानपेक्षत्वं। अन्यथा कर्मणोपि संयोग
जनने द्रव्यस्य पूर्वसंयोगनाशस्य चापेक्षणादसंभवापत्तेः। विभागसमवायिकारणत्वे सति संयोगहेतुत्वं वा तत्र। पूर्वदेश
विभागस्तु नोत्तरदेशसंयोगकारणं व्यवहाराभावेनान्यथासिद्धेः। संयोगस्य विभागं प्रति कारणत्वाभावादेव नासम
वायिकारणत्वमिति तत्रातिव्याप्तिः। इत्थं च कारणमात्र विभागस्य पूर्वसंयोगनाशे द्रव्यनाशं वाऽनपेक्ष्य कारणत्वाकारण
विभागजनकत्वेपि संयोगविभागोभयजनकत्वाभावादिति ध्येयं। द्रव्यारंभकसंयोगनाशविशिष्टं कालमपेक्ष्येति। द्रव्या
रंभकसंयोगनाशो यस्याधिकरणक्षणोत्तरक्षणइत्यर्थः। कारणतातु द्रव्यारंभकसंयोगनाशनैवैव लाघवादिति ध्येयं। ए
वमग्रेपि। नवदशैकादशक्षणाः क्रियाः क्रमेणोपपादयति। तथाहीत्यादिना। परमाणौ कर्म। द्व्यणुकारंभकपरमाण्वोर्मध्ये
एकस्मिन्परमाणौ कर्म। परमाण्वंतरेण द्व्यणुकारंभकपरमाण्वंतरेण। आरंभकेति। द्व्यणुकारंभकेत्यर्थः। ततः परमाणौ स्या
मादिनाशइति। परमाणुगतरूपनाशं प्रति द्व्यणुकात्मकद्रव्यस्य प्रतिबंधकतया तत्सत्वे श्यामनाशासंभवादिति भावः। द्व्या
रंभकेति। द्व्यणुकारंभकेत्यर्थः। तद्विनाशमंतरेणेति। द्व्यणुकनाशेन सत्त्वे क्षणोत्पत्तिके तेरसंयोगे न श्यामनाशक्षण एव पूर्व
क्रियानाशइति भावः। परमाणौ क्रियांतराभावादिति। तस्मिन्परमाणौ क्रियांतराभावादित्यर्थः। अत्र हेतुमाह। कर्मवतीति
कर्मवतिकर्मांतरानुत्पत्तेनकर्मासत्त्वोकर्मणः प्रतिबंधकत्वकल्पनादिति भावः। गुणोत्पत्तिमंतरेण कर्मानुत्पत्तेहेतुमाह। निर्गुणे

मु.प. ७८

गु.

कारण

७८

ति। कारणमात्रविभागस्य कारणाकारणविभागजनकत्वाभावपक्ष एव परमाण्वंतरे कर्मचिंतनं विनैव गंधांतरे उत्पत्तिक्षणः प्रक्रि-
याः। सा च निमेषे द्व्यणुके सानुगुणक्रियोत्पत्तौ बाधकाभावेन रक्तोत्पत्तिक्षण एव द्व्यणुके पाकानुगुणक्रियोत्पत्तिः संभवतीत्यभिप्रा-
येण समर्थनीया। विभागेन विभागजननमिति। कारणमात्रविभागेन कारणाकारणविभागजनने सतीत्यर्थः। विभागजविभागादिति आ-
रंभकसंयोगनाशस्य तृतीयक्षण एवोत्पन्नत्वात् चतुर्थक्षणे परमाण्वाकाशविभागः संभवतीति भावः। ततः श्यामनाश
पूर्वसंयोगनाशाविति। परमाणौ श्यामनाशपरमाण्वाकाशसंयोगनाशावित्यर्थः। परमाणुश्यामनाशं प्रति द्व्यणुकनाशस्य
हेतुत्वात्तत्पूर्वं परमाणुश्यामनाशासंभवादिति भावः। रक्तोत्पत्त्युत्तरसंयोगाविति उत्तरसंयोगं विना पूर्वकर्मणो नाशासंभ-
वेन द्व्यणुकारंभानुगुणक्रियानुत्पत्तेरिति भावः। एवमग्रेऽपि। अत्र य एवाग्निसंयोगो द्व्यणुकनाशकः स एव श्यामनाशरक्तो-
त्पादने हेतुरित्येके। तन्न मतं। पुनरन्यंतरसंयोगादिति भाष्यविरुद्धं नादरणीयमित्यभिप्रायात्। मध्यमशब्दवदिति।
एकस्मादिति। द्व्यणुकनाशकादेकस्मादित्यर्थः। यथा मध्यमशब्दात्पूर्वशब्दनाशोत्तरशब्दोत्पादौ भवतस्तथैकस्माद्द्व्यणु-
कनाशकादग्निसंयोगात् श्यामनाशरक्तोत्पादौ न भवत इति व्यतिरेकदृष्टांतः। तावत्कालमिति। श्यामनाशोत्पत्त्यव्यवहित-
पूर्वक्षणपर्यंतमित्यर्थः। अग्नेः। द्व्यणुकनाशाग्निसंयोगस्य। एवमग्रेऽपि। अस्थिरत्वादिति। यदा परमाणावग्निसंयोगाद्-
द्व्यणुकासमवायिकारणसंयोगविनाशकं परमाणौ कर्म। तदैव नोदनाभिघातान्यतरात्मकस्याग्निपरमाणुसंयोगस्य ज-
नकं यदग्निकर्म तस्य विनाशः कर्मणः स्वजन्यसंयोगविनाश्यत्वात्। तदुत्तरक्षणे पुनरग्नौ कर्म कर्मकारणीभूतवेगाभि-
घातादेः समानाधिकरणकर्मध्वंसरूपसहकारिणश्च सत्त्वात्। ततो विभागः। ततो द्व्यणुकनाशसमकालमग्निपरमाणुसं-
योगस्य नाशेन श्यामरूपनाशोत्पत्त्यव्यवहितपूर्वक्षणपर्यंतं तस्याप्यस्थिरत्वादिति भावः। ननु मास्तु द्व्यणुकनाशकाग्निसं-
योगस्य परमाणुश्यामनाशकत्वं रक्तोत्पादकत्वं च परं तु द्व्यणुकनाशसमकालोत्पन्नाग्न्यंतरसंयोगस्य परमाणुश्यामनाश

पु:८८

मु.दि.पु ८९

कत्वं रक्तोत्पादकत्वं चास्तु। न च श्यामनाशकतावच्छेदकरक्तोत्पादकतावच्छेदकजात्योः सांकर्यापत्तिरिति वाच्यं उत्पादकतावच्छेदकजातेर्नाश
कतावच्छेदकजातिव्याप्यत्वोपगमादत आह। केचेति। नाशकस्यैव यद्युत्पादकत्वमिति एवकारेण नाशकतावच्छेदकवैजात्यस्य रूपस्याप्युत्प
ादकतावच्छेदके लीयते। तथा च यद्युत्पादकतावच्छेदकं नाशकतावच्छेदकव्याप्यं तदित्यर्थः। नष्टे रूपादौ रूपपरंपरायां नष्टायां। अग्निनाशे॥
चरमाग्निसंयोगनाशे। परमाणौ पाकेन रूपोत्पत्तिस्थले प्रथमाग्निसंयोगादिना रूपोत्पत्तिस्तेनैव रूपनाशः। पुनरग्निसंयोगानंतरं पुनारू
पोत्पत्तिसंभवेपि चरमाग्निसंयोगोत्तरं तेन रूपोत्पादे तद्रूपस्य तेनैवाग्निसंयोगेन नाशासंभवात्तदग्निसंयोगस्यापि नाशे रूपांतरोत्पादासं
नृ८ भवेन निरूपत्वं परमाणोस्यादित्यर्थः। न च चरमाग्निसंयोगविनश्यदवस्थैनैव रूपोत्पत्तिः तदुत्तरक्षणे च तद्रूपनाशः पूर्वक्षणेऽग्निसंयोगा
भावादिति वाच्यं असमवायिकारणस्य कार्यसहभावेनैव हेतुताया न्यायवैशेषिकसिद्धांतितया विनश्यदवस्थेन चरमाग्निसंयोगेन रू
पोत्पादासंभवादिति। परमाणुरिति वैशेषिकमताभिप्रायेण न्यायनये सर्वोक्तरीत्या घटादेरपि नीलरूपत्वप्रसंगो बोध्यः। ननु रक्तोत्पादकता
वच्छेदकवैजात्यं श्यामनाशकतावच्छेदकवैजात्यव्याप्यमिति न भ्रमः परंतु वैजात्ययोरभेदे तेन न सांकर्यमत आह उत्पादकत्वादिति चेन्ना
शकउत्पादक इति योजना। नाशकतावच्छेदकमेव यद्युत्पादकतावच्छेदकं तदित्यर्थः। रक्त तरतानस्यादिति। अयं भावः। रूपनाशकतावच्छेदकवि
लक्षणाग्निसंयोगत्वं तदेव यद्युत्पादकतावच्छेदकं तदा कार्यतावच्छेदकमपि सामान्यतः पृथिवीपरमाणुरूपत्वं तया वाच्यं तथा सति क्वचिदुक्त
तरतापि क्वचिद्रक्ततमता परमाणौ न स्यात्। कार्यवैचित्र्यस्य कारणतावच्छेदकभेदाधीनत्वादिति। सिंदूरादौ रक्ततारतम्यस्यानुभविकतया
तत्परमाणुषु तस्यावश्यंभावादिति भावः। इदं च सर्वरूपनाशकाग्निसंयोगमात्रस्य तद्रूपहेतुत्वमिति अभिप्रायेण पुनरन्यस्मादग्निसंयो
विशेष४ गादिति भाष्यानुरोधेनोक्तं। वस्तुतो रक्ततारतम्यस्य सर्वरूपध्वंसरूपत्वाभ्युपगमाद्व्यणुकनाशाग्निसंयोगापेक्षया अन्यपरत्वादुत्पादकविनाशक
योरग्निसंयोगयोरेकत्वानेकत्वे अनियम इति ध्येयम्। परमाण्वंतरेति। द्व्यणुकनाशावसरमाणुभिन्न द्व्यणुकांतरारंभक परमाणावित्यर्थः। कर्मचि
तनादिति। द्व्यणुकारंभकसंयोगनाशाद्युत्पत्तिक्षणे द्व्यणुकांतरारंभककर्मचिंतनादित्यर्थः। पंचमादीत्यादिना षष्ठसप्तमाष्टमक्षणानां परिग्र
हः। इत्यस्य क्षणा इति। ननु यत्र एकस्मिन्परमाणावग्निसंयोगसमकालं परमाण्वंतरे कर्मोत्पत्तिस्तदुत्तरक्षणेषु क्रमेण कर्मक्रियाविभागध्वंस

चो४

पु४ ग्रा

८९

x एवंयत्रैकस्मिन्परमाणौकर्मोत्पत्तिसमकालंपरमाण्वंतरेकर्मोत्पत्तिस्तत्रत्रिक्षणा।१

न्यत्रविस्तरः ५

योगनाशाद्व्यणुकनाशः।अपरत्रविभागपूर्वसंयोगनाशोत्तरसंयोगोत्पत्तिद्व्यणुकोत्पत्तिरूपोत्पत्तयस्तत्रद्विक्षणाः।एवंयत्रैकस्मिन्परमाणौविभागसमकालंपरमाण्वंतरेकर्मोत्पत्तिस्तत्रचतुःक्षणापिसंभवतिप्रक्रियेतिचेन्न।द्व्यणुकनाशमंतरेणपरमाणौश्यामादिनिवृत्तिस्तामंतरेणचरक्तोत्पत्तिर्नसंभवतिइत्युक्तप्रायं।इत्थंचद्व्यणुकनाशक्षणेपरमाणौश्यामनाशक्षणेरक्तोत्पत्तिक्षणेवाद्व्यणुकांतरोत्पत्तौद्वित्रिचतुःक्षणप्रक्रियावाच्या।नचैतेषुक्षणेषुद्व्यणुकांतरोत्पत्तिः संभवति।तथासतितत्पूर्वक्षणेषुपरमाणोररक्तत्वेनतदारब्धद्व्यणुकस्याप्यरक्तत्वप्रसंगात्।दिसे।परमाण्वंतररक्तेनैवद्व्यणुकरक्तोत्पादसंभवाच्छ्यामनाशक्षणेद्व्यणुकोत्पत्तौक्षतिविरहेणत्रिक्षणापिसंभवति।रूपाद्यंतरसहकृतस्यैवरूपादेरूपाद्युत्पादकत्वांगीकारेत्रिक्षणप्रक्रियायाअसंभवेपिचतुःक्षणासंभवस्यैवरक्तोत्पत्तिक्षणेद्व्यणुकोत्पत्त्यातदुत्तरक्षणेतत्ररक्तोत्पादसंभवादित्युच्यते।खलमतंनादरणीयम्।रूपादिमतएवरूपादिमद्द्रव्यारंभकत्वमितिसिद्धांतविरोधात्।द्विक्षणप्रक्रियातुकस्यापिमतेनसंभवत्येवपूर्वद्व्यणुकस्यप्रतिबंधकतयाद्व्यणुकनाशक्षणेद्व्यणुकांतरोत्पादासंभवादितिध्येयम्।अवयवीन्यपीत्यपिनापरमाणुपरिग्रहः।तेषां।नैय्यायिकानां।अयंवक्ष्यमाणः।अवष्टब्धेष्वपीति।अवयविनाऽवष्टब्धेष्वपीत्यपीत्यर्थः।पाकः।रूपादिपरावृत्तिः।नोवरुध्यतइति।साक्षात्परंपरासाधारणसकलावयवावच्छेदेनतेजःसंयोगस्यरूपादिनाशहेतुत्वेमानाभावेनआरंभकसंयोगावच्छेदेनविजातीयतेजःसंयोगादेवरूपादिनाशसंभवेप्यारंभकसंयोगावच्छेदनतेजःसंयोगस्याभिघातादेस्तदानींतत्रसद्भावेमानाभावेनपूर्वोक्तरीत्यावयविनाशस्याप्रसक्तेः।सर्वावयवावच्छेदेनतेजःसंयोगस्यरूपादिनाशकत्वेपिनाशकतावच्छेदकवैजात्यस्यनोदनाभिघातत्वाविरुद्धस्यैवांगीकरणीयतयानोदनाभिघातभिन्नतेजःसंयोगाद्रूपादिनाशेपितेनावयविनाशस्यासंभवात्।अस्तुवारूपादिनाशकतावच्छेदकवैजात्यस्यनोदनाभिघातत्वव्याप्यत्वंतथाप्यवयव्यभिघातादिकालेऽवयवाभिघातोत्पादनियमेमानाभावः।आस्तांवातथानियमस्तथाप्यवयवाभिघातादेर्नियमतोद्रव्यारंभकसंयोगविरोधिविभागहेतुक्रिया

भट

नेध

त्वा

गु.टी.पु.
१०

च२ तर्कं५

जनकत्वे [illegible] मानाभावएव। विभागंप्रतिक्रियायास्तथात्वे नैवहेतुतयातत्तत्क्रियाधीनविभागं प्रतितत्तत्पूर्वदेशस्य विशिष्यहेतु तयातेऽन्यक्रियायास्तादृशविभागहेतुत्वासिद्धेरितिभावः। यदप्युक्तं वैशेषिके खवयवे रूपं स्वसवयवरूपहेतुतायांव्यभिचाराप सानावयविनिपाकेनरूपोत्पादइति। तदपिन। अवयवरूपादेर्विजातीयरूपादिकं प्रत्येवहेतुतयाव्यभिचाराप्रसक्तेः। एतेनावयवि रूपनाशो आश्रयनाशहेतुतायांव्यभिचारापत्यापाके नावयविरूपनाशसंभवइत्यपिपरास्तम्। आश्रयनाशजन्यतावच्छेदकरू टीवैजात्यस्याभिवेशनीयत्वादिति। अवयविनिपाकानभ्युपगमे साधकाभावमुक्त्वाबाधकमप्याह। अनंतेति। इत्थंच [illegible]। अवयवि नाशांगीकारेच। प्रत्यभिज्ञासंगच्छतइति। सर्वावयविनाशोत्पत्तरोत्पन्नावयविनिपूर्वावयविनोभेदाभावेनाभेदावगाहिप्रत्यभि ज्ञानस्यादितिभावः। क्वाआदावतिव्याप्तिमाशंक्याह। असाधारणमिति। वस्तुतोगणनसंख्यात्वं तत्प्रकारकोव्यवहारस्तासत्प्र रकं प्रमासकं ज्ञानंतद्धेतुस्तद्विषयइत्यर्थान्नकालादावतिव्याप्तिः। तत्रापिसंख्यात्वंजातिरेवलक्षणमितरं संख्यात्वज्ञातोप्रम णतयोक्तं एवमग्रेपीतिध्येयम्। द्वित्वादयइति। एकत्वान्यसंख्यामात्रमपेक्षाबुद्धिरूपनिमित्तकारणजन्यमित्यर्थः। असमवा यिकारणंतुद्वित्वंप्रतिसमवायिगतयावदेकत्वमितिध्येयम्। नन्वयोग्यद्वित्वादवपेक्षाबुद्धेर्हेतुत्वेप्ययोग्यद्वित्वादौतद्धेतुत्वेमानाभा वइतिचेन्न। योग्यद्वित्वादेरपेक्षाबुद्धिजन्यत्वेप्यतीन्द्रियद्वित्वादावप्यनेकसंख्यात्वादिनोऽपेक्षाबुद्धेर्द्वित्वहेतुत्वेकथमविरक क्रमेणयावदपेक्षाबुद्धिसत्वंनद्वित्वाद्युत्पत्तिः। अत्रकेचित्। अपेक्षाबुद्धेरुत्पत्तिसंबंधेनहेतुत्वान्नयावदपेक्षाबुद्धिसत्वंद्वित्वा द्युत्पत्तिरितितन्न। धारावाहिकापेक्षाबुद्धिभिः सर्वत्रधारावाहिकद्वित्वाद्युत्पत्तेर्दुर्वारत्वात्प्रागवदपेक्षाबुद्ध्याधारावाहिकद्वित्वा द्युत्पत्तेर्दुर्वारत्वाच्च तद्बुद्धेर्नैसत्वेनोत्पत्तिसंबंधेनतद्धेतुत्वस्यदुर्वचत्वात्। वस्तुतस्तु। तत्तद्रूपीयापेक्षाबुद्धिजन्यानेकसंख्यात्वा वच्छिन्नंप्रतितत्तद्रूपीयापेक्षाबुद्धिजन्यानेकसंख्यादेः प्रतिबंधकत्वाभ्युपगमान्नयावदपेक्षाबुद्धिसत्वंद्वित्वाद्युत्पत्तिरिति। प्रसक्तंघटादाविति। तथाचानेकाश्रयपर्याप्तेतिमत्वलमसंगतमितिभावः। नन्वेकत्वस्यन्यूनरत्तितयाद्वित्वाधारतानवच्छेदकत्वान्न

गु३ तदनुमानात् अथ६
तर्क३

नं६ गु० १९

178

दे२ दे२

तथाप्रत्ययइत्यतआह।एकोनद्वावितीति।एकत्वावच्छेदेनद्वित्वप्रकारकत्वाभावादेकत्वादेर्न्नद्वयवृत्तितयाद्वित्व वच्छेदान
वच्छेदकत्वादिति भावः।अनेकाश्रयइति उभयाद्याश्रयइत्यर्थः।तथाच ताद्दशप्रतीतेर्न द्वित्वतद्भेदाभावरतावच्छेदकत्व
मेकत्वे विषयः।किंतु पर्याप्तिसंबंधेन द्वित्वतद्भेदावाएकत्वावच्छिन्नप्रकारः।इत्थंच पर्याप्तिसंबंधेन द्वित्वस्य प्रत्येकम
भावादेकोद्वाविति प्रत्ययस्यैकोनद्वाविति प्रत्ययस्य चोपपत्तिरिति भावः।अत्र बहवः।उभयादेः प्रत्येकानतिरिक्ततया प्रत्येकम
पि पर्याप्तिसंबंधेन द्वित्वसमवसेवृत्तिपर्याप्त्यंगीकारेप्येकोद्वाविति प्रत्ययस्यैकोनद्वाविति प्रत्ययस्य च कथमुपपत्तिः।यदि चैकोनद्वा
विति प्रतीतिबलात् द्वित्वतद्भेदावच्छेदकत्वस्वरूपसंबंधविशेषरूपमेकत्वेस्वीक्रियते।नतु द्वित्वावच्छेदकत्वमेकोद्वाविति
प्रत्ययादितिविभाव्यते तदा समवायपक्षेपितुल्यमिति पर्याप्त्यंगीकारोनिरर्थकइति चेदत्राहुः।आकाशाविति वाक्यस्यप्र
माण्यापत्त्या पर्याप्त्यंगीकार आवश्यकः।नच समवायेनैव पर्याप्तिसंबंधे नापि द्वित्वस्याकाशे सत्वात्पर्याप्त्यंगीकारेपि तद्वाक्य
प्रामाण्यदुर्वारमिति वाच्यं।उद्देश्यतावच्छेदक व्याप्यत्वविशिष्टपर्याप्तेरेव द्वित्वसंबंधत्वोपगमात्।आकाशत्वव्याप्यद्वित्व
पर्याप्तेरप्रसिद्धत्वात् द्वित्वपर्याप्तेर्द्वित्वस्वरूपतया तस्य घटादावपि सत्वात्।नचोद्देश्यतावच्छेदकव्याप्यत्वविशिष्टसमवायस्य
द्वित्वसंसर्गतास्वीकारात्तथाविति प्रयोगवारणसंभवादलं पर्याप्तेरिति वाच्यं।तथा सति घटाविति प्रयोगस्य प्रामाण्यानुपप
त्तेः।समवायस्यैकत्वेन घटत्वव्याप्यसमवायस्याप्रसिद्धेरित्यन्यत्र विस्तरः।अपेक्षाबुद्धिनाशात्तेषां नाशइति मूलस्यतृती त्र४
यक्षणेऽपेक्षाबुद्धिनाशाच्चतुर्थक्षणे द्वित्वादीनां नाशइति नार्थः।परंतु चतुर्थक्षणेऽपेक्षाबुद्धिनाशसमक्षणइत्यर्थइति ज्ञाप
नाय वैशेषिकप्रक्रियां प्रदर्शयति।प्रथममित्यादिना।द्वित्वविशिष्टप्रत्यक्षं।द्वित्वविशिष्टलौकिकप्रत्यक्षं।अन्यथाऽपेक्षाबु
द्धेः क्षणमात्रावस्थायित्वे।द्वित्वस्यैवनाशइति।द्वित्वनाशएवेत्यर्थः।ननु तदानीं द्वित्वाभावेपि तत्तत्क्षणे द्वित्वसत्वान्न द्वित्व

त्ने२ त्ने२

मु॰ दि॰ गु॰
९१

प्रत्यक्षानुपपत्तिरत आह। विद्यमानस्यैवेति। संबद्धं वर्तमानं च गृह्यते चक्षुरादिनेत्यनुरोधात्। लौकिकप्रत्यक्षं प्रति द्वित्वादेर्वि
षयस्य कार्यसहभावेन हेतुत्वादिति भावः। ननु योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्तिविशेषगुणत्वेन हेतुतया अपेक्षा
बुद्ध्युत्तरक्षणोत्पन्नस्मृत्या संस्कारेण वा अपेक्षाबुद्धिनाशः केन वारणीय इत्याशंकामुपसंहारव्याजेन परिहरति तस्मादिति।
द्वित्वप्रत्यक्षादिकमिति। द्वित्वनिर्विकल्पकमित्यर्थः। आदिना त्रित्वादिरूपस्य प्रत्यक्षपरिग्रहः। योग्यविभुविशेषगुणत्वस्य स्व
त्वस्य चाननुगतस्याभावेन स्वोत्तरोत्पन्नगुणत्वस्यानुगतस्याभावात् तद्व्यक्तित्वेनैव नाश्यनाशकभावस्य वाच्यतया द्वित्व
त्वविशिष्टप्रत्यक्षरूपकार्यानुरोधेन द्वित्वनिर्विकल्पकस्यैव तद्व्यक्तित्वेनापेक्षाबुद्धिनाशकत्वं कल्प्यते। न तु द्वितीयक्षणो
त्पन्नस्मरणादेरिति भावः। ननु द्वित्वत्वविशिष्टद्वित्वप्रत्यक्षमुपनीतभानात्मकमेवास्तु अलं तदुपपत्तये त्रिक्षणाव
स्थायित्वकल्पनेनापेक्षाबुद्धेः। न च द्वित्वत्वांशे उपनीतभानसंभवेऽपि द्वित्वांशे उपनीतभानं उपनीतविशेषणतयैवे
ति नियमादिति वाच्यं। द्वित्वत्वविशिष्टद्वित्वप्रत्यक्षे जायमाने हि द्वित्वांशे द्वित्वप्रकारकमेव भवति इदं द्वयमित्याकारकं। नि
र्विकल्पकोत्तरक्षणे इदं द्वयमित्याकारकं द्वित्वत्वविशिष्टद्वित्वप्रकारकप्रत्यक्षं न संभवतीति तत्सर्वं विशेषणतावच्छेदकद्वित्व
त्वप्रकारकद्वित्वज्ञानासंभवादिति तु न। विशेष्यविशेषणभिन्नतिरीत्यैव इदं द्वयमित्याकारकप्रत्यक्षसंभवादिति चेन्न। निर्वि
कल्पकस्याप्रत्यासन्नतया इदं द्वयमित्युपनीतभानासंभवात् तस्यापूनीतभानरूपत्वे तदुत्तरं द्वित्वं साक्षात्करोमीत्य
नुव्यवसायानुपपत्तेश्च तस्मात् त्रिक्षणावस्थायित्वमपेक्षाबुद्धेरिति वैशेषिकाणामाशयः। न च यावत् उत्पत्त्यमा
नद्वित्वस्य द्वित्वत्वसामान्यलक्षणया सर्वमनुभवात् द्वित्वोत्पत्तिसमय एव द्वित्वत्वप्रकारकमुत्पद्यमानद्वित्वस्मरणं तेन
तदुत्तरक्षणे इदानीं इदं द्वयमिति विशिष्टवैशिष्ट्यावगाहि लौकिकप्रत्यक्षं न संभवादिति [illegible] त्रिक्षणावस्था
यित्वमपेक्षाबुद्धेरिति

९१

द्वि२

यि सेन। अन्यथा सुखाद्युत्पादद्वितीयक्षणे सुखत्वनिर्विकल्पकमनंतरक्षणे च सुखनाशात् सुखवानिति ज्ञानस्य प्रत्यक्षं न संभव
तीति सुखत्वादिप्रकारकविशिष्टज्ञानावस्थानप्रसंगादिति भावः। नन्वपेक्षाबुद्धेर्द्वित्वोत्पादकत्वे चैत्रीयापेक्षाबुद्धिजन्यत्वस्यापेक्षा
बुद्धिमन्यनमैत्रेणग्रहणापत्तिः। सन्निकर्षादिघटितसामग्र्याः सत्वात् तद्वारणाय विषयतासंबंधेन तत्पुरुषीयप्रत्यक्षे तद्भि
न्नपुरुषीयापेक्षाबुद्धिजन्यद्वित्वादेस्तादात्म्येन प्रतिबंधकत्वकल्पने च गौरवमत आह। अत एवेति। पूर्वोक्तयुक्त्या अपेक्षा
बुद्धेर्द्वित्वोत्पादकत्वस्यावश्यकत्वादेव। तेनैव गृह्यत इति कल्प्यत इति। तद्भिन्नेन न गृह्यत इति कल्प्यत इत्यर्थः। तथा चान्य
थानुपपत्त्या एवोक्तप्रतिबध्यप्रतिबंधकभावकल्पनान्न गौरवं न दोषायेति भावः। ननु कालांतरे द्वित्वप्रत्यक्षवारणाय द्वित्वप्रत्य
क्षं प्रत्यपेक्षाबुद्धेर्हेतुत्वमस्तु न तु द्वित्वे प्रतीत्याशंकते। नन्वेति। लाघवेनेति। द्वित्वप्रत्यक्षं प्रत्यपेक्षाया द्वित्वस्यैव कार्यताव
च्छेदकत्वे लघुत्वादिति भावः। ननु द्वित्वप्रत्यक्षनिष्ठलौकिकविषयितया द्वित्वस्यैव कार्यतावच्छेदककुक्षिनिवेशे गौरवं। नन्वेतर
णाप्यपेक्षाबुद्धेर्द्वित्वप्रत्यक्षापत्तिरेतावतापि वारितैवेति वाच्यं। द्वित्वावच्छिन्नविषयकद्वित्वप्रत्यक्षस्यालौकिकतया व्यापारीभूतद्वि
त्वावच्छिन्नजनकसामग्रीविरहादेव तद्वारणादिति चेन्न उत्पादकसामग्र्या यैज्ञकत्वे गौरवापत्तेर्घटाद्युत्पादकसामग्र्या
अपि घटादिद्वयजनकत्वापत्त्या सत्कार्यवादापत्तेरिति। नन्वपेक्षाबुद्धेर्द्वित्वोत्पादकत्वं न संभवति त्र्यणुकस्यास्मदीयप्रत्यक्षागोच
रत्वात् तदपेक्षाबुद्ध्यसंभवेन तत्र त्रित्वानुत्पत्त्यापत्तेः। नन्वेतदापत्तिः। भावकार्यस्य समवायिकारणजन्यत्वनियमेन त्र्यणुक
गतं त्रित्वं विना त्र्यणुकपरिमाणानुत्पत्तेः। परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमेन द्व्यणुकपरिमाण
स्यासमवायिकारणत्वासंभवादत आह। अतीन्द्रियद्व्यणुकादाविति। आदिना परमाणुपरिग्रहः। सर्गादौ योगिनामभावादा
ह। ईश्वरीयेति। नन्वीश्वरीयापेक्षाबुद्धेर्द्वित्वोत्पादकत्वेन द्वित्वस्य नित्यत्वप्रसंगः ईश्वरीयापेक्षाबुद्धेर्नित्यत्वेन तन्नाशनाश्य
त्वस्य तादृशद्वित्वे वक्तुमशक्यत्वादिति वाच्यं। ततद्वित्वस्येश्वरीयापेक्षाबुद्धिसहकारिविशेषस्य क्षणविशेषस्य नाशादेव नाशो

द्वित्व३

५८

(181)

गु.पु.१८.
९२

सर्वत्र द्वित्वोत्पत्तेः सर्वत्र द्वित्वोत्पादापत्तेः। अपेक्षा
पपत्तेः। क्षणविशेषस्येश्वरीयापेक्षाबुद्धिसहकारित्वात् नैवं गौरवे सर्गाद्यकालीन परमाणुद्वित्वोत्पत्तेः सर्वत्र द्वित्वोत्पादापत्तेः। अपेक्षा
बुद्धिनाशाव्यवहितक्षणस्याश्रयनाशोपलक्षकत्ववदीश्वरीयापेक्षाबुद्धिसहकारिविशेषक्षणविशेषोपलक्षकत्वस्वीकाराच्च
न तत्प्रतिरोधः। एतेन घटादुत्पत्तिद्वितीयक्षणे भगवदपेक्षाबुध्यात्मद्वित्वादिकं अन्यत इति परास्तम्। तदानीं सहकारिक्षण
स्याभावेन भगवदपेक्षाबुध्या द्वित्वादरजननात्। तदानीं तत्र द्वित्वोत्पादमानाभावाच्च। एतदस्वरसादुक्तमेवान्तरेति।
इयतः इत्याकांक्षातः। ननु एकत्वांशे निर्धर्मितावच्छेदमेकत्वज्ञानात् द्वित्वाद्युत्पाद ... निरतो व्याचष्टे। अयमेकइति।
तत्तद्व्यक्तिमात्रनिष्ठं लाघवाधिन्न विशेष्यतानिरूपितैकत्वप्रकारताशालिनी बुद्धिरपेक्षाबुद्धिपदार्थ इति नोक्त
दोष इति भावः। अन्विषस्तके इदं तु बोध्यमित्याद्यवधेयमिसंतः पाठः सच्चैव व्याख्येयः। यत्रानियतैकत्वेति। एकत्व
विशेषक संख्यासनियतात्रित्वादिप्रकारकं ज्ञानमन्यकालीन मनेकैकत्वज्ञानमित्यर्थः। यदा एकत्वांशे निर्धर्मि
तावच्छेदकमेकत्वसंख्यायोगिनः प्रकारकं ज्ञानमित्यर्थः। सेनावनादाविति। तत्रापि यत्रैकत्वज्ञानाभावात्तस्यैव सह
स्त्रत्वादिसंख्योत्पादकत्वादिति भावः। उक्तेऽपीति। अनियतैकत्वज्ञानस्यापि त्रित्वाद्युत्पादकत्वादिति भावः। दोषात्। नि
यतानेकैकत्वज्ञानाभावात्। अनियतानेकैकत्वज्ञानस्य त्रित्वोत्पत्तिकारणापि त्रित्वांशे त्रित्वस्य प्रकारकप्रत्यक्षे नियतानेकैकत्वसा
नस्यैव हेतुतया तं विना न त्रित्वादिप्रकारकं प्रत्यक्षमिति भावः। उपपद्यत इति इतो बहुत्वस्य यत्र बहुत्वे स्वसजातीय
रूपितोत्कर्षः प्रतीयते तथा च चतुष्ट्वादिरूपे बहुत्वे त्रित्वादिरूप स्वसजातीय ... निरूपितोत्कर्षस्य सत्वान्नाह
शप्रतीतिः ... रूपपद्यत इति भावः। संख्यान्तरत्वे। त्रित्वाद्यतिरिक्तसंख्यात्वे। तत्तारतम्याभावादिति। बहुत्वे स्वसजाती
योत्कर्षाभावात् मनेकत्वे तस्यैकरूपत्वादिति भावः। न च बहुत्वस्य त्रित्वादिरूपत्वे बहुत्वनिर्णये कथं त्रित्वादिसंशय इति वाच्यम्।

क ५ ... ते

९२

निरंक

४॥ एवंविनवतिपत्रैश्चतुर्दशपंक्तिस्थशोधपत्रं॥

४ आरब्धस्ययतमहत्परिमाणंतत्संख्यापरिमाणोभयजन्यं॰ महद्यवयवारब्धमहत्त्वादतिशयितत्वात्। अल्प अवयवारब्धमहत्त्वादतिशयितत्वाच्च। प्रचिताभ्यां महावयवाभ्यामारब्धे यन्महत्परिमाणमतिशयितं तत्परिमाणप्रचयोभयजन्यं। अप्रचितावयवारब्धात् त्र्यणुकमहत्त्वाच्च तादृशातिशयदर्शनात्। प्रचितैर्महद्भिरारब्धस्य यन्महत्परिमाणं॰ संख्यापरिमाणप्रचयजन्यं॰ प्रचितमहावयवद्व्यारब्धमहत्त्वादपि तस्योत्कृष्टत्वादिति बोध्यं। दिङ्मात्रस्य मूले प्रदर्शितत्वादिदमन्यत्र विस्तरः॥ केचित्तु दीर्घमिति प्रतीतेरवयवसंयोगविशेषेणोपपत्तेः दैर्घ्यं न परिमाणं अन्यथा वर्तुलत्वचतुरस्रत्वादीनां परिमाणांतरत्वापत्तेरित्याहुः॥ अर्थादिति। प्रकरणादित्यर्थः। यद्वा अर्थात्परिशेषादित्यर्थः। न च परिशेषासिद्धः रूपादेरप्याश्रयनाशनाश्यत्वादिति वाच्यं। आश्रयनाशात इति मूलस्याश्रयनाशमात्रादित्यर्थकतया रूपादेराश्रयमात्रनाश्यत्वाभावेन परिशेषसंभवात्। न च मूलस्य तादृशार्थकत्वे प्रयोजनाभाव इति वाच्यं। क्रियाविभागादिक्रमेण यत्किंचिदवयवनाशेऽपि शरीरादिनाशस्य मीमांसकैरनभ्युपगमात्तन्मतनिराकरणाय मूलस्य तादृशार्थकत्वादिति ध्येयं। आश्रयनाशमात्रस्येव परिमाणेतरनंगीकारात्तन्मतनिराकर तत्र परिमाणनाशस्यानुभवविरुद्धत्वाच्च। द्वितीयक्षणे चासमवेतद्रव्यानंतरं स्वाश्रयअवयवगतैकत्वास

मवायिकारणत्वं चेति स्मरणीयं । एकपृथक्त्वं । एकसमवेतपृथक्त्वं । द्वित्वादिवच्चेति । तथा च द्विपृथक्त्वादौ स-
मानाधिकरणान्येकपृथक्त्वान्यसमवायिकारणानि । इदमेकपृथगिदमेकपृथगिति नानैकपृथक्त्वविष-
यिण्यपेक्षाबुद्धिर्निमित्तकारणं तादृशबुद्धिनाशात्क्वचिदाश्रयनाशात्क्वचिदुभाभ्यां द्विपृथक्त्वं नश्य-
तीति भावः । अत्रोभयसमवेतपृथक्त्वं द्विपृथक्त्वं त्रितयसमवेतपृथक्त्वं त्रिपृथक्त्वमिति रीत्या बोध्यम् । न-
नु घटोपटात्पृथगित्यादिप्रतीतेः परावधिकैकपृथक्त्वद्वयादिनाप्युपपत्तेरुभयसमवेत ।

नकारणं। द्वित्वसंख्या ७

समानप्रकारकनिर्णयस्यैव संशयविरोधितया कुत्वप्रकारकनिर्णयस्यात्र सत्वादिप्रकारकसंशयाविरोधित्वात्। अणु महदित्यादि। यद्यप्यणुत्वमेव कृस्वत्वमस्त महत्वमेव दीर्घत्वमस्त्विति कुतश्चातुर्विध्यं तथापि तदवधिकाणुतया प्रतीयमानेपि तदवधिकह्रस्वत्वाव्यवहारात् तदवधिकमहत्ववत्तया प्रतीयमानेपि तदवधिकदीर्घत्वाव्यवहाराच्च ह्रस्वत्वदीर्घत्वयोरतिरिक्तपरिमाणतया तच्चातुर्विध्यं बोध्यं। संख्याजन्यमुदाहरतीति। संख्यामात्रजन्यमुदाहरतीत्यर्थः। न सजातीयमिसनं तरविजातीयसंयोगरूपः प्रचयस्तु न घणुकादौ सत्वेपि वातस्याऽसिंचिल्करत्वादिति ह्रस्वणाये। द्वित्वसंख्या। द्वित्वसंख्यामात्रं। एवमग्रेपि। परिमाणजन्यं। [illegible] । कपालादिपरिमाणजन्यं। कपालादिपरिमाणमात्रजन्यमित्यर्थः। अप्राचित्कपालद्वयारब्धे घटे यन्महत्वपरिमाणं तत्र कपालगतद्वित्वसंख्यायामह त्वाजनकत्वादन्यथाघणुकेपि महत्वोत्पादापत्तेः। नचो क्तोपस्यां द्वित्वेन परिमाणाजनकत्वेपि घटगतमहत्वंप्रति कपालगतमहत्वस्य कपालगतद्वित्वस्य वा हेतुत्वमिसत्वविनिगमनाविरह इति वाच्यम्। कपालगतमहत्वोत्कर्षेण घटगतमहत्वोत्कर्षस्यानुभवेकतया कपालमहत्वस्य तत्रावश्यहेतुतायाः वाच्यत्वात्। यत्रैककपालेन प्रचयस्तत्र प्रचयस्यापि हेतुत्वासंभवात्तत्र घटपरिमाणं कपालपरिमाणमात्रजन्यमिति भावः। प्रचयरतीति। शिथिलाख्य इति। केचिदवयवावच्छेदेनावयवांतरासंयोगिनि महत्सवयवे वर्त्तमानः संयोगः प्रचय इत्येके। अत्र महत्तदनदेयं परमाणुसंयोगस्य प्रचयत्वेऽति विरहादित्यन्ये। स्वयावयवावच्छेदेनावयवांतरासंयोगिन्यवयवे वर्तमानः संयोगः प्रचयस्तेन परमाणुसंयोगो द्व्यणुकसंयोगो वा न प्रचय इत्यपरे। अनेनावयवरहितैः त्रिभिर्महावयवैः पृथक्कारोमानाभावइति चेन्न। घटोपटात्पृथगिति प्रतीत्या उभयसमवेतपृथक्त्वसिद्धेरुत्तैव घटः पटात्पृथगिति प्रतीत्युपपत्तेरेकैकपृथक्त्वप्रमाणाभावइत्यस्यापि वक्तुं शक्यत्वात्तस्मोद्विनिगमनाविरहादुभयमेवात्री। परंपरासंबंधः कल्प्यत इति। सामानाधिकरण्यरूपपरंपरासंबंधविषयत्वसमुत्पतीतः कल्प्यमित्यर्थः। इदमुपल

का०

पदयोगएवान्यारादितरर्त इत्यादिसूत्रेण पंचमीविधानात्। नञ्समस्तनान्योन्याभावविशिष्टार्थ ५

कु॰ टि॰ गु॰

८३

क्षणं॥ प्रतीतेः सामानाधिकरण्यरूपपरंपरासंबंधविषयकत्वमंगीकृत्यान्योन्याभावानंगीकारे एतद्घटरूपमेतद्घटात्
पृथगिति प्रतीत्यनुपपत्तेः एतद्रूपमेतद्रूपात्पृथगिति प्रतीत्यापत्तेश्च। अन्योन्याभावस्यातिरिक्तस्याभ्युपगमे तु पृथक्
पदस्यान्योन्याभावलक्षणया सर्वमुपपादनीयमिति। पंचमीप्रसंगादिति। अन्योन्याभावार्थकपदयोगस्य पंचमीप्रयोज
कस्य तत्र सत्वादिति भावः। अत्र नव्याः। अन्योन्याभाव एव [illegible] गुणांतरं। न च घटोनेत्यत्र पंचम्यापत्तिरन्योन्याभा
वविशिष्टार्थकत्वपरं त्वन्योन्याभावार्थकत्वमिसस्यान्यत्र [illegible] द्यादिति। यदि च घटात् भेद इत्यादौ पंचम्यनुप
पत्त्या भेदार्थकपदयोगे पंचमीप्रयोजकता अन्यारादितरर्त्तेत्यनेन [illegible] व्यतरेति घटोनेत्यत्र पंचम्यापत्तिर्दुर्वारेति विभाव्यतां
तरां निपातातिरिक्तान्योन्याभावार्थकपदयोगस्यैव पंचमीप्रयोजकत्वं कल्प्यते अनुशासनेस्य प्रयोगानुरोधित्वादिति प्राहुः
फले अप्राप्तयोरित्यादिना संयोगरूपमुक्तं तत्र प्राप्तिः संबंधः स च समवायोपीत्यत उक्तमप्राप्तयोरिति। लक्षणं तु संयोगत्वजा
तिरिति। फले आद्योन्यतरकर्मज इति। ननु संयोगत्वेनान्यतरकर्मणः कार्यतावच्छेदकं उभयकर्मज संयोग संयोगज संयोग
व्यभिचारादिति चेन्न। विजातीयकर्मत्वेन विजातीयसंयोगत्वेन समवायेन हेतुहेतुमद्भावात्। उभयकर्मजसंयोगादौ च तादृ
शवैजात्याभावेन व्यभिचाराभावात्। एवमुभयकर्मणः संयोगस्यापि च संयोगं प्रति हेतुत्वं बोध्यं। फले अभवेद्योगजोपर इति
ननु संयोगजसंयोगमानाभावः। यत्र कपालक्रियया कपालतरुसंयोगस्ततः कुंभतरुसंयोगस्तत्र कपालक्रियया एव तरुसं
योगं प्रति कारणत्वं न तु कपालतरुसंयोगस्येति चेन्न। समवायेन संयोगं समवायेन क्रियाया अभावेन कुंभेतरुसंयोगानु
पपत्तेः। क्रियायाः सामानाधिकरण्यसंबंधेन हेतुत्वांतरकल्पनापेक्षया समवायेन संयोगस्यैव हेतुत्वकल्पनौचित्यात्॥
च यत्तु यत्र कपालक्रियया कपालांतरेण तरुणा चैकस्मिन्क्षणे संयोगस्तदुत्तरक्षणे घटोत्पत्तिः कपालक्रियानाशश्च। ९३
ना शंकस्योत्तरसंयोगस्य सर्वसत्वा उत्तरक्षणे कुंभतरुसंयोगानुपपत्तिः। सर्वक्षणे कपालक्रियाया नाशात्। तस्मात्कपालसंयोग

186

एवं तत्र कारणमिति संयोगजसंयोगसिद्धिर्निराबाधैवेति। अत्र केचित्। कथं संयोगस्य द्वैविध्यमन्यतरकर्मजन्यसंयोग

स्याप्रसिद्धेः। अत्रेष्टसंयोगः संयोगः। तत्र संयोगाधिकरणद्रव्ये क्रियाविरहेण व्यभिचारादन्यतरकर्मणः संयोगं प्रति कारण

त्वस्य वक्तुमशक्यत्वादित्याहुः। तन्न। कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नयत्किंचित्स्याधिकरणीभूत

यावद्धर्मि वर्तिना प्रागभावप्रतियोगिता नच घटकधर्मत्वमेव कारणता घटकमेव च कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यताव

च्छेदकावच्छिन्नयत्किंचिदधिकरणयावद्धर्मिषु कारणाभाववत्त्वमेव व्यभिचारः। न चैवंविधो व्यभिचारः प्रकृते इ कारणीभूत

हस्तावच्छिन्ने तत्र क्रियाप्रागभावासत्वादिति दिक्। नन्वेवं यत्र हस्ते क्रियातत्तो द्वितीयक्षणे शरीरे क्रिया तत्र चतुर्थक्षणे

हस्ततरुसंयोगस्तस्मिन्नेव क्षणे शरीरक्रियाजन्यसर्वदेशसंयोगनाशस्तदुत्तरक्षणे शरीरतरुसंयोगो जायते तस्य च हस्ततरुसंयो

गजन्यत्वं शरीरक्रियाजन्यत्वं वेत्यत्र विनिगमनाविरहः। न चोभयमेव तत्र हेतुर्जातिसंकरप्रसंगादिति चेन्न। तत्र संयोगद्व

यस्यैवोपगमात्। हस्ततरुसंयोगात्मस्य दोषादित्यलं। तत्र चित्र संयोगएवास्ति घतकारणत्वं तु तत्र संयोगकर्मोभयवत्त्वेन

तिरिक्तसंयोगे विजातीयत्वेति न सांकर्यमित्यपर इत्यन्यत्र विस्तरः। पूर्ववदिति। संयोगवदित्यर्थः। तेनैव कपालविभा

गेनेति। तेन कपालविभागेनैवेत्यर्थः। एवकारेण कर्मणो व्युदासः। कपालस्याकाशादिविभागोऽन्यतरइति। अन्यथा कपाल

कर्माकाशसंयोगस्य नाशकाभावेन नित्यत्वापत्तिरेवं कपालाकाशसंयोगस्य प्रतिबंधकस्य सत्वेनोत्तरसंयोगानुत्पत्त्या कर्मण

पि नित्यत्वापत्तिः। उत्तरसंयोगस्यैव स्वजनककर्मनिवर्तकत्वादिति भावः। अमुमर्थं हृदि निधायोक्तं ततउत्तरदेशसंयोग

स्ततः कर्मनाश इति। तेन कर्मणैवेति। कपालद्वयविभागजनककर्मणैवेत्यर्थः। देशांतरविभागः। कपालाकाशादिविभागः।

आरंभकेत्यादि। आरंभकसंयोगः कपालद्वयसंयोगादिस्तत्प्रतिद्वंद्वीतद्विरोधी तन्नाशकइति यावत् एवमपि। अनारंभक

संयोगः। कपालाकाशसंयोगादिः। अन्यथेति। आरंभकसंयोगप्रतिद्वंद्विविभागजनककर्मणो नारंभकसंयोगप्रतिद्वंद्विविभा

गजनककर्मणश्चैकस्यत्वे। नित्वसदिति। तत्तावगावच्छेदेनानारंभकसंयोगप्रतिद्वंद्विविभागजनककर्मणः सत्वात्तेन कर्मणान्य

187

मु.दि.पु.
९४

विभागेन शरीरतरुविभागोऽन्यतेतेन च शरीरतरुसंयोगनाशोऽन्यत इत्युपेयत इति विभागसिद्धिः ननु हस्ततरु

त्वावच्छिन्नारंभकसंयोगविरोधिविभागोस्तिस्तेन चारंभकसंयोगनाशस्तेन च मलनाशः स्यादिति भावः। कारणविभागेनै
व। कारणमात्रविभागेनैव। कपालद्वयविभागादिनेति यावत्। सर्वम्। घटाद्यात्मकद्रव्यनाशात्पूर्वं। तथा च सर्वोक्तं ततो घट
नाशस्ततः कपालस्याकाशविभागोऽन्यत उत्पसंगतमिति भावः। सति द्रव्ये। द्रव्यनाशं विना। देशान्तरविभागासंभवादिति
अन्यथा कारणमात्रविभागकर्मलक्षणस्यातिव्याप्त्यापत्तेरिति भावः। वस्तुतः कर्मलक्षणस्य तत्र नातिव्याप्तिः तत्संस्कारस्य
पाकजक्रियायां सप्रपंचं प्रदर्शितोस्माभिः। द्वितीय इति। कारणाकारणविभागजन्य इति भावः। यावद्द्रव्यवत्कर्मनियतत्वादिति
क्रियायाः व्याप्यवृत्तित्वनियमादिति भावः। अत एव। वक्ष्यमाणयुक्तेरेव। शरीरे विभक्तप्रत्ययो न स्यादिति। यत्र हस्तक्रियया
हस्ततरुविभागस्तत्र शरीरे विभागप्रत्ययः सर्वानुभवसिद्धः स च विभागं विनानोपपद्यते। न च शरीरतरुसंयोगनाशे
एवं तद्विषय इति वाच्यम्। विभागानंगीकारे शरीरतरुसंयोगनाश[illegible]स्यैवासंभवात्। न हि तत्र हस्तक्रिया शरी
रतरुसंयोगनाशिका व्यधिकरणत्वादतस्तत्र हस्ततरुसंयोगनाश एव तरुशरीरसंयोगनाशकोऽस्तु तत उभयस्मा
मानाधिकरणप्रसंगात्। आस्तु विभागाद्विभागो हस्ततरुविभागस्तत्कर्मजोऽन्यः शरीरतरुसंयोगनाशकतया सिद्धत्व
सम्यत एवापास्तं। हस्ततरुसंयोगनाशेनैव तदुपपत्तेः। किंच हस्तक्रियैव स्वसमवायिसमवेतत्वसंबंधेन शरीरनिष्ठा शरी
रतरुसंयोगनाशहेतुरस्तु वैय्यधिकरण्याभावादिति चेन्न। आश्रयनाशाजन्यगुणनाशस्य विरोधिगुणजन्यत्वनिय
मेन शरीरकर्मजन्यतरुसंयोगं प्रति हस्ततरुसंयोगस्याकारणत्वेन च शरीरतरुसंयोगनाशो हस्ततरुसंयोगनाशस्याऽ
नकत्वात्। य[illegible]हस्तक्रियैव स्वसमवायिसमवेतत्वसंबंधेन तत्र कारणमिति तन्न। साक्षात्संबंधेन जनकत्वनियमस्य
सति बाधके संबंधान्तरकल्पनानुपपत्तेः। वस्तुतस्तु। संयोगाभावो विभागो [illegible] विभागाभावो वा संयोग इत्यत्र विनिगमनावि
रहणाप्रयोरतिरिक्तत्वं। अत एव घटादयो विभक्ता इति प्रत्यय उपपद्यते। संयोगनाशात्मकत्वे नाशस्य सावधिकत्वाभा
वेन तथा प्रत्ययानुपपत्तेः। तदिदमभिप्रेत्योक्तं मतः संयोगेत्यादि। मूले मूर्त्ते एव तु दैशिकमिति॥ विभुद्वय विप्रकृष्टदेशमा

शरीर५

९४

त्रस्तित्वसन्निकृष्टदेशमात्रवृत्तित्वं तु हेतुर्निमित्तकारणस्य दिक्संयोगस्यासमवायिकारणस्य चाभावादिति भावः । दैशिक
परत्वस्य निमित्तकारणमाह । बहुतरेति । बहुतरसंयोगांतरितत्वं तदेव विप्रकृष्टत्वं तद्विषयिण्यपेक्षाबुद्धिर्दैशिकपरत्वं प्रतिनि
मित्तकारणमित्यर्थः । तदल्पीयस्त्वेति । अल्पसंयोगांतरितत्वरूपसन्निकृष्टत्वविषयिण्यपेक्षाबुद्धिर्दैशिकापरत्वं प्रतिनिमि
त्तकारणमित्यर्थः । कालिकपरत्वापरत्वे जन्यस्यैवेति जन्यपदं सप्तम्यंतं निरुक्तं तत्त्वं सन्निकृष्टरूपज्येष्ठत्वं बहुतरस्पंदनानंतरोत्पन्न
रूपकनिष्ठत्वं तु हेतुर्निमित्तकारणस्य कालसंयोगरूपासमवायिकारणस्य चाभावादिति भावः । मूले अपेक्षाबुद्धिनाशेने
ति ।। स्वनिमित्तकारणविप्रकृष्टत्वादिबुद्धीनां नाशेनेत्यर्थः । नव्याः । पुनर्बहुतरसंयोगांतरितत्वरूपविप्रकृष्टत्वा
ल्पतरसंयोगांतरितत्वरूपसन्निकृष्टत्वाभ्यां दैशिकपरत्वापरत्वव्यवहारस्य बहुतरस्पं
दांतरितत्वजन्यत्वरूपज्येष्ठत्वाल्पतरस्पंदांतरितत्वरूपकनिष्ठत्वाभ्यां च कालिकपर
त्वापरत्वादिव्यवहारस्योपपत्तेर्न तयोर्गुणांतरत्वं । यत्र च यत्काले ज्येष्ठत्वबुद्धिस्
संघते तत्कालमारभ्य स्पंदनस्य नाधिकता वसेया ।। अतो न कनिष्ठे धिकजीवि
नि परत्वव्यवहारापत्तिरिति वदंति । तदभाववतीति ।। इदं च प्रमायामतिव्याप्तिवा
रणाय ।। तदभाववद्विशेष्यक तदभावप्रकारकप्रमायामतिव्याप्तिवारणाय तत्प्रकारक
मिति । इच्छायामतिव्याप्तिवारणाय ज्ञानमिति ।। तदभावाप्रकारकमिति संशये

मु॰दि॰गु॰
९९

अतिव्याप्तिवारणाय। अत्र तद्विशेष्यकत्वावच्छिन्नतदभावप्रकारताभिन्नत्वं तद्विशेष्यकत्वाव
च्छिन्नतत्प्रकारक त्ववत् ज्ञानत्वं तत्र तन्निश्चयत्वमवसेयं ननु यथा[illegible]तं महानसं वह्नि
मन्न वा पर्वतो वह्निमानित्यस्य पर्वते वह्निनिर्णयत्वानापत्तेः। ज्ञानपदं चेच्छायामतिव्याप्तिवा
रणाय। एकधर्मिकेति। इदं पर्वतो वह्नितदभाववंताविति ज्ञाने अतिव्याप्तिवारणायैकधर्मिकेति।
एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नेत्यर्थः। तेन पर्वतो वह्निमान् द्रव्यं वह्न्य
भाववदिति ज्ञानव्युदासः। वृक्षः संयोगवान् तदभाववांश्चेति समुच्चयवारणाय वि
रुद्धेति विरोधावगाहित्वं तदर्थः। घटो द्रव्यं पृथिवी चेति ज्ञानवारणाय भावाभावे
ति। इच्छाव्युदासार्थं विशेष्यभा गः। वस्तुतस्तु एकधर्मावच्छिन्नविशेष्यकत्वनिवेशो वि
भिन्नरूपेणैक धर्मितावच्छेदकज्ञानस्य संशयत्वापत्तिः। एकधर्मावच्छिन्नविशेष्य
कत्वनिवेशे च निरवच्छिन्नविशेष्यताक संशयासंग्रहप्रसंगः। विभिन्नरूपेण धर्मितावच्छेद
कतावच्छेदकावगाहिज्ञानस्य संशयत्वप्रसंगश्चेति स्वीयैककोटिप्रकारतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूत
तावच्छेदकता॥

९९

ज्ञानत्वं संशयत्वमिति बोध्यम्। यत्तु संशयसंज्ञामिति विशेषइति। तन्न। चाक्षुषत्वादिना संकरप्रसंगात्। संदिग्धइति त्रि यापदं संदेहवान्भवतीत्यर्थः। एवमग्रेपि। समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरित्यादि सूत्रे विप्रतिवाक्यजन्यशाब्द संशयस्योक्तत्वात्साधारणासाधारणधर्म ज्ञानजन्यसंशयवत् विप्रतिवाक्यजन्यः तृतीयोपि संशय इति मतनिरासायाह। विप्रतिपत्तिरिति। व्याप्तिज्ञानादीनामिव दिनाअतिदेशावाक्यार्थज्ञानपरिग्रहः। ननु सूत्र त्रस्थ पंचम्यनुपपत्तिरित्यत आह। किंत्विति। तथाच सूत्रस्थ पंचमी प्रयोजकतायामिति भावः। एवं ज्ञाने प्रामाण्यसंश याद्विषयसंशय इत्यत्र प्रामाण्यपदमप्रामाण्यस्याप्युपलक्षकं। तेन प्रामाण्यसंशयस्यैव विषयसंदेहे स्वातंत्र्येण हेतु त्वमिति भावः। एवं व्यापकेति। अथ व्याप्यसंशयस्य व्यापकसंदेहहेतुत्वे कोटिस्मरणादितएवतत्संभवात्। क्वचित्तद नुविधानस्य व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यस्य गृहीतत्वेन तत्स्मरणएवोपक्षीणत्वान्न तद्ग्रहेतुव्याप्यसंशयात् व्यापकसंशयस्याप्यभावादिति चेदत्राहुः। महानसे कृताग्नेर्नो नडलक्रदे इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंश याभावाभावाभ्यां कृतानां संशयभावाभावदर्शनात्तस्यापि तद्धेतुत्वं। अतएवोत्कटकोटिव्याप्यसंशयात् व्यापकस्याप्यु त्कटकोटिकः संशयः कारणात्कर्षेणैव कार्योत्कर्षात्। नन्वेतत्प्रभावस्य त्रकदनभिमतमितिवाच्यम्। सूत्रस्य चत्वारस्या नुगमसमुच्चायकत्वात्तथाहि। समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शो वि संशय इति सूत्रं तस्य चार्थः प्राक्कर्षोपयन्न मुखाः। समानधर्मः कोटिद्वयसहचरितो धर्मः। अनेकस्मात्सपक्षविपक्षाद्व्यावृत्तो धर्मः अनेकधर्मः तयोरुपपत्तिर्ज्ञानं तस्मात् प्रतिपत्तिर्विरुद्धकोटिप्रतिपादकं वाक्यं तस्मात् अत्र पंचम्याः प्रयोजकत्वमर्थो न हे तुत्वं उपलब्धिः प्रामाण्यं अनुपलब्धिः प्रामाण्यविरोधिप्रत्वमस्वं तयोरव्यवस्थासंशयः। एवं च प्रामाण्यसंशयजन्यो त्रमत्वसंशयजन्यश्च विषयसंशयः। चकारो व्याप्यसंदेहादिजन्यव्यापकसंदेहग्राहकः॥ विशेषापेक्षो विमर्श इति तु

स्य४

श्रणो। एकधर्मिकभावाभावप्रकारकत्वविशेषवान्विमर्शो ज्ञानमिति तदर्थः। इत्यादिकमित्यादिना साधनाव्यापकत्वसंदेह
दितः साध्यव्यापकत्वसंदेहो बोध्यः। साधारणज्ञानादेः कार्यतावच्छेदके चाव्यवहितोत्तरत्वं देयं तेन परस्परं न व्यभि
चारः। ननु साधारणज्ञानादेरिव धर्मिज्ञानस्यापि संशयहेतुत्वात्तं त्यक्त्वा संशयविभागः कथं न प्रदर्शित इत्यत आह। सं
शये धर्मिज्ञानमिति। संशये। संशयमात्रे। तथा च धर्मिज्ञान अन्यतावच्छेदकसंशयत्वसमव्याप्तत्वान्न तद्विभाजक
तावच्छेदकमिति भावः। ननु धर्मिज्ञानस्य हेतु संशये त्वे मानाभावः। न च धर्मिज्ञानमन्तरेण संशयः स्यादिति वाच्यम्।
सति धर्मेन्द्रियसंनिकर्षे इष्टत्वादत आह। धर्मेन्द्रियेति। पित्तादीत्यादिना मंडूकवसाञ्जनादेः परिग्रहः। अनुमानासिद्ध
समवप्रदर्शयति। यथेति। भगवज्ज्ञाने व्यभिचारवारणाय हेतावन्येति। अर्थान्तरं निराकुरुते। न चेति। ननु पित्तादिसक
दोषाभावः श्वैत्यप्रमायामेव कारणं न तु शंखप्रमायामत आह। विनिगमनाविरहादिति। प्रमायां दोषाभावः कारणं गुणो
वा कारणमित्यत्र विनिगमनाविरहादिति भावः। वस्तुतो गुणहेतुतायामेव लाघवं विनिगमकमस्तीत्याह। अनन्तेति। न्या
य्यत्वादिति। अनन्तगुणस्याग्रे वक्ष्यमाणत्वादनन्तहेतुत्वमेतयं दोषपर इति भावः। तथा च दोषाभावानां हेतुत्वस्यावश्यकत्वे
न गुणस्यापीति। तथा च पित्तादिदोषाभावसत्त्वे विशेषणविशेष्यसंनिकर्षरूपगुणाभावान्न शंखेऽपि तत्प्रमेति दोषाभा
वे न गुणस्यान्यथासिद्धिरिति भावः। एवं सति। अन्वयव्यतिरेकसत्त्वेऽपि यद्यप्यन्यथासिद्धत्वं तदेत्यर्थः। गुणाभावः। गुणा
भावस्य। न तु दोषः कारणमिति भावः। एवमग्रेऽपीति। उपमितौ शब्दे सादृश्यज्ञानं शाब्दबोधे योग्यतायास्तात्पर्यस्य वा प्रमैव
गुण इति भावः। ननु रंगरजतयोरिमे रजतरंगे इति ज्ञाने अतिव्याप्तिरत आह। तद्विशेष्यकत्वे सतीति। तद्विशेषप्रकारकत्वाव
च्छिन्नं तत्प्रकारकं च ज्ञानमित्यर्थः। सति सप्तम्या अवच्छिन्नार्थकत्वात्। तत्प्रकारकं भ्रमे अतिव्याप्तेस्तद्विशेष्यकेति। रज
तत्वद्रव्यमिति ज्ञाने अरैतत्वप्रमात्वापत्तिरतस्तत्प्रकारकत्वेति। ज्ञानपदं च तथाविधेच्छाया मतिव्याप्तिवारणाय। एवं सति।

मु.टी.गु. ९६ गु.१ एवं ५ ९३ १९६ ९३ ९२

192

मनोयदसाधारणंसहकारिणमासाद्यबहिर्गोचरांप्रमांजनयतितत्प्रमाणांतरमितिनियमात् = ४

क ५

तस्मात्तस्यप्रमात्वघटकत्वेसति । भ्रमः प्रमाचस्यादिति । लक्षणद्वयस्यतत्रसत्वादितिभावः । नचैवंलक्षणानतुप्र[illegible]त्याह । तस्यस्येति । अथपाकरक्तेघटेश्यामरूपवत्ताप्रतीतेः प्रमात्वस्यादितिचेदिष्टमेवैतत् । घटस्यकदाचित्स्या मत्वात् । वर्तमानस्यप्रमात्वघटकत्वात् । अथयद्यपिस्मरणस्यज्ञानत्वरूपानुभवत्वस्यनिवेशगौरवात्वैयर्थ्यंज्ञानत्वघटित त ३ त्वमेवप्रमात्वंसुवचंतथापितस्यस्मृतिसाधारणतयातत्करणस्यप्रमाणांतरतापत्त्या शास्त्रेप्रमाणव्यवहारोपयिकंरूपमनुभ वत्वस्यजातिविशेषत्वेसिद्धेज्ञानत्वस्यअनुभवत्वाघटकत्वात् नानुभवत्वस्यवैयर्थ्यमितिकृतंपल्लवितेन ॥ ॥प्रामाण्यंनस्व तोग्राह्यमितिमतेनस्वतोग्राह्यत्वंनिषिध्यतेतत्रस्वतस्त्ववादिनःकइत्याकांक्षायामाह । मीमांसकाहीति । स्वप्रकाशकत्वादि ति । स्वविषयकत्वादित्यर्थः । तेनैवग्रहणमिति । ज्ञानेगृह्यमाणेतन्निष्ठज्ञानत्वादिधर्मवत्तन्निष्ठप्रामाण्यस्यापिग्रहेबाधकाभा वात्तन्मतेसर्वंज्ञानमयंघटोघटमहंजानामीत्याकारकमितिभावः । तथाचेति । अयमत्रानुमानप्रकारः । इयंज्ञातताघटविशे ष्यकघटत्वप्रकारकज्ञानजन्याघटवृत्तिघटत्वप्रकारकज्ञातत्वात् । यायद्वृत्तियत्प्रकारकज्ञातता सातद्विशेष्यकतत्प्रकारक ज्ञानसाध्या । यथापटेपटत्वप्रकारकज्ञाततेति । अनुव्यवसायेनेति । ननुज्ञानज्ञानस्यविषयाविषयकत्वात्कथंविषयघटितप्रामा ण्यंतस्यविषयइत्यतोज्ञानज्ञानस्यसविषय[illegible]त्वेप्रमाणमाह । विषयनिरूप्यमिति । विषयाविषयकप्रत्यक्षाविषयइत्यर्थः । ज्ञान वित्तिवेद्योविषयइति । विषयविषयतानियतस्वविषयताकप्रत्यक्षकंज्ञानमित्यर्थः । अतोनसाध्यहेत्वोर्वैयधिकरण्यं । तथाच ज्ञानेविषयविषयतानियतस्वविषयताकप्रत्यक्षकंविषयाविषयकप्रत्यक्षाविषयत्वेसतिप्रत्यक्षविषयत्वादित्यनुमानेज्ञान प्रत्यक्षस्यविषयविषय[illegible]त्वेप्रमाणमितिभावः । भट्टमतेचप्रत्यक्षस्यानाभिप्रेतत्वात्ज्ञातताऽलिंगकानुमितिरेवबोध्येत्यन्यत्रविस्तरः । अ न्यथासिद्धत्वापन्नेति । अनवधृतप्रामाण्यसजातीयेत्यर्थः । ज्ञानमेव । निश्चितमेव । गंधवतीति । व्याप्यवति व्यापकत्वप्रकारकत्व स्यव्यापकवतिव्यापकप्रकारकत्वव्याप्यत्वादितिभावः । ननुकथंतर्हि प्रामाण्यानुमेयता गंधवती पृथिवीत्वप्रकारकत्वेस्यपृथि वीत्ववति पृथिवीत्वप्रकारकत्वादेरपिप्रत्यक्षसंभवादतआह । तत्प्रकारकत्वेति । संज्ञायानुरोधादिति । यद्यपिज्ञानेप्रामाण्यनिश्च

पु.नि.टि. ९१

यो धर्मितावच्छेदकसामानाधिकरण्येन ज्ञायते संदेहस्तु धर्मितावच्छेदकसामानाधिकरण्येन प्रामाण्याभावावगाही धर्मिताव
च्छेदकावच्छेदेन प्रामाण्यावगाहीति कथं संशयानुपपत्तिः तथापि प्रवृत्त्युपयुक्तस्य धर्मितावच्छेदकावच्छेदेन प्रामाण्यग्रहस्य सं
तस्संशयानुपपत्तिर्दूषणमिति ध्येयं। नन्वप्रामाण्यग्राहकसामग्रीसत्वात् कथमग्रिमसंशयानुरोधेन प्रामाण्यग्रह इति वाच्यं
तत्राग्रिमसंशयानुरोधेन संशयजनकदोषस्य प्रामाण्यनिश्चयप्रतिबंधकस्य कल्पनादिति शयात्। ननु यदि प्रामाण्यमनुमेयं
तदा प्रामाण्यग्रहस्य व्यर्थं। तथाहि। अयं पुरुषप्रवृत्तौ निश्चये प्रामाण्यसंदेहेनार्थसंदेहस्यायं पुरुषो न वेत्याकारस्योत्पत्त्या पुरुषा
र्थिनः प्रवृत्तिर्न संभवति। तत्र प्रामाण्यनिश्चये च न तत्संशयाधीनोर्थसंदेह इति। प्रामाण्यग्रहस्य प्रवृत्तावुपयोगः प्रा
माण्यग्रहस्यानुमित्यात्मकत्वे च प्रामाण्यानुमापककरादिमति [illegible] पुरुषत्वप्रकारकत्वादिरूपहेतुग्रहे तद्घ
टकतया पुरोवर्तिनि पुरुषत्वव्यापककरादिग्रहस्यावश्यकतया तेनैवायं पुरुषो न वेति संदेहप्रतिबंधसंभवाद
लं प्रामाण्यानुमानेनेति चेन्न। करादेः पुरुषत्वव्याप्यग्रहं विनापि करादिमति पुरुषत्वप्रकारकत्वहेतोः पुरुषघटितप्रा
माण्यव्याप्यत्वग्रहसंभवेन प्रामाण्यानुमानसंभवात्। एवं न्यायनये अनुमितेरिव द्वितीयानुव्यवसायस्यापि प्रामा
ण्यमात्रत्वमित्यन्यत्र विस्तरः। गुरुः शंकते। नन्विति। व्यर्थमिति। व्यवच्छेद्याया अन्यथाख्यातेरभावादिति भावः। भ्र
मजन्येति। न्यायनये भ्रमजन्या प्रवृत्तिस्त्वन्मतेन स्यादित्यर्थः। भ्रमस्य अन्यथाख्यातेः। तत्र। रंगगोचरविसंवादि

स.सात ४

रजतार्थिप्रवृत्तौ। रजतमिदं रजतमिति ज्ञानकाले रजतभेदाग्रहस्य संवादिविसंवादिप्रवृत्त्यापत्तिवारणाय दोषाधीन
स्योक्तं। न्यायनये दोषाधीनरजतभ्रमस्थले ज्ञानाभिषिक्तरजतभेदाग्रहस्यैव तन्मते दोषाधीनतया रजते रजतभेदाग्रह
(ने र) स्य दोषाधीनत्वादिति भावः। यच्च रंगगोचरमेतत् रजतवत् प्रसतलमिति ज्ञानं तत्र विसंवादिताद्दशप्रवृत्त्यापत्तिवारणाय
रजते चोपस्थिते ति रजतविशेषणं मुख्यविशेष्यतया उपस्थितत्वं तदर्थः। वस्तुतो रंगगोचररजतवत् प्रसतलमिति ज्ञा

८

अन्यथा

नादिरपि प्रवृत्तिरिष्टैवेति स्वतंत्रोपस्थितत्वं न देयमिति ध्येयम् हेतुत्वादिति। न्यायनयेपीदं रजतमिति भ्रम हे
तुतया रजतभेदाग्रहस्य तत्रावश्यकतया तस्यैव हेतुत्वं युक्तं तदुक्तो सिरिति न्यायादिति भावः। कार्यकारणभावद्वयकल्पना
पेक्षया लाघवादाह। अस्त्वकवृत्ति। तत्रापि। सत्यरजतगोचरप्रवृत्तावपि। अपि ना रंगगोचरप्रवृत्तावपि रिगृहः। रजत
भेदाग्रहः रजतभेदसंसर्गाग्रहाभावः। यथाश्रुते रजते नेदं रजतमिति ग्रहेपि प्रवृत्त्यापत्तेः आभाकरमते तत्र रजत
भेद ग्रहाभावस्य सत्त्वादन्यथाख्यात्यापत्तेरिति। यद्यपि पुरोवर्त्तिविशेष्यकस्य रजतसंसर्गाग्रहस्य समवायेना भेदा
भावो विशेषणतया अन्यनिष्ठप्रतिबंधकत्वं तदभावः कारणमिति फलितं तथापि रंगेनेदं रजतमिति ग्रहेपि प्रवृत्त्यापत्तिः
रंगविशेष्यकरजतभेदासंसर्गग्रहस्यान्यथाख्यात्यनंगीकर्तृमते अप्रसिद्धत्वेन तदभावस्य प्रतिबंधकत्वासंभवात्तथा
पि विषयतासंबंधेन प्रवृत्तिं प्रति रजतभेदासंसर्गग्रहस्य विशेष्यतासंबंधावच्छिन्नप्रतियोगिताको भावः सविशेषण
तासंबंधेन प्रतिबंधकत्वं विषयनिष्ठतया प्रतिबध्यप्रतिबंधकभावकल्पनान्नोक्तदोषः। एवं च तत्पुरुषीयत्वप्रतिबं
धकस्य रवघटे दंडत्वादिनिवेशनीयमतो न पुरुषभेदमादाय दोषः। न चैवं रंगे रजतमिति भ्रमानंतरं तत्र प्रवृत्तिर्न
स्यात् रजतभेदासंसर्गग्रहस्यान्यथाख्यात्यापत्त्या तत्रानंगीकारेण तदभावस्य प्रतिबंधकस्य सत्त्वादिति वाच्यम्
रजतभेदोपस्थितिविरहे एतस्यैव रजतभेदासंसर्गग्रहाभावस्य प्रतिबंधकत्वोपगमात्। न चैवं रंगे इदं रजतं घटो न रज
तमिति ज्ञानानंतरमप्रवृत्त्यापत्तिरिति वाच्यम्। रजतभेदग्रहप्रतिबंधकदोषस्योत्तेजकत्वकल्पनात्। तत्र रंगे रजतभेद
ग्रहानुत्पत्त्या तत्प्रतिबंधकदोषस्य स्वीकरणीयत्वात्। न च रंगे रजतभ्रमजनकदोष एवोत्तेजकोस्तु किं रजतभेदग्रहप्रति
बंधकदोषस्योत्तेजकत्वस्वीकारेण एवं च रजतभेदोपस्थितिवैशिष्ट्यमपि प्रतिबंधके विशेषणं न देयं। रजतभेदानुपस्थिति
इदं कालरंगे रजतमिति ज्ञानाद प्रवृत्तिप्रसंगाभावात्तत्र रजतभेदासंसर्गग्रहस्य प्रतिबंधकस्य रंगे रजतभ्रमजनकदोष

न्यथा ८

स्योक्तरूपो तेजकविशिष्टत्वादितिवाच्यम्। रंगे रजतमितिभ्रमस्य न्यायमतसिद्धस्य तन्मते अभावेन तत्रतादृशदोषस्यान
ङ्गीकारात्। संभवतीत्यनंतरं येनविसंवादिप्रवृत्तौ तद्धेतुत्वं स्यादिति पूरणीयं। संनिकर्षस्याभावादिति। ज्ञानलक्षण
याः प्रत्यासत्तेरस्य कल्पनंतु गौरवदोषदुष्टमित्यभिमानः। हेतुतायाश्चस्यान्वयव्यतिरेकाभ्यामिति शेषः। अन्यत्रा
पि। रंगगोचररजतार्थिप्रवृत्तावपि। तत्कल्पनात्। विशिष्टज्ञानहेतुत्वस्य कल्पनात्। नचात्र मानाभाव इतिवाच्यं। रं
गे रजतार्थिप्रवृत्तिरिष्टप्रवृत्तिविषयविशिष्टज्ञानसाध्या प्रवृत्तित्वात्। रजते रजतप्रकारकप्रवृत्तिवदित्यनुमानस्यै
व मानत्वात्। अत्राप्रयोजकत्वमाशंकते। नचेति। लाघवेनेति। संवादिविसंवादिभेदेन कार्यकारणभावद्वयमपेक्ष्य
प्रवृत्तिमात्रे विशिष्टज्ञानस्यैकहेतुत्वकल्पना लाघवेनेत्यर्थः। तथाच लाघवज्ञानरूपानुकूलतर्कस्य सत्वान्नाप्रयोज
कमिति भावः। रजतांगयोः संनिकर्षाभावान्नोपस्थितिः संभवतीति प्राभाकरोक्तं दूषणमुद्धरति इत्थं चेति। प्रवृत्तिमात्रे
विशिष्टधीहेतुत्वसिद्धौ नत्वर्थः। फलमुखेनेति। कार्यकारणभावग्रहात्मकफलात्पूर्वं गौरवस्यानिर्णयात् गौरवसंदेहस्य चाप्रतिबं
धकत्वादिति भावः। ननु च संवादिविसंवादिप्रवृत्तिसाधारणप्रवृत्तित्वावच्छिन्नं प्रत्येव भेदाग्रहः कारणमिति न कार्यकारण
भावद्वयकल्पनागौरवं। नच विशिष्टज्ञानतापेक्षया भेदाग्रहाभावस्य कारणतावच्छेदकत्वे गौरवमिति वाच्यं। रजतत्व
विशिष्टानुमितिवादौ रजतभेदाग्रहत्वेन कारणत्वे तत्रैव प्रवृत्तिसाधारणरजतत्वविशिष्टविषयकत्वस्यैव कार्यतावच्छेदकत्व
कल्पनेनैव निर्वाहात्। न्यायनये तु प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानहेतुत्वेन हेत्वंतरकल्पने गौरवमिति न तदनुरोधेन कल्प
नीयमित्यतमालं रजतज्ञानार्थं ज्ञानलक्षणाप्रत्यासत्त्यादर इति कारणबाधाद्बाधितमेव मिथ्याज्ञानमित्याशंकां मनसि निधाय स्व
लविशेषकारणबाधाभावादनिवार्यमेव मिथ्याज्ञानमित्याह। किंचेत्यादिना। यत्र रजतेन रजतांग्रहो न वा रंगे रजतभेदग्रहस्तत्र
सति युगपदिंद्रियसन्निकर्षे रजतरंगयोरिमे रजते इति ज्ञानेन किमपि बाधकं रजतत्वेन समं संयुक्तसमवायस्य सत्वात्। तादृशे

भेद २

वज्ञाने रङ्गांशे न प्रमात्मके विशेषणवत्त्वविशेष्येन्द्रियसन्निकर्षरूपप्रमासामग्र्यभावात् किं त्वन्यथाख्यातिरेवेति भावः। ननु तत्तद्वि-
शेषणतत्तद्विशिष्टबुद्धिं प्रति तत्तद्विशेषणतत्तद्विशेष्यघटितसन्निकर्षो हेतुरन्यथातिप्रसङ्गात्। तथा च कथं रजतघटितसंयुक्तसम-
वायेन रङ्गे रजतत्वग्रह इत्यत आह। अपि चेति। अन्यथाख्यातिस्यादित्यनन्तरं रङ्गे रङ्गभेदाग्रहस्य रजते रजतभेदाग्रहस्येति
प्रसक्तस्य सत्त्वादित्यनेनान्वयः। अनेन रङ्गे अनिष्टभेदाग्रहरूपा निवृत्तिसामग्री रजते इष्टभेदाग्रहरूपा प्रवृत्तिसामग्री प्रदर्शिता।
रङ्गे रजतभेदाग्रहस्य सत्त्वादिना च रङ्गे इष्टभेदाग्रहरूपा प्रवृत्तिसामग्री रजते अनिष्टभेदाग्रहरूपा निवृत्तिसामग्री च प्रदर्शिता।
[illegible] तन्मते न्यायमते त्वमस्वरूपाभिषिक्तभेदाग्रहं प्रति दोषस्य हेतुत्वादिति भावः। इदं चेष्टभेदाग्रहः प्रवृत्तिकारणमनिष्ट-
भेदाग्रहो निवृत्तिकारणमिति यथाश्रुताभिप्रायेण। इष्टभेदोपस्थितिविशिष्टेष्टभेदाग्रहः प्रतिबन्धकस्तदभावः कारणमिति दर्शि-
तनिष्कर्षे तु रजतभेदोपस्थितिविशिष्टरजतभेदासंसर्गाग्रहस्य प्रतिबन्धकस्य रङ्गे अभावादिति रीत्या सामग्री बोध्या। ननु रङ्गे
रजतभेदाग्रहप्रयोजकदोषस्य प्रतिबन्धकत्वान्न रङ्गे निवृत्तिरेवं रजते भेदासंसर्गाग्रहप्रयोजकदोषस्य प्रतिबन्धकत्वान्न रजते प्र-
वृत्तिरिति कथं युगपत्प्रवृत्तिनिवृत्त्योरापादनमित्यत आह। किं चेति। भेदाग्रहस्य। व्याप्यवत्तेभेदाग्रहस्य। अनुमितिर्निराबाधेति। सति
बाधाभावे अन्यथाख्यातिरूपानुमितिर्निराबाधेत्यर्थः। आपतितमिति। अन्यथाख्यातिरूपमापतितमित्यर्थः। ननु ह्रदो वह्निव्याप्यधूम-
वानिति [illegible] अन्यथाख्यातिरूपा अनुमितिः परं त्वगृहीतासंसर्गकं ज्ञानद्वयमेवाभ्युपगम्यते। न च विशिष्ट-
वत्तभेदाग्रहात् ह्रदो [illegible] वह्निमानित्यन्यथाख्यातिरूपा ह्रदो वह्निमानित्यनुमित्यान्यथाख्यातिरूपानुमितिकारणस्य सत्त्वादिति वाच्यं।
ज्ञानोऽसत्तो बाधकाभावः व्याप्यवत्तभेदाग्रहस्य ह्रदो वह्निमानित्यनुमित्यान्यथाख्यातिरूपकल्पनादतस्तत्र प्रमाणं दर्शयति। इत्थं चेति। यद्वा। ननु अनुमितिं
अन्यथाख्यातौ प्रमाणाभावेन तादृशाकार्यकारणभावस्याकल्पनादतस्तत्र प्रमाणं [illegible] तादृशविशिष्टबोधसामग्री तत्र लिङ्गासंसर्गाग्रहात् लिङ्ग्यसंसर्गाग्रहस्यैव परैः रूपगमा-
प्रति विशिष्टज्ञानस्यैव हेतुत्वं। यत्र च न तादृशविशिष्टबोधसामग्री तत्र लिङ्गासंसर्गाग्रहात् लिङ्ग्यसंसर्गाग्रहस्यैव परैः [illegible]
न्यायः [illegible] वह्न्यनुमित्यनुरोधादन्यथाख्यातिरित्यत आह। इत्थं चेति। चकारोऽप्यर्थे। ननु तादृशानुव्यवसायो नेदं विशेष्यकज्ञाने रज-

५

पा ९४ गु॰

रजतत्वप्रकारकत्वविशिष्टबुद्धिरूपः परंतु रजतत्वप्रकारकत्वासंसर्गाग्रहरूप एवेत्यत आह। संक्षेपइति। विद्यमानेपि भेदग्रहे आहा
र्यप्रत्यक्षोत्पादादिच्छाउत्तेजकत्वं वाच्यं। इच्छानामुत्तेजकत्वानुरोधेन चानुमितित्वादिनामेव कार्यतावच्छेदकत्वात् संस्पृष्टिं तत्त्वावधि
नं प्रति भेदाग्रहाभावत्वेन पृथक्कारणत्वेन गौरवापत्त्या विशिष्टज्ञानत्वेनैव हेतुताकल्पनमिति विसंवादिप्रवृत्त्यनुरोधेन
न्यथास्यातिर्दुर्वारैवेति भावः। ननु प्रामाण्यमनुमानगम्यं तदाभावे यद्यनुमानं प्रमाणं भवेत्तदेवनरसं भवति। व्याप्ति
ग्राहकाभावेनाशानादिसतः प्रामाण्यानुमितिप्रयोजकतया व्यभिचारस्याग्रहो थ सहचारग्रहस्तथेति स्खलनं व्याप्तिग्र
होदेशीतः सच युक्तः स्वकारणीभूतव्याप्तिस्वरूपज्ञानाभावादित्यत आह। पूर्वं व्याप्तिरुक्तेति। व्यभिचाराग्रहस्य व्याप्ति
ग्राहकतामुपपादयति। व्यभिचाराग्रहस्येति। सहचारग्रहस्यतामुपपादयति। एवमिति। भूयोदर्शनस्य कारणत्वं खंडय
ति। भूयोदर्शनं त्विति। व्यतिरेकव्यभिचारमाह। सकृद्दर्शनेपीति। भूयोदर्शनस्याहेतुत्वेपि क्वचित्प्रयोजकतयातदाद
रइत्याह। क्वचिदिति तर्कोपि सइति। शंकापनयनार्थं तर्कोपेक्षितइत्यर्थः। तद्दर्शयति। तथाहीत्यादिना। यद्ययमिति। अयं
धूमवान्पर्वतः कारणं विनेति। तथा च धूमो वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादिति तर्काकारो बोध्यः। यथाश्रुते वह्निमान्न स्यात्
धूमवान्न स्यादिति तर्कस्य विषयपरिशोधकस्य व्याप्तिग्रहानौपयिकतया असंगतेः। तत्रापि। तादृशतर्के कारणीभूतकार्यकारण
भावग्रहेपि। आशंका भवेत्। आशंकाप्रतिबंधिका भवेत्। व्याघातमेव दर्शयति। यदि हीत्यादिना। ननु तर्कप्रसाप्यव्याप्यापाद
कताज्ञानं कारणं तत्र व्याप्तिज्ञानप्रतिबंधकव्यभिचारशंकानिवर्तकस्तर्कोपेक्षित एवमग्रेपीयनवस्थेत्यत आह॥ यत्रेति। स
तएव। शंकासामग्रीविरहादेव। तर्कोपेक्षेत्यनंतरं मतो नानवस्थेतिशेषः। ननु तर्कस्य कथं व्यभिचारशंकानिवर्तकत्वं तत्कार
णीभूतव्याप्तिज्ञानेन निवृत्तेः संभवादनैकेचित्। अनाहार्यशंकायास्तर्ककारणीभूतव्याप्तिज्ञानेन निरासः संभवेपि आहार्य
शंकायास्ततो निरासो न संभवति आहार्यज्ञानस्य तदप्रतिबध्यत्वात् किंतु तर्केणैव। तथाहि। अनिष्टप्रसंजनात्मकेन तर्केणापादकज्ञा

मु॰ टि॰ दि॰

पायो॰ १६

या२ सं२ देचितु२ ना४

नेआपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजननद्वारा आपादकज्ञाने द्वेषोजन्यते।तेनचापादकज्ञाने इच्छाप्रतिबंधः क्रियते एवं
च्छेच्छारूपकारणविरहादेवनाहार्यशंकासंभवइत्यर्थः।शंकोत्पन्नमेवतर्कस्तन्निवर्त्तकत्वमितितर्कस्यशंकानिवर्त्तकत्वं व्याप्तिज्ञानका
रणीभूततोयोव्यभिचारशंकाविरहस्तत्संपादकत्वंएवंचव्यभिचारशंकाप्रतिबंधकतायांतर्कस्योत्तेजकतयाउत्तेजकाभावविशि
ष्टव्यभिचारसंशयविरहसंपादकत्वमक्षुण्णमेवतर्कस्येत्याहुः।परेतु।तदापादककापत्तित्वेनाहार्यीत्वेसाधारणतद्वि
शिष्टबुद्धित्वावच्छिन्नं [illegible] स्यव्यभिचार [illegible]
प्रतिप्रतिबंधकतयातर्कस्यव्यभिचारशंकानिवर्त्तकत्वमित्याहुः।तर्कश्चाहार्यारोपविशेषः।तत्त्वंचमानसत्वव्याप्यो
जातिविशेषस्तर्कयामीत्यनुभवात् जिज्ञासाविशेषनिवर्तकतयावासिद्ध इति।तर्कश्चद्विविधोविषयपरिशोधकोव्याप्तिग्रा
हकश्चेति।तत्रविषयपरिशोधकोनिर्वह्निःस्यान्निर्धूमःस्यादित्यादिः।धूमोयदिवह्निव्यभिचारीतर्हिवह्निजन्योनस्यादि
त्यादिश्चव्याप्तिग्राहकः।विस्तरस्त्वन्यत्रानुसंधेयः।इदानींव्याप्तिग्रहोपायनिरूपणोत्तरंव्याप्तिनिर्णयाभावप्रयोजक
व्यभिचारशंकाकारणज्ञानविषयत्वेनोपाधेःस्मरणेसतितथाचप्रसंगसंगत्योपाधिनिरूपणमितिभावः।सिद्धिविष
यत्वरूपसाध्यत्वस्यसिद्धिजनकत्वरूपसाधनत्वस्यचोपाध्यभावादभिमतेति।योयद्रूपावच्छिन्नव्यापकत्वेसति
यदवच्छिन्नाव्यापकःसतदवच्छिन्नसाध्यकंतद्धेतावुपाधिरित्यर्थः।यथाश्रुतेभिमानस्यविशेषणत्वे [illegible] यत्रैतदभिमान न१
तत्राव्याप्तिःस्यात् यदवच्छिन्नाविवक्षणात् गुणकर्मान्यत्वविशिष्टसत्तावान्जातिमत्वादित्यत्रसंयोगीगुणकर्मान्यत्व
विशिष्टसत्वादित्यादौनाव्याप्तिव्याप्ती।व्यापकत्वाव्यापकत्वेएकप्रकारेणैकसंबंधेनविवक्षितेनचद्रव्यत्वेनसमवा
यसंबंधेनवह्निंप्रतिव्यापकस्यद्रव्यत्वस्यादित्वादिनासंयोगादिसंबंधेनवाधूमंप्रत्यव्यापकत्वेपिवह्निमान्धूमादित्यत्रद्रव्य
त्वादेर्नातिव्याप्तिःसत्यामइति।कालःस्यामोमित्रातनयत्वादावित्यर्थः।तेननवक्ष्यमाणेध्वंसोविनाशीजन्यत्वादित्य न२

द्रव्यत्वे३ ते३

तदवच्छिन्न५

नेन पौनरुक्त्यं। अस्य साधनावच्छिन्नसाध्यव्यापकत्वादग्निमस्य साधनरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात्। साध्य
व्यापकत्वाभावमुपपादयति। श्यामत्वस्येति। ननु साधनावच्छिन्नसाध्यव्यापकत्वं विवक्षणीयमतो नोक्ताव्याप्तिरतः प
क्षधर्मावच्छिन्नसाध्यव्यापकोपाधावव्याप्तिमाह। एवं वायुरिति। अत्र प्रत्यक्षं प्रत्युद्भूतरूपस्याव्यापकत्वे रूपस्य सुतरामव्या
पकत्वमित्युद्भूतपदव्यर्थं तथाप्युपाधेः साध्यव्यापकत्वे कार्यकारणभावलक्षणानुकूलतर्कप्रदर्शनार्थं तदिति ध्येयम्॥
पक्षधर्मावच्छिन्नसाध्यव्यापकत्वोक्तौ तु पर्वोक्तेनानाकपाकज[illegible]त्वाव्याप्तिरिति भावः। अव्याप्तीः परिहरति। मित्रातनय
त्वसादिनाव्यभिचारिणीति सार्दिः। वायुः प्रत्यक्षोऽद्रव्यत्वादिसादेः प्रत्यक्षत्वरूपसाध्याधिकरणमात्मा उद्भूतरूपात्मकोपा
धिशून्यसाध्यव्यभिचाराधिकरणं गगनं तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वस्योद्भूतरूपे अभावादुक्तं। उपाध्यधिक
रणमिति। उद्भूतरूपाधिकरणं परमाणुराकाशान्यतरत्वावच्छिन्नसाध्या[illegible]दवस्थमतः साध्याधिकर
णमिति। उद्भूतरूपाधिकरणं यत्प्रत्यक्षाधिकरणं घटादिस्तद्भिन्नद्रव्यत्वाद्यात्मकधर्मावच्छिन्नसाध्यव्यापकत्वाभावादु
क्तं यद्वेत्यादि। तत्रापि साध्याव्यभिचाराधिकरणपरमाणुघटान्यतरत्वावच्छिन्नद्रव्यत्वात्मकसाधनव्यापकत्वात्।
उपाधिशून्यमिति। तत्रैवोपाध्यधिकरणं घटः उपाधिशून्यमधिकरणमात्मा तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वाभा
वा साध्यव्यभिचाराधिकरणमिति। उद्भूतरूपाधिकरणं यत्प्रत्यक्षाधिकरणं घटः यद्वोद्भूतरूपशून्यं यत्प्रत्यक्षा त्वाभा ला १
वाधिकरणं अतीन्द्रियं रूपादि तदन्यतरत्वावच्छिन्नद्रव्यत्वरूपसाधनाव्यापकत्वस्योद्भूतरूपे अभावात् साध्याभावाधिक
रणमिति परित्यज्य साध्यव्यभिचाराधिकरणमित्युक्तं। तदर्थश्च साधननिष्ठसाध्यव्यभिचारनिरूपकाधिकरणत्वं॥
अंतत इति। तादृशधर्मांतरस्यास्फूर्ताविस्यर्थः। न च साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वं तथा च शुद्धसाध्य
व्यापके धूमादिनिष्ठव्याप्तेः केवलधूमत्वावच्छिन्नत्वात् तादृशधर्मांतरावच्छिन्नधूमादिनिष्ठव्याप्तिनिरूपकत्व[illegible]र्दं मा १

रधं १

धनानामितिवाच्यं। तद्धर्माधिकरणावृत्तसाध्याधिकरणनिष्ठाभावप्रतियोगित्वरूपस्यैवतद्धर्मावच्छिन्नसाध्यव्या
पकत्वस्य लक्षणघटकत्वेन नतु यद्धर्मावच्छिन्नसाध्यनिष्ठव्याप्तिनिरूपकत्वस्यसान्नायात् धूमवान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नाभावमादाय पिंड
महानसान्यतरत्वावच्छिन्नसाध्यव्यापकं व्यंजनत्वादिकं संग्राह्यमेवेति ध्येयम्। अतएव। यद्धर्मावच्छिन्नेत्यघटितनि
रुक्तस्यलक्षणस्यतात्पर्यविषयत्वादेव। एतदनुसारेण। निरुक्तलक्षणानुसारेण। स्वस्यसाध्यमितिषष्ठीतत्पुरुषभ्रमंव्या
वर्तयितुमाह। स्वंचेति। नव्यास्तु। यदभावेनयदन्यत्वेनवासाधनवतिसाध्याभावउन्नीयते सउपाधिर्लाघवात्। अत
एवउत्कर्षसमत्वेनापि नाधिक्यप्रसक्तिः। तत्रयोरुभयत्वेन रूपेण नकश्चिदप्युपाधित्वमिच्छन्ति। तद्धर्मवत्तिउपाधिर्व्यभिचारेण। तद्धर्माधिक
रणावृत्तत्वेनउपाध्यभावाधिकरणवृत्तित्वेन। वायुःप्रत्यक्षःप्रमेयत्वादित्यादौतु प्रत्यक्षत्वप्रमेयत्वं व्यभिचारि बहिर्द्रव्ये
उद्भूतरूपव्यभिचारित्वादित्यपि द्रष्टव्यं। ननुपक्षेतरत्वेऽतिव्याप्तिः। नचतस्यलक्ष्यत्वमेवपक्षाश्रये [illegible] ये
षामित्यादिमूले पूर्वोक्तिस्य लक्ष्यतावच्छेदकस्यतत्राप्यभावात्। तत्रहेतौ पक्षेतरव्यभिचारस्यपक्षमादायैवसंभवादितआ
ह। बाधानुन्नीतेति। साध्यव्यापकत्वेति। स्वव्याघातकत्वादिति। उपाधिमात्रस्यदूषकत्वव्याघातकत्वादित्यर्थः। पक्षेतरत्वे
स्योपाधित्वे सर्वत्रानुमाने पक्षेतरत्वोपाधेः संभवादनुमानमात्रोच्छेदापत्त्या व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्वस्यासंभ
वादितिभावः। ननुतथापि यत्र साध्यव्यापकताग्राहकप्रमाणमस्तितत्र पक्षेतरत्वे लक्षणातिव्याप्तिर्दुर्वारेत्यतआह। बाधोन्नी
तत्वेति। बाधेन। पक्षेसाध्याभाववत्त्वेन उन्नीतः साध्यव्यापकत्वेननिश्चितइत्यर्थः। संदिग्धोपाधिरपीति। पक्षेसाध्यसंदेहेन
साध्यव्यापकतासंदेहस्यपक्षेतरत्वे संभवादितिभावः। नचस्वव्याघातकत्वेनानुपाधित्वादेवानुभाव संभवे संप्रदायमात्र
स्यानुहेतुत्वकथनमसंगतमितिवाच्यं। यत्र साध्यव्यापकताग्राहकतर्कावतारस्तत्र व्यापकव्यभिचारिणो व्याप्यव्यभिचाराव
श्यंभावेन व्यभिचारानुमानकत्वरूपस्य दूषकत्वस्य व्याघातासंभवात्। सत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकतावादिनां मतमा

श्रित्य साध्यव्यभिचारस्यतमादायसंभवात्॥

१५

हा। केचित्विति। इत्थंनेति। सत्प्रतिपक्षोथापकतयाहृषकत्वेनेत्यर्थः। अन्वच। सत्प्रतिपक्षोथापकत्वकत्येच। पक्षवृत्तिरिति पक्षवृ
त्तित्वेतु पक्षेतद्भावेन साध्याभावासाधनादितिभावः। गुरुमते लौकिकः शब्दो नुवादकः वैदिक एव प्रमाणतन्मतानिराक
रणायाह। वैदिकेति। अत्र स्वर्गकामोयजेतेत्यादिपदत्वेन पक्षता तेन विशेषतः संसर्गसिद्धिरिति इत्थं। तात्पर्यविषयेति
अत्र ब्राह्मणे विधेत्यादौ यदाधिकरणत्वसंसर्गतात्पर्यं तदाविषयत्वादिसंसर्गेणार्थान्तरवारणाय तात्पर्यविषयत्वसंसर्गवि
शेषणं। तात्पर्यज्ञानं तर पदार्थत्वेनेतरपदार्थस्य प्रवेशात् घटत्वादिना स्मृतस्य संसर्गो न सिध्येत् अतः स्मारितेति। स्मारि
तत्वं च वृत्त्याबोध्यं। तेन वस्तुपदात्समवायेनाकाशत्वादिनोपस्थापितेन रूपेण संसर्गसिध्यभावेपि न क्षतिः। हेतौ चायमे
ति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ राज्ञः पुरुष इत्यादिभागे राजपुरुषयोर्योग्यार्थयोः संसर्गतात्पर्याभावेन साध्याभा
वाद्व्यभिचार इत्याकांक्षाविशेषणं। तच्च इदं पदमेतत्पदेन सहानुकूलसंसर्गेणैतदर्थान्वितस्वार्थबोधं जनयत्विति पदतात्पर्या
श्रयकं। तेन नाकांक्षायाः इतरांशवैयर्थ्यप्रसंगः। वह्निनासिंचतीति वाक्ये प्रमापूर्वकत्वसाध्याभावेन व्यभिचारवारणाय यो
ग्यतापदं। नीलो घटो द्रव्यं पट इत्यादौ नीलः पट इत्यादिभागे नीलपटयोराकांक्षायोग्यतासत्वेन हेतुसत्वात् व्यभिचारवारणा
यासत्तिपदं। कदंबपदस्याकांक्षादिना परस्परप्रतियोगित्वलाभाय। अन्यथा साध्यस्य परस्परार्थघटितत्वेन व्यभिचारप्र
संगात्। ननु इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकज्ञानस्य प्रवर्तकतया संसर्गज्ञानपूर्वकत्वानुमितेस्ता इत्यातया
कथं प्रवर्तकत्वं। अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन प्रमापूर्वकत्वेन प्रमापूर्वकत्वसिद्धावपि पुरोवर्तिविशे
ष्यकरजतत्वादिप्रकारकज्ञानस्य तस्मादनुसत्तेस्तदर्थं शब्दप्रामाण्यस्वीकार इत्यत आह। यद्वेति। मिथः संसर्ग इति।
तात्पर्यविषयमिथः संसर्गवत्त्वमित्यर्थः। तेन नानात्पर्यविषयसंसर्गमादायार्थान्तरं। ननु दृष्टान्ते साध्यसिध्यभावात्कथं व्या
प्तिग्रह इत्यत आह। दृष्टान्तेपीति। ननु सर्वत्र शब्दश्रवणानन्तरमनुमितिरूपकार्यान्यथानुपपत्त्या व्याप्तिज्ञानं कल्पनीय
मित्यत आह। किंचेति। पदज्ञानं कल्पयित्वेति। पदस्मरणं कल्पयित्वेत्यर्थः। वह्न्यादिशब्देनार्थस्य च नन्वयादिरूपेणा

202

र्थेनापिवह्न्यादिपदस्मरणसंभवात् वाय्वादिवत् वाच्यकत्वादिसंबंधस्यापिस्मारकत्वादितिभावः।इदमुप
लक्षणं।आकांक्षाज्ञानंकल्पयित्वेत्यपिबोध्यं।मणिकृतस्तु।एतेपदार्थाःपरस्परसंसर्गवंतः योग्यतादिमत्
पदस्मारितत्वादित्यनुमानेयोग्यतानलिंगविशेषणं।लिंगस्यानिर्णयेतस्यैवनिश्चायकतयायोग्यतायाश्चसंश
येपिशाब्दबोधदर्शनात्।शाब्दःपृथगेवमानमितिवदंति।मिश्रास्तु।अनुमानमुद्रयाशब्दस्यबोधकत्वेघटमा
नयेतिस्वरूपयोग्यंघटःकर्मत्वमानयनंकृतिःस्वरूपायोग्यमितिनस्यात्।अनुमानस्याश्रयत्रसंभवात्।न
चाकांक्षाघटितहेत्वभावान्नानुमितिस्तत्रेतिवाच्यं।आकांक्षांविनैवानुमितिसंभवात्।विषयाबाधाच्चतस्याः
प्रमात्वे।शब्दप्रामाण्यंचस्वभावात्।नतादृशशब्दस्यबोधकत्वमित्याहुः।परेतु।घटादस्थलीयाद्दोघटावधिकपृथ
क्त्वप्रकारेणनिरवच्छिन्नविशेष्यताकःपृथक्त्वाश्रयस्यशाब्दबोधःसर्वानुभवसिद्धः।सचास्माकंतादृशानुपूर्व्या
कपदज्ञानत्वेनतादृशशाब्दबोधंप्रतिहेतुत्वादुपपद्यते।वैशेषिकाणांतुपृथक्त्वघटावधिकंघटपदसाकांक्षपृथक्
पदस्मारितत्वादित्यनुमानेनतन्निर्वाहः।पक्षविधयापृथक्त्वस्यभानेपितदाश्रयस्याभानात्।पटपक्षीकृत्यपटोघ नव८
टावधिकपृथक्त्ववानित्यनुमित्यातन्निर्वाहइतिवाच्यं।पटादिनिष्ठविशेष्यतायास्तत्रपक्षतावच्छेदकीभूतपटत्वाव
च्छिन्नतयानिरवच्छिन्नविशेष्यताकतादृशशाब्दबोधसमानाकारत्वस्य तथाप्यनिर्वाहइत्याहुः।तत्र।तेषुमध्ये।
असत्प्रतिपक्षइति।असत्ताभावाप्रतियोगिसाध्यकइत्यर्थः।यथाश्रुतेसिद्ध्यसिद्धिव्याघातात्।असत्ताभावाप्रतियो
गित्वस्यचप्रमेयत्वादौसत्वाल्लक्षणसमन्वयः।नचैतन्नसंभवतिप्रमाविषयस्वरूपस्यतस्यनानात्वेनाननुगमा
दितिवाच्यं।प्रमात्वस्यैवपरंपरासंबंधेनानुगतत्वात्।इत्थंचप्रमेयत्वादेर्व्यतिरेकित्वमपिकेवलान्वयित्वमेवेति
मंतव्यं।असत्प्रतिपक्षइति।सिध्यसिद्धिव्याघातादगृहीतहेतुसहचारयत्व्यतिरेकिसाध्यकत्वसमर्थोबोध्यः।
सत्प्रतिपक्षेति।गृहीतान्वयव्यतिरेकिसाध्यकमित्यर्थः।यत्संबंधेनयदवच्छिन्नंप्रतीति।यत्संबंधावच्छिन्नयद्रूपावच्छि

नु४ ता०

न्व्याप्यतानिरूपितव्यापकताग्रस्यत इत्यर्थः। इतरव्याप्यतेति। इतरस्यव्याप्यतेत्यर्थः। तादात्म्येनेतरावच्छिन्नव्याप्यतानि
रूपितव्यापकताग्रस्यत इत्यर्थः। तादात्म्येनेतरव्यापकतेतिपाठे तादात्म्यसंबंधावच्छिन्नाया इतरनिष्ठव्याप्य
तातन्निरूपितव्यापकतेत्यर्थः। तादात्म्यसंबंधेनेति। तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावः सिध्यतीत्यर्थः। ये
नसंबंधेनव्याप्यताग्रस्यत इत्युक्तौ तु तादात्म्येनेतरस्यव्याप्यतायत्र गृहीता तत्रेतरात्यन्ताभावस्य सिद्धिः स्यादिति भा
वः। संयोगसंबंधावच्छिन्नप्रतियोगिताकचप्रत्यभावेनेति सावधारणं। तेन संबंधावच्छिन्नप्रतियोगिताकेनेन सि
द्धिरित्यर्थः। अनेनन्वयेनसंबंधेनव्यापकताग्रस्यत इत्यस्य च फलं सूचितं। प्रदर्शितरीत्यैवव्ययेनरूपणयदवच्छिन्ने
त्यन्वयोरपि प्रयोजनमुक्तं। ननु साध्यसाधनसहचारज्ञानाभावात् कथं व्यतिरेकव्याप्तिज्ञानमित्यत आह। अन्वयेति।
तथान्वव्यतिरेकसहचारेणैवव्यतिरेकव्याप्तिग्रहोपपत्तेरिति भावः। ननु विना साध्यप्रसिद्धिं तदभावाज्ञाने व्यतिरेकव्या
प्तेर्दुर्ग्रहत्वस्या साध्यसिद्धौ च सिद्धसाधनमिति चेन्न। साध्यस्यपदादावेव प्रत्यक्षसिद्धत्वात् पृथिवीतरभिन्नत्वे युद्देस्य
प्रतीतर सिद्धत्वान्नसिद्धसाधनं। पक्षताव छेदकनानात्वे एवांशतः सिद्धसाधनस्यदोषत्वात्। अत एव निये वाङ्गेन
से इत्यादौ चांगिति कुर्दरुदे स्या यांशतः सिद्धत्वेनांशतः सिद्धसाधनमिति। ननु तथापि घटः कथं पक्षः साध्यस्य निर्णयेन
तत्संदेहसिषाधयिषयोरभावादिति चेन्न। यतः सर्वा पृथिवी इतरभिन्ना न वेति संशयस्य तत्सहकारकसिषाधयिषा
या घटविषयत्वात् घटत्वेन विशेषदर्शने सिद्धौ च तेन रूपेण संशयसिषाधयिषे न भवतः पृथिवीत्वेन तु भवत एवेति।
ननु पृथिवी इतरभिन्ना पृथिवीत्वात् घटवदित्यन्वयिनैवेतरभेदसिद्धे व्यतिरेकिवैयर्थ्यमिति चेन्न। अन्वयव्याप्तेरग्रहे
व्यतिरेकव्याप्तिस्फूर्तिदशायां व्यतिरेक्यनुमितिजनन संभवेनव्यतिरेक्यनुमानप्रवृत्तेर्निष्प्रत्यूहत्वात्। आचार्यमतमे
ह। केचिदिति। व्यतिरेकसहचारेण। अन्वयसहचारनिरपेक्षव्यतिरेकसहचारेण। अन्वयव्याप्तिरेवेत्येवकारेणव्य
तिरेकव्याप्तेर्व्युदासः। नन्वेवं व्यतिरेकव्याप्तिज्ञानरूपकारणाभावात् कथं व्यतिरेक्यनुमितिरित्यत आह। नत्विति। व्य

मु.१८.मु.

तरा५

आ३

205

तिरेकव्याप्तिज्ञानमित्यस्यानुमितावित्यादिः। नन्वन्वयव्याप्तिज्ञानस्यैवहेतुत्वेकथंव्यतिरेकीव्यवहारस्यतआह। यत्रेति।
ननुपृथिवीइतरेभ्योभिद्यतेपृथिवीत्वादित्यादौसाध्यस्येतरभेदादरप्रसिद्धत्वात्कथंव्यतिरेकसहचारग्रहइत्यतआ
ह। साध्यप्रसिद्धिस्त्विति। ननुघटादौसाध्यनिर्णयेकथंतत्रेतरभेदानुमितिरतआह। पक्षादिति। अवच्छेदकावच्छेदेना
नुमितौसामानाधिकरण्येनसाध्यसिद्धेरप्रतिबंधकत्वादितिभावः। अत्रचान्वयव्याप्तिघटकतावत्पदार्थज्ञानादेवा
न्वयव्याप्तिज्ञानोत्पत्तौव्यतिरेकसहचारज्ञानस्यतद्धेतुत्वेमानाभावः। नचव्यतिरेकसहचारेणतत्रतत्तीयार्थैः तत्र
नानुपपन्नेअन्वयव्याप्तिज्ञानेप्रतिबंधकव्यभिचारशंकानिरासद्वाराव्यतिरेकसहचारज्ञानस्यतत्रप्रयोजकत्वमिति
वाच्यं। व्यतिरेकसहचारग्रहेप्यधिकरणांतरेव्यभिचारशंकातादवस्थ्यात्। तदधिकरणीयव्यभिचारशंकानिरासद्वारा
तत्रतस्योपयोगित्वमित्यपिन। तदधिकरणेसाध्याभावग्रहमात्रेणैवतदधिकरणीयव्यभिचारशंकानिवृत्तेरित्यस्वरसाद
दंतीत्यनेनसूचितः। केचन। मीमांसकाः। तदपि। अर्थापत्तेःप्रमाणांतरत्वमपि। स्वानभुक्तइत्यादावित्यादिनामघ्नरः
पर्वतेतरस्मिन्ननत्सतिनत्यतिचेत्सस्यसंग्रहः। नन्वेतद्वाक्यात्मघ्नरःपर्वतेनत्सन्तिइतिज्ञानमुत्पद्यते। नचतत्व्य
तिरेकिणःसंभवतिपर्वतेनत्सेस्यसाध्यस्याप्रसिद्धेर्व्यतिरेकव्याप्त्यनिरूपणादितिकथंनार्थापत्तिःप्रमाणांतरमिति
चेन्न। मघ्नरनत्सपर्वताधिकरणपर्वतेतरानधिकरणत्वेसतिसाधिकरणत्वात्। पर्वतत्वादित्यन्वयव्यतिरेकिणैवपर्वता
धिकरणकमघ्नरनत्सज्ञानसंभवात्। धर्मत्वेनेति। इदंचप्राचांमतेनोक्तं। नवीनमतेतुनित्यविज्ञानमानंदंब्रह्मेतिश्रुत्याभ
गवतिनित्यसुखसिद्धौधर्मस्यकार्यतावच्छेदकंजन्यसुखत्वंसुखत्वावांतरजातिर्वेतिबोध्यं। तत्र। तयोर्मध्ये। अतएव।
प्रकृतज्ञानस्यफलेप्रतिहेतुत्वादेव। पुरुषार्थःसंभवतीति। सुखदुःखाभावाभ्यामेवपुरुषार्थःसंभवतीत्यर्थः। ननुयत्रैतत्सि
सादेःस्वविषयकज्ञानेन्योन्यविषयत्वमर्थस्तथाचोपायेतिव्याप्तिस्तस्यापिस्वविषयकेष्टसाधनताज्ञानजन्यत्वाविषय
त्वादतआह। इतरेच्छेति। इति साध्यताज्ञानमिति। ननुइति साध्यताज्ञानस्यस्यात्त्र्येणनिष्प्रयोजनप्रतिहेतुत्वेमानाभावः। तदुक्तं

छां३ छा२

प्रयोजकत्वं

२६

ना१८

ज२

तं

वच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य तद्धर्मप्रकारकेच्छां प्रति हेतुतायाः क्लृप्तत्वात्। कृतिसाध्यपाकत्वावच्छिन्न
विशेष्यकेष्टसाधनताज्ञानादेव चिकीर्षायाः संभवादिति चेन्न। यत्र कृतिसाध्यपाकत्वेनेष्टसाधनत्वं न गृहीतम
पि तु शुद्धपाकत्वेन कृतिसाध्यत्वं शुद्धपाकत्वेन चेष्टसाधनत्वं गृहीतं तत्रापि पाकगोचरप्रवृत्तेरानुभविकतया
तदनुरोधेन तादृशचिकीर्षाया आवश्यकत्वेन तन्निर्वाहाय कृतिसाध्यताज्ञानस्य स्वातंत्र्येण हेतुताया आवश्यकत्वात्। अ
थ कृत्यसाध्यताज्ञानस्य प्रतिबंधकत्वादेवेष्यादौ चिकीर्षानुत्पादात् कृतिसाध्यताज्ञानस्य चिकीर्षां प्रति हेतुत्वे एव माना
भाव इति चेन्न। कृतिसाध्यत्वाभाववत्तद्व्याप्यतदवच्छेदकधर्मताज्ञानानां प्रतिबंधकत्वकल्पनापेक्षया कृतिसाध्यता
ज्ञानहेतुत्वे लाघवात् इष्टसाधनताज्ञानमिति। अन्यथा निष्फलत्वज्ञानेऽपि चैत्यवंदनादौ चिकीर्षापत्ति
रिति भावः। अत्रेदं बोध्यं। पाकविशेष्यकेष्टसाधनताज्ञानस्य कार्यतावच्छेदकं पाकादिगोचरचिकीर्षात्वं। कृतिसाध्य
त्वप्रकारकत्वानिवेशप्रयोजनविरहात् पाको जायतामितीच्छाया असंग्रहापत्तेश्च। किंतु पाकत्वावच्छिन्नमुख्यविशे
ष्यकेच्छात्वं। पाकसाध्यं सुखं जायतामितीच्छायां व्यभिचारवारणाय मुख्येति। इष्टसाधनतेत्यत्रेच्छास्वरूपसती विशे
षणं। तेनेच्छाज्ञानशून्यकालेऽपि चिकीर्षानिर्वाहः। अत एव। कृतिसाध्यताज्ञानस्य हेतुत्वादेव। बलवदिष्टेति। द्विष्टं द्वेष
विषयीभूतं। द्वेषश्च दुःखं तादृशज्ञानात् द्वेषे बलवत्वं जातिविशेषः। प्रतिबंधिकेति। ननु बलवद्द्वेषविषयसाधन
त्वज्ञानस्य प्रतिबंधकत्वे चैत्रस्यागम्यागमनजन्यनरके यदा बलवद्द्वेषस्तदा मैत्रस्य तादृशद्वेषशून्यस्यागम्याग
मने तादृशज्ञानस्य जनकत्वज्ञानवतः इच्छाप्रवृत्त्योरनुपपत्तिः। एवं चैत्रस्यैव कालांतरे तादृशद्वेषसत्त्वेऽपि। न च तत्कालीन
तत्पुरुषीयेच्छां प्रति तत्कालीनतत्पुरुषीयबलवद्द्विष्टजनकत्वज्ञानस्य प्रतिबंधकत्वं कल्प्यते। यत्पुरुषस्य यदा न द्वे
पि द्वेषः तत्कालतत्पुरुषांतर्भावेन तादृशज्ञानप्रतिबंधकत्वस्याकल्पनान्न तत्र तादृशप्रतिबंधकाप्रसिध्या तदभाव
रूपकारणस्याभावात् प्रवृत्त्यनुपपत्तिरिति वाच्यं। यत्पुरुषस्य यदा गम्यागमनजन्यनरके बलवान्द्वेषस्तदा तत्पु

प्रशस्तंप्रति

चं६

मु.टि.पु.

२५

स्वपौढीसाधनत्व ज्ञानात् ९

206

षस्य तत्रेच्छानुदयाद् अगम्यागमनगोचर तत्स्वरूपीयतत्कालीनेच्छाया अप्रसिध्या तत्स्वरूपतत्कालान्तरभावेन तादृशा [illegible] कार्यका
रणभावस्याभावेन तत्र तत्स्वरूपीयागम्यागमनगोचरेच्छानुत्पादप्रयोजकस्य दुर्निरीक्षापत्तेरिति चेन्न। तद्धर्मप्रकारकद्वेषविशिष्टस्य
तद्धर्मावच्छिन्नजनकज्ञानस्य तत्र प्रतिबंधकत्वकल्पनेनोक्तोपपत्तिसंभवात्। तद्धर्मप्रकारकद्वेषानुत्तरतादृ[illegible]शेच्छायां तादृशद्वेषा
भावः। तादृशद्वेषोत्तरतद्गोचरेच्छायां तद्धर्मावच्छिन्नजनकत्वज्ञानाभावः कारणं। बलवद्द्वेष इति। पाकादिगोचरेच्छायां बलवद्द्वे
षविषयसाधनत्वज्ञानजन्यः पाकादिगोचरद्वेषः प्रतिबंधकः। सर्वोक्तप्रतिबंधकद्वयकल्पनापेक्षया लाघवादिति भावः। अ
त्र चोत्कटसुखोत्कटदुःखजनकत्वमेकस्मिन्कर्मणि गृहीतं तत्र सत्प्रतिपक्षस्थल इवेच्छाद्वेषयोरनुत्पत्तेस्तन्मते कार्यकाले द्वे
षाभावस्य सत्त्वेनेच्छोत्पादापत्तिः। न च यत्र बलवद्द्वेषविषयसाधनत्वज्ञानं तत्तृतीयक्षणे द्वेषो जनितस्तदुत्तरक्षणे इच्छोत्पादापत्ति
स्तत्रापीति वाच्यं। तत्रेच्छोत्पादस्येष्टत्वात् क्षणविलंबस्य चापृथग्निर्णेयत्वादित्यन्य इत्यनेनास्वरसः सूचितः। बलवदनिष्टजनक
त्वज्ञानमिति। अत्रापि तद्धर्मप्रकारकद्वेषोत्तरेच्छायां तद्धर्मावच्छिन्नजनकत्वज्ञानं कारणं। तादृशद्वेषानुत्तरेच्छायां तु तद्धर्मप्रकार
कद्वेषाभावः कारणमिति निष्कर्षो बोध्यः। मूले केचित्त्वित्यनेनास्वरसः सूचितः। स च बलवदनिष्टाननुबंधित्वज्ञानस्येह
तुत्वावच्छेदकत्वे बलवदनिष्टजनकत्वप्रकारकतानिरूपिताभावविरोधिताशालित्वादेस्तादृशानिरूप्यनिरूपकभावघटितत्वे
न गौरवा[illegible]तद्घटितबलवदनिष्टसाधनत्वज्ञानाभावत्वेनैव हेतुत्वं युक्तं। न चाप्रामाण्यज्ञानानास्कंदितबलवद
निष्टाननुबंधित्वज्ञानत्वा[illegible]पेक्षया अप्रामाण्यनिर्णयानास्कंदिततदननुबंधित्वज्ञानत्वस्य प्रतिबंधकतावच्छेदकत्वे गौरवमिति वाच्यं। मुक्ता
दौ बलवदनिष्टसाधनत्वसंदेहेपीच्छाप्रवृत्त्योरुदयात्। बलवदनिष्टाननुबंधित्वनिश्चयस्यैवेच्छाप्रतिबंधकतायास्तदननुबंधित्व
संशयस्यापि प्रवृत्तिकारणतायाः अवाच्यतया च विपरीतगौरवादिति। न च बलवदनिष्टाननुबंधित्वज्ञानस्याप्रवर्तकत्वे तद्विषयस्य
विध्यर्थत्वाभावान्न कलंजं भक्षयेदित्यादिवाक्यानामप्रामाण्यापत्तिरिति वाच्यं। तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेपि प्रवृत्तिप्रतिबंध
कबलवदनिष्टसाधनत्वज्ञानविघटकत्वेन प्रयोजकत्वात् प्रवृत्तिप्रयोजकज्ञानविषयस्य विध्यर्थत्वानपायात्। अत्र यद्यपि यत्र प्र

प्रवृत्ति

थमक्षणे द्वेषः द्वितीयक्षणे फलेच्छा तृतीयक्षणे फलसाधनताज्ञानं तत्र तृतीयक्षणे द्वेषनाशात् भवत्येव चतुर्थक्षणे उपायेच्छा यत्र फले
च्छादिक्रमेणेषामुत्पत्तिस्तत्र फलेच्छारूपकारणाभावादेव नोपायेच्छा एवमन्यत्रापि। आत्मविशेषगुणानां यौगपद्यानंगीकारात्
तिबलवदनिष्टानुबंधित्वज्ञानस्य द्वेषस्य वा प्रतिबंधकत्वं न युक्तं न युक्तं च बलवदनिष्टाननुबंधित्वज्ञानस्य हेतुत्वं तथापि
द्वित्रिक्षणांतरितेपि द्वेषे इच्छाप्रवृत्त्योरनुदयस्यानुभविकतया ज्ञानयोरेव न यौगपद्यमित्यभ्युपगमात् वा पूर्वोक्तप्रतिबंधकत्वस्य
हेतुत्वस्य चावश्यकत्वमिति ध्येयं। तेन। द्वेषबलवत्त्वविशेषणेन। प्रवृत्तिरित्यादि। प्रवृत्तित्वं च रागजन्यतावच्छेदकतया सिद्धो
जातिविशेषः। निवृत्तित्वं च द्वेषजन्यतावच्छेदकतया। जीवनयोनियत्नत्वं च साहजिकप्राणसंचारविषयकयत्नत्वं। ननु बलव
दनिष्टानुबंधित्वज्ञानाभावस्य प्रवृत्तिहेतुत्वे मधुविषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिरत आह। मध्विति। चिकीर्षाभावादिति।
चिकीर्षां प्रति बलवदनिष्टानुबंधित्वज्ञानाभावस्य हेतुत्वादिति भावः। कृतिसाध्यताज्ञानादेवेति। अन्यथा कृतिसाध्य
ताज्ञानादेरपि चिकीर्षायामेव हेतुत्वं स्यान्न तु प्रवृत्तौ। व्यापारेण व्यापारिणो नान्यथासिद्धत्वमिति तु प्रकृतेपि समानमिति भा
वः। प्राभाकरमतमाह। कार्यताज्ञानमिति। सा च। चिकीर्षा च। तद्वारा। कृतिसाध्यत्वप्रकारकेच्छाद्वारा। द्वयोरेवेति। एवकारोप्य
र्थः। स्वविशेषणेति। स्वं वर्तमानः पुरुषः तद्विशेषणं काम्यकामनानित्ये कालशौचादि तद्वत्तापक्षे तत्संबंधः तस्य प्रतिसंधा
नं ज्ञानमित्यर्थः। तस्य कार्यताज्ञाने हेतुता लिंगज्ञानविधया। तथा हि। पाको मत्कृतिसाध्यः मत्कृतिं विनाऽसत्त्वे सति मदिष्टसा
धनत्वादित्यनुमानं। अत्र मदिष्टसाधनत्वमात्रोपादाने रथ्यादौ व्यभिचार इति सत्यंतं। मदिष्टसाधने परकृतपाकादौ व्यभिचा
रवारणाय मत्कृतिं विनेत्यत्र मत्पदं। भ्रमे व्यभिचारवारणाय मदिष्टसाधनत्वादिति। मदीयभ्रमस्य मदिष्टसाधनता
तद्दोषतादवस्थ्यमतस्तत्रापि मदिति। न च स्वेच्छाधीनकृतिसाध्यताज्ञानमेव प्रवर्तकमन्यथा नांतरीयकभ्रमप्रवृत्त्या
पत्तेः तच्चोक्तानुमानान्न सिद्धमिति वाच्यम्। स्वेच्छाधीनकृतिसाध्यत्वस्यैव साध्यत्वात्। एवं च हेतावपि मत्कृतिं विनेत्य
त्र स्वेच्छाधीनत्वं मत्कृतिविशेषणं देयं। अन्यथान्येच्छाधीनमत्कृतिसाध्ये मदिष्टसाधने नांतरीयकजलसंयोगादौ व्यभि

१..

चारापत्तेः एवं सति स्वेच्छाधीनमलकृतिघटितत्वाभावादेव भ्रमे व्यभिचारवारणसंभवात् विशेष्यदलप्रयोजनं यद्यपि न संभव
ति तथापि नीलधूमादिवद्वैयर्थ्यंतरत्वाददोषः एवमग्रिमदानींतनकृतिसाध्यसंध्यावंदनोद्देश्यातित्वे सति विहितसंध्याकाली
नशौचादिमत्त्वादित्यनुमाने योग्यितत्वे सति विहितसंध्याकालीनशौचादिमान् सतत्कालीनकृतिसाध्यसंध्यावंदनइ
ति सामान्यतो व्याप्तिर्गमेनचैवमीये इष्टसाधनत्वहेतुकानुमानसंभवेऽपि पक्षे स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानं
न संभवति। इष्टसाधनत्वस्य यागनिष्ठत्वेन पुरुषविशेषणत्वाभावात्। इच्छायाश्च पुरुषविशेषणत्वेपि तस्यालिंगत्वात्स
वात् लिंगघटकत्वेपि पक्षे तद्वत्ताज्ञानानिर्वाहकत्वादिति वाच्यं। काम्यसाधनताज्ञानस्यापि पक्षे यागादौ स्वविषयसाध
नत्वरूपकामनासंबंधज्ञानात्मकत्वात् यस्त तस्य तद्वत्ताज्ञानं तत्संबंधज्ञानं तज्ज्ञानमेव वा न तु पक्षेऽपि तत्रांतर्भूतं इति का
म्यसाधनताज्ञानस्यापि कामनासंबंधज्ञानात्मकतया कामनाज्ञानात्मकतया वानुपपत्त्यभावात्। ननु स्वविशेषणवत्ताप्रति
संधानजन्यकार्यताज्ञानस्य प्रवर्तकतया इष्टसाधनताभ्रन्यकालेऽपि पाके स्वविशेषणवत्ता[illegible] तदेतंतराघटककार्यता
नुमितिर्यथा पाकः स्वेच्छाधीनमलकृतिसाध्यः श्रमादिभिन्नत्वे सति मलकृतिव्यतिरेकप्रयुक्त[illegible]व्यतिरेकप्रतियोगित्वात् यद्वा
स्वेच्छाधीनमलकृतिविनाऽसत्त्वादिति तत्रापि प्रत्यापत्तिरत आह। काम्येहीति। कामना। यागपाकादिगोचरकामना। कश्चित्तथै

वपाठः। तथा च स्वविशेषणे यत्र विशिष्टं कामनारूपमेव स्वविशेषणं वा व्यमेवं विशेषणवत्त्वमपि विषयसाधनत्वरूपं वाच्यं।
तेन न स्वेच्छाधीनत्वादिघटितव्याप्तिहेतुज्ञानजन्यकार्यतानुमितिस्थले प्रत्यापत्तिरिति भावः। ननु काम्यसाधनताज्ञानजन्यका
र्यताज्ञानस्य प्रवर्तकत्वे मधुविषसंपृक्तान्नभोजने प्रत्यापत्तिरित्यत आह। तत्र बलवदनिष्टेति। तथा च स्वविशेषणव
ताप्रतिसंधाने बलवदनिष्टानुबंधित्वविषयकत्वं विशेषणं देयमिति भावः। ननु तस्यापि भोजने प्रत्यापत्तिस्तत्रापि
तीतत्भोजनकामनाघटितलिंगज्ञानजन्यकार्यताज्ञानसत्त्वादत आह। तत्र श्रेयेति। तदानीमिति। कामनायास्तदानीं पुरुषावि
शेषणत्वाभावादित्यर्थः। तथा च स्वविशेषणे यत्र तदानींतनत्वं स्वविशेषणे देयमिति भावः। ननु स्वेच्छाधीनमलकृतिव्यतिरेक

प्रयुक्तव्यतिरेकप्रतियोगित्वादिलिंगकज्ञानजन्यकार्यताज्ञानात् संध्यावंदने प्रवृत्त्यापत्तिः। कृतेरपि स्वविशेषणत्वादत आह।
नियमेनेत्यादिकमिति। अनादिना विहिततत्[illegible]र्मकालस्य संग्रहः। न च कालस्य कथं स्वविशेषणत्वमिति वाच्यं। स्वरूपे
जीवनत्वसंबंधेन तस्य पुरुषविशेषणत्वात्। विहितकालजीवित्वादेर्वा पदेन ग्रहणात्। तथा च नित्यगोचरप्रवृत्तिस्थले
स्वविशेषणपदेन विशिष्टतत्कालानुपस्थित्यादिरूपविशेषणमेव ग्राह्यमिति न सर्वोक्तातिप्रसंग इति भावः। नैयायिक
दर्शंकृते न स्यादिति। तदपेक्षया बलवदनिष्टाननुबंधित्वविशिष्टसाधनताज्ञान[illegible]जन्यकृतिसाध्यताज्ञानापेक्षया। क्व
चिदेवेति नियमात् दुःखाधिकजन्यतापेक्षया विषयत्वस्य घटितत्वादिति भावः। ननु बलवदनिष्टजनकत्वज्ञानं न हेतुः क्व
नबल[illegible]यासस्साध्ये बहुतरस्यापि दुःखस्य बलवत्त्वात्। क्वचिदल्पस्यापि दुःखस्य बल[illegible]त्वादनुगतस्य बलवत्त्वस्य
दुर्वचत्वादित्यत आह। बलवदनिष्टाननुबंधित्वं चेति। इष्टोत्पत्तीति। इष्टनान्तरीयक[illegible]दुःखं तदपेक्षयाधिकं
यदुःखं तदजनकत्वमर्थः। एतेन मधुविषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिरपास्ता। इष्टसिद्धिनान्तरीयकदुःखमप्रसिद्धमिति त
स्य मरणदुःखस्य तेन जननात्। अत्र केचित्। सुखमात्रजनके कर्मणि इष्टोत्पत्तिनान्तरीयकदुःखमप्रसिद्धमिति त
त्र प्रवृत्त्यभावप्रसंग इति तदयुक्तं। केषांचित्मते न्यायेन सुखजनके कर्मणि दुःखजनकत्वनियमेनाप्रसिध्यभावात्। मिथ्या
स्तो इष्टोत्पत्तिनान्तरीयकदुःखाजनकत्वमुक्तं स्यादर्थ इति नाप्रसिद्धिरित्याहुः। नन्वेवं सति नरकसाधनत्वेन प्रमितेप
रदाराभिगमनादौ रागान्धानां प्रवृत्तिः। इष्टोत्पत्तिनान्तरीयकनरक[illegible]दुःखजनकत्वेन तस्य निर्णयादित्यत आह। ब
लवद्द्वेषेति। द्वेषे च बलवत्त्वं जातिविशेषः। अत एव रागान्धस्य परदाराभिगमनादिजन्यदुःखे न तादृशो द्वेषस्तदा तद्
ता वर्णप्रवृत्तिः। साध्यत्वसाधनत्वयोर्विरोधमुपपादयति। असिद्धस्येति। आद्यक्षणवृत्तित्वविशिष्टस्य पाकादेरस्य
र्थः। सिद्धस्य अनाद्यक्षणविशिष्टस्य। कृत्यव्यवहितोत्तरक्षणसंबंधित्वघटितस्य कृतिसाध्यत्वस्य पाकोत्पत्तिक्षण एव पाक
वृत्तित्वात्। कालांतरभाव्योदनादिफलसाधनत्वस्योदनाव्यवहितपूर्वक्षणसंबंधित्वघटितस्य चोत्पत्तिक्षणे पाकावृत्तित्वात्।

मु॰टि॰मु॰

४

सति ४

नि॰९

210

तयोरेकक्षणावच्छेदे नैकत्राऽवृत्तित्वरूपविरोधादिति भावः। यद्यपि कालांतरभाव्योदनाव्यवहितपूर्वक्षणवृत्तितावच्छेदकधर्मवत्त्वरूपमोदनसाधनत्वमाद्यक्षणवृत्तित्वविशिष्टे पाके संभवतीति कथं विरोधस्तथापि स्वरूपयोग्यमिदं न फलोपधायकमिति ज्ञानात् प्रवृत्त्यनुदयेन फलोपधायकत्वरूपेष्टसाधनत्वज्ञानस्यैव संशयसाधारणस्य प्रवृत्तिकारणत्वं वाच्यं। पूर्वोक्तफलोपधायकत्वं चाद्यक्षणविशिष्टे पाकादौ न संभवतीति भावः। साध्यत्वसाधनत्वयोर्विरोधं व्युत्स[...]द्यतयोरेकज्ञानविषयकत्वं न संभवतीत्याह। न चैकमेकेनैकदेति। अव्याप्यवृ[...]त्तिपदार्थस्य स्वस्वावच्छेदकानवगाहिज्ञाने न संभवति मूले वृक्षः संयोगीत्येव प्रतीतेः तथा च साध्यत्वसाधनत्वयोरपि स्वस्वावच्छेदकासिद्धत्वसिद्धत्वविषयकमसिद्धः पाकः कृतिसाध्यः सिद्धश्च पाक इष्टसाधनमिति ज्ञानं समूहालंबनरूपं वाच्यं तच्च न संभवति सिद्धत्वासिद्धत्वज्ञानयोः परस्परविरोधित्वादित्यभिमानः। तस्मात्कालभेदेनेति। न चेदानीमसिद्धः पाकः कृतिसाध्यः अग्रे च सिद्धः पाक इष्टसाधनमिति ज्ञानादेव प्रवृत्तिरस्त्विति वाच्यम्। इदानीतनाग्रेतन[illegible]योरननुगमात्। प्राणित्वस्यापि पुरुषविशेषणत्वेनाहमिदानीतनकृतिसाध्यविषभक्षणे प्राणित्वादसाध्यनुमितिसंभवात् विषभक्षे साधारण[illegible]स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानमिति बलवदनिष्टाननुबंधीष्टसाधनताज्ञानं चान्यतरलिंगप्रतिसंधानजन्यकार्यताज्ञानं प्रवर्तकं वाच्यं। तदपेक्षया बलवदनिष्टाननुबंधीष्टसाधनताविषयककार्यताज्ञानमतिलघ्विति तदेव काम्यनित्यसाधारणं कारणत्वेन कल्प्यत इत्यभिप्रायेण प्राभाकरमतं दूषयति। मेवमिति। साध्यत्वसाधनत्वयोर्विरोधं दूषयति। न चेति। न हीत्यर्थः। यदा कदाचिदिति। यत्किंचित्कालीनस्य साध्यत्वस्य यत्किंचित्कालीनेन साधनत्वेन विरोधाभावादित्यर्थः। तथा चैककालीनकृतिसाध्यत्वेष्टसाधनत्वयोर्विरोधेपि न क्षतिस्त[illegible]ज्ञानस्यास्माभिः कारणत्वानंगीकारात्। किंतु निर्विशेषितयोः सामान्यतः कृतिसाध्यत्वेष्टसाधनत्वयोर्ज्ञानस्यैव हेतुत्वां[illegible]गीकारादिति भावः। तादृशं च ज्ञानसंभवतीत्याह। एकदेति। इदं च ज्ञानान्वयि। ज्ञानात्। ज्ञानसंभवात्। मूलाग्रानवगाहिनोपि वृक्षः संयोगीति ज्ञानस्यानुभविक

कृ.८

ण८ घ१

मु॰टि॰गु॰

तयाऽव्याप्यवृत्तेर्ज्ञानस्य स्वावच्छेदकविषयकमेवेति नियमे मानाभावान्न पूर्वोक्तदोष इति ध्येयम्। प्राभाकरानुयायी नवीन
मतमाह। नव्यास्त्विति। शत्रुमरणस्य त्वादिति। सामान्यलक्षणाप्रत्यासत्त्यनङ्गीकारेण प्रत्यक्षस्य पक्षज्ञानाभावेनानुमितेश्चा
सम्भवादिति भावः। तदभावात्। यादृशस्य पुंसः कृतिसाध्यत्वं दृष्टं तादृशत्वज्ञानाभावात्। नान्वयं साधनताज्ञानस्य प्र
वृत्तिजनकत्वे भावियौवराज्ये प्रवृत्त्यापत्तिरत आह। इदं तु बोध्यमिति। इष्टसाधनत्वादौ यदि पदोपगृहीतस्येदानींत
न कृतिसाध्यत्वस्य घटकत्वं तावदिदानींतनत्वविशेषणस्य प्रयोजनमाह। तेन भावीति। इष्टसाधनत्वघटके छायां तद्विशेष
णस्य प्रयोजनमाह॥ एवं तत्त्वश्चेति। बलवदनिष्टेत्यत्र बलवद्द्वेषतद्विशेषणप्रयोजनमाह। प्रवर्त्तते चेति। प्रवृत्तो। प्रवृत्तेः
पूर्वं। नरकसाधनत्वज्ञानादिति। नरकरूपबलवदनिष्टसाधनत्वज्ञानादित्यर्थः। उत्कटरागादिनेति। अगम्यागमना
दिसुखे उत्कटरागादिनेत्यर्थः। नरकेति। बलवदनिष्टेत्यर्थः। तिरोधानात्। अनुसन्धानात्। तादृशसुखे उत्कटरागसत्त्वे
अगम्यागमनजन्यनरके बलवद्द्वेषानुदयादिति भावः। प्रवृत्तिरूपेति। कृतिसाध्यताज्ञानमित्यत्र प्रवृत्तित्वेन प्रवेश इत्यर्थः।
इत्थं च तद्व्यापारीभूतता इच्छापि प्रवृत्तिसाध्यत्वप्रकारिका बोध्या। ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावादिति तेन
प्रवृत्तित्वेन निवेशेन। प्राणपञ्चकसंचारेन प्रवृत्तिरिति। न च प्राणानामतीन्द्रियतया उपादानप्रत्यक्षाभावादेव न प्राणपाद
नकसंचारसाध्यकप्रवृत्त्यापत्तिरिति वाच्यं। प्राणवहना[illegible]पादानकप्राणसंचारसाधकप्रवृत्त्यापत्तिवारणायैव प्रवृत्ति
साध्यताज्ञानहेतुत्वाङ्गीकारात्। यद्यपि प्राणसंचारादेर्निविशेष्यतासंबंधेन कृतिसाध्यताज्ञानहेतुत्वाङ्गीकारादेव तथाप्र
वृत्तिवारणसंभवतीति तथापि घटादौ जीवनयोनियत्नसाध्यत्वभ्रमा[illegible]प्रवृत्त्यापत्तिवारणाय प्रवृत्तिसाध्यत्व
ज्ञानहेतुत्वमावश्यकमिति ध्येयम्। एतेन प्राणसंचारे प्रवृत्तिवारणाय प्रवृत्तिसाध्यताज्ञानस्य हेतुत्वेपि प्रवृत्तिसाध्यत्वभ्र
मात्प्राणसंचारे प्रवृत्त्यापत्तिर्दुर्वारेत्यपास्तं। न च प्रवृत्तिसाध्यताज्ञानस्य हेतुत्वेपि भोजनानन्तरीय[illegible]के श्रमे साध्यतया प्रवृ
त्त्यापत्तिर्दुर्वारेति वाच्यम्। तादृशश्रमे चिकीर्षाविरहादेव प्रवृत्त्यनुत्पत्तेः। तत्र चिकीर्षाविरहश्च श्रमस्य दुःखरूपतया दुःख

शुध

रुतेः ९

दुःखत्वज्ञानस्येच्छाप्रतिबंधकतयेच्छासामान्यसामग्रीविरहादेव। एतेन नांतरीयकभ्रमे प्रवृत्तिवारणाय स्वेच्छाधीन
कृतिसाध्यताज्ञानस्य हेतुत्वं वाच्यमिति मणिमतमप्यपास्तं। न च सुखे प्रवृत्तिसाध्यताज्ञाने द्वयोः सत्वात्तत्र साध्य
ताख्यविषयतासंबंधेन प्रवृत्त्यापत्तिरिति वाच्यं। साध्यतया प्रवृत्तिं सा प्रति फलत्वज्ञानस्य प्रतिबंधकत्वात्। वस्तुतस्तु
तत्तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानं प्रति तद्धर्मभेदस्य हेतुतायास्त्वया तत्र व्यवस्थापितत्वात्तत्र च कार्यतावच्छेदककोटौ
ज्ञानत्वस्थाने गुणत्वमेव निवेशनीयं। एवं च सुखत्वान्यवृत्तिविषयतासंबंधेन गुणत्वस्य कृतिसाध्यताज्ञानजन्यताव
च्छेदकीभूतं यत्साध्यताख्यविषयतासंबंधेन प्रवृत्तित्वं तद्व्यापकतया तदवच्छिन्नजनकसुखत्वभेदस्य सुखत्वे भावाद
वन तत्र साध्यतया प्रवृत्त्यापत्तिः। व्याप्यधर्मावच्छिन्नजनकसामग्र्याः फलेजनने व्यापकधर्मावच्छिन्नजनकसामग्र्या अ
पेक्षितत्वात्। अनयैव रीत्या प्राणसंचारत्वे भ्रमत्वेव साध्यताख्यविषयता [illegible] वच्छेदकसंबंधेन प्रवृत्तिवारणं बोध्यं
एतदेव हृदि निधाय प्राणसंचारस्य प्रवृत्त्ययोग्यत्वादेव न तत्र प्रवृत्तिरिति मिश्रैरभिहितमिति दिक्॥ इष्टं चेति॥ प्रवृ
त्तिं प्रति इष्टसाधनत्वादिधियो हेतुत्वे चेत्यर्थः। इष्टसाधनत्वादीत्यादिना बलवदनिष्टाननुबंधित्वकृतिसाध्यत्वयोः परि
ग्रहः। अत्र च निष्फले [illegible] प्रवृत्त्यभावादिष्टसाधनत्वस्येष्टसाधनेपि मधुविषसंपृक्तान्नभोजने प्रवृत्तेर्बलवदनिष्टान
नुबंधित्वस्य कृत्यसाध्ये सुमेरुशृंगाहरणादावप्रवृत्तेः [illegible] कृतिसाध्यत्वस्य च ज्ञानं प्रवृत्तिहेतु। तौ [illegible] विधित इतीष्टसाध
नत्वादिकं विध्यर्थ इति भावः। ननु भाविर्यौवराज्यादौ प्रवृत्तेर्वारणाये दानीतन कृतिसाध्यताज्ञानादेः प्रवर्तकत्वं वाच्यं। त
च न विधिवाक्यात् ततः शक्य कृतिसाध्यत्वेष्टसाधनत्व [illegible] प्रकारकज्ञानस्यैवोत्पत्तेरिति कथं प्रवर्तकज्ञा
नं विधित इति। अत्र वदंति। न विधिः साक्षात्प्रवर्तकं ज्ञानमुत्पादयति। किंतु विधिवाक्यादिष्टसाधनत्वे कृतिसाध्यत्वे च वाक्या
ते किमिष्टमित्याकांक्षायां स्वर्गकामादिपदसमभिव्याहारात्स्वर्गस्य साधनमिति ज्ञानमानुमानिकं [illegible] नानसंबोधस्यते। अन्य
थाविशेषरूपेण फलज्ञानाभावात्प्रवृत्त्यनुपपत्तेरेवमिदानीतनत्वांतर्भावेन कृतिसाध्यत्वादिज्ञानमनुमानादिति भा

मु॰दि॰पु

तएवोक्तं मणिकृतापि । एवंविधिजन्यज्ञानजन्यं ज्ञानं प्रवर्त्तकमिति ॥ अत्र भट्टाः ॥ लोके प्रवर्त्तनं द्विधा । स्वेच्छाधीना परप्रे
रणाऽन्या च । तत्राद्यायां प्रवर्त्तनायां अनुपयोगेऽपि द्वितीयप्रवृत्तौ सा प्रयोजिका । आचार्यप्रेरणया ऽहं करोमीति व्य
वहारात् । प्रवर्तना च प्रवर्तयितुः परप्रवृत्त्यनुकूलव्यापारविशेषः । स च चेतनस्याभिप्राय एव अचेतनस्य तु वेदस्याभिधाना
त्मकः कश्चिच्छब्दसमवेतः । तथा च आचार्याभिप्रायज्ञानाद्यथा शिष्यः प्रवर्तते तथा अभिधाज्ञानाद्विधिस्थले प्रवृत्ति
रितिसैव लिङर्थः । सैव च शब्दभावनाख्या लिङंशेनोच्यते अर्थभावना ख्यातत्वांशेनेति तदुक्तं । अभिधाभावनामाहु
रन्यामेव लिङादयः । अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरेति । अभिधा शब्दः तन्निष्ठा भावना अभिधाभावना
अर्थो यागादिरात्मा वा अर्थात्मकत्वं चार्थगोचरत्वमर्थाश्रितत्वं वा तथा च यागादिगोचरा आत्माश्रिता प्रवृत्तिरर्थभाव
ना । अत्र च शब्दभावनाया अर्थभावनैव भाव्या अर्थभावनायाः फलं स्वर्गादीति बोध्यं ॥ तदुक्तं ॥ लिङभिधा सैव च शब्द
भावना भाव्या च तस्याः पुरुषप्रवृत्तिः । संबंधबोधः करणं तदीयं प्ररोचनां चांगतयोपयुज्यत इति ॥ अस्यार्थः । लिङभिधा
वाच्या तस्याः किं भाव्यमित्याकांक्षायामुक्तं भाव्या चेत्यादि । केनेत्याकांक्षायां संबंधेति । संबंधबोधः लिङादिपदस्व
तिज्ञानं तथालस्येनानिवर्तमानं पुरुषं स्तुतिरुत्तेजयतीति सा सहकारिणीत्याह । प्ररोचनां चेति वदंति । तन्न । लोके स्वेच्छा
धीनप्रवृत्तौ विष्टसाधनताज्ञानस्य हेतुत्वेन कॢप्तत्वादन्यत्रापि प्रवृत्तौ तदेव हेतुरस्तु किमतिरिक्तप्रवर्तनाज्ञानस्यापि
हेतुत्वेन । अत एव वेदेऽपि न प्रवर्तनाज्ञानं हेतुः शब्दशक्तिभिन्नायामभिधायां मानाभावाच्च । अत एव मंडनमिश्राः पुं
सो नेष्टाभ्युपायत्वात् क्रियाऽन्यः प्रवर्तकः । प्रवृत्तिहेतुधर्मं च प्रवदंति प्रवर्तनामित्यादिना प्रवृत्त्यनुकूलत्वेनेष्टसाधनत्वम
व प्रवर्त्तनेत्युक्तवंत इति । नन्वेवं विश्वजिता यजेतेत्यादौ फलाश्रवणेनेष्टसाधनताज्ञानाभावात्प्रवृत्तिर्न स्यादत आह । इष्टस
ति । इष्टसाधनत्वादेर्विध्यर्थत्वेनेत्यर्थः । ननु नित्ये संध्योपासनादौ फलाभावान्नेष्टसाधनत्वज्ञानं प्रवर्तकं न वा तत्र हि विप्
याविध्यर्थ इत्यभिप्रायेणाशंकते । नन्विति । न चार्थवादिकमिति । संध्यामुपासते ये तु सततं शंसितव्रताः । विधूतपापास्ते
याति ब्रह्मलोकं सनातनमित्यर्थवादबोधितमित्यर्थः । नित्यत्वहान्यापत्तेरिति । नित्यत्वकाम्यत्वयोर्विरोध इत्यभिमानः । ननु तत्र

चनात्

२५

२८

214

योर्विरोधेमानाभावः। अहरहः संध्यामुपासीतेत्यादिश्रुतिः संध्यामुपासते इत्यर्थवादयोरेकवाक्यताबलेन तत्र जीवीफल
कामस्य संवलिताधिकारः कल्प्यत इत्यत आह। कामनाभाव इति। अकरणापत्तेरिति। अकरणे प्रत्यवायानुसत्त्यापत्तेरित्यर्थः।
कामनारूपअधिकाराभावादनधिकृताकरणस्य प्रत्यवायजनकत्वाभावादिति भावः। ननु तथापि नित्यस्थले जायफलश्रु
तेर्वैय्यर्थ्यमित्यत्राक्यार्थवादतया स्तुतिमात्रे तात्पर्यं कल्प्यत इत्याह। इत्थं चेति। कल्पनादिति। इदमुपलक्षणं। अर्थवादो
पात्तकामनाया अधिकारत्वेपि अनुवेन्द्रविहितं कर्मेत्यादिना शौचे सति विहिताननुष्ठानस्य प्रत्यवायजनकबोधना
कामनासंवलितस्य शुचित्वादेर्नाधिकारत्वं। किंतु नित्यस्थले फलकामनाशुचित्वाद्योरधिकारयोः संवलनं तथा च कामनावि
रहेपि शुचित्वादिरूपाधिकारसत्त्वात् तदा संध्याद्यकरणस्य प्रत्यवायजनकत्वमेव कामनाया अधिकारत्वेपि तदधिकारवतः
शौचादिविरहिणः संध्याद्यकरणस्य प्रत्यवायजनकत्वं न कल्प्यते शुचित्वकालजीवित्वरूपाधिकारैकदेशवतोप्यकरणप्र
त्यवायजनकत्वकल्पनेन संवलिताधिकारत्वेपि क्षतिविरहाच्चेत्यपि द्रष्टव्यं। एतेन तत्र नियमेन फलकामनासत्त्वे मानाभावेपिन
क्षतिरिति। ननु नित्यागोरप्यरत्नाविस्साधनताज्ञानं कारणमेव नित्यत्वेनैवोपपत्तौ किमर्थं नित्यस्यापि काम्यत्वकल्पनीयम
त आह। नत्विति। स्वेष्टसाधनत्वमिति। अन्वयव्यतिरेकाभ्यां प्रवृत्तित्वावच्छिन्नं प्रतीष्टसाधनताज्ञानहेतुत्वादिति भावः। अतए
वकुसुमाञ्जलौ संध्योपासनमफलमपि क्रियते वेदबोधितत्वादित्याशंक्य गुरुमतमेतन्न गुरोर्मतमित्यभिप्राये वापेक्षितमाचा
र्यैः। यत्र पंडापूर्वं स्वतः प्रयोजनं नित्यस्य कर्मणइति प्रभाकरमतं तदपि हेष्यति। यदपीति। कामनाभावे पंडापूर्वात्मकफलका
मनाभावे। रात्रिसत्रन्यायादिति। यथाहि रात्रिसत्रेत्रा ब्रवाच्यानां ज्योतिर्गौरित्यादिवाक्यो सत्त्वकर्मणां फलजिज्ञासायामर्स
ताश्रुतस्वर्गादिकल्पने गौरवाद्विश्वजिन्न्यायापवादेन प्रतितिष्ठंतिहवायएतारात्रीरुपयतीत्यर्थवादश्रुता प्रतिष्ठैव फलमिति सि
द्धांतितं तथात्राप्यर्थवादिकं प्रत्यल्लो वरएव फलं लाघवादित्यर्थः। अन्यथा। फलाभावे। तेन। आर्थवादिकफलकल्पने लाघवे
नातत्र तत्रार्थवादिकं फलं दर्शयति। अनुसन्तिमित्यादिना। अतएव। पितृप्रीतेः श्राद्धफलत्वादेव उत्सर्गइतीति। श्राद्धादिफलस्य

त.१

ल१

रा.यु.४

कर्त्तमानुगतत्वेतु व्याभिचाराभावान्नियमएवस्यादिति भावः। पंडाप्रर्वस्वीकारेपितत्साधनताज्ञानस्यप्रवर्त्तकत्वेनसंभवतीत्याह। पंडाप्रर्वार्थमिति। नवाततसाधनमिति। तथान्वेछाविषयत्वाभावेन फलत्वाभावान्नतत्साधनताज्ञानंप्रवर्त्तकमितिभावः। ननुत्व भ्मतेपिप्रत्यवायानुसक्तेः कथंफलत्वंस्यतः पुरुषार्थत्वाभावात् नवादुःखानुसक्तिरूपपुरुषार्थसाधनत्वेनतत्रेछाविषयत्वंदुःखो नुसक्तेः प्रागभावरूपायास्तदन्यत्वादित्याशंक्यपरिहरति। प्रत्यवायेत्यादिना। अनुसक्ताविद्युइस्यकत्वंसप्तम्यर्थः। कथप्रवृत्ति रिति। प्रर्वौत्रीसाप्रत्यवायानुसक्तेः फलत्वाभावेनतत्साधनताज्ञानस्यप्रवृत्तिहेतुत्वात्संध्यावंदनादौ कथंप्रवृत्तिरित्यर्थः। प्र त्यवायाभावः प्रत्यवायप्राग[illegible]भावः। तदभावौ प्रत्यवायाभावस्याभावे। तदभावः। दुःखप्रागभावाभावोदुःखरूपः। योगक्षे मसाधारणमिति। योगः। अप्राप्तस्यप्राप्तिः। क्षेमः। सिद्धस्यसंरक्षणं। प्रवृत्तिंप्रतीष्टसाधनताज्ञानस्यहेतुतायांसाधनतायाः क्षे मसाधारण्याएवप्रविष्टत्वादिति भावः। प्रागभावस्यप्रतियोगिविकल्पग्रासेन फलत्वाभावेप्रत्यवायात्यंताभावएवनियस्य मसाधारण्याएव... योगक्षेमसाधारणमेवेति। न फलेस्वरूपसंबंधविशेषसक्षेमसाधारणअन्यतायाअत्यंताभावसत्वादितितुनव्याः। एवमेव। योगक्षेमसाधारणमेवेति। न नु नकलंजमिति। अत्रकलंजभक्षणाभावइष्टसाधनमित्यन्वयबोधाभ्युपगमे बाधकाभावादाह। विध्यर्थेकथंनअर्थेति। विध्ये नअर्थयाः कथमन्वयः। विध्यर्थेष्टसाधनत्वाघन्वितनअर्थाभावस्यकलंजभक्षणेकथमन्वयइत्यर्थः। अशक्यत्वादिति। कृ लंजभक्षणेतस्यबाधादिति भावः। बलवदनिष्टाननुबंधित्वमात्रमिति। विधेः कृतिसाध्यत्वादिषुत्रिषुशक्तिस्वीकारेण[illegible] [illegible] क्वचित्कस्यचिदर्थस्यबोधस्वीकारादिति भावः। प्रवृत्तिंप्रतिकृतिसाध्यत्वविशिष्टबलवदनि ष्टाननुबंधित्वविशिष्टेष्टसाधनत्वज्ञानत्वेनैकमेवहेतुत्वंलाघवात् ननुकृतिसाध्यत्वादिप्रत्येकविषयकज्ञानत्वेनगौरवादतोविधे रपिविशिष्टमेवशक्यंवाच्यं। एवंचनिषेधस्थलेपिविशिष्टाभावोविधिसमभिव्याहृतनञाबोध्यतइत्यभिप्रायवानाह। अथवेति। वि शेषणाभावेविश्राम्यतीति। एवंचेष्टसाधनत्वादिमतिकलंजभक्षणादौ विशिष्टाभावोबोध्यमानोबलवदनिष्टाननुबंधित्वाभावेप र्यवस्यतिइतिभावः। विशिष्टस्यविध्यर्थत्वेस्येनेबलवदनिष्टाननुबंधित्वरूपविशेषणबाधात्कथंविशिष्टस्यविध्यर्थस्यबाध

216

ग्रंथमिति ॥ २

इत्याशंक्यते । ननु स्येने [illegible] ति । स्येनेति कर्मनामधेयं । अभिचरन्न् । वैरिमरणं कामयन् । स्येनेत स्य बाधितत्वादिति भावः । अर्थ
विधिजन्यबोधविषयः । वैधत्वान्न निषेध इति । यज्ञीयपश्वालंभनानुरोधेन माहिंस्यादित्यादिनिषेधस्य वैधस्य वैधहिंसे
तरहिंसापरत्वादिति भावः । अभिचार इति । तथा चाभिचारमहीनं च त्रिभिः रुद्रै व्यपोहति इति तत्र प्रायश्चित्तोपदेशा वै यथा
पत्ता निषेधविधेस्तदितरहिंसापरत्वं न संभवतीति भावः । न चैवं यज्ञीयपशुहिंसाया अपि प्रत्यवायजनकत्वापत्तिरिति वाच्यं
अनुपदिष्टप्रायश्चित्तान्यहिंसेतरहिंसापरत्वान्माहिंस्यादिनिषेधविधेरिति । साक्षान्मरणानुकूलव्यापार एव हिंसा न हि स्येन
स्तथेति स्येनस्य माहिंस्यादिनिषेधाविषयत्वादस्येव बलवदनिष्टाननुबंधित्वमित्यभिप्रायेण साक्षात्परंपरासाधारण
मरणानुकूलव्यापारमात्रस्य हिंसात्वे दोषमाह । मरणानुकूलव्यापारमात्रं यदि हिंसा तदेति । साक्षात्परंपरासाधारणः सर्वो
पि व्यापारो यदि हिंसा तदित्यर्थः । ननु मरणोद्देश्यकत्वनिवेशोऽन्योद्देशेन प्रक्षिप्तनाराचेन यत्र ब्राह्मणमृतिस्तत्र प्रायश्चि
त्तं न स्यात् । तस्य हिंसात्वाभावेन माहिंस्यादिनिषेधाविषयत्वादत आह । अन्योद्देश्यकेति । वाचनिकमिति । ननु माहिंस्यादि
निषेधविषयतयेति भावः । अदृष्टाद्वारकत्वेनेति । स्येनस्य अदृष्टद्वारैव वैरिमरणसाधनत्वादिति भावः । न च स्तक हिंसात्वं कि
मदृष्टाद्वारकत्वनिवेशेनेत्यत आह । अत एवेति । अदृष्टाद्वारकत्वविशेषणादेवेत्यर्थः । न हिंसात्वमिति । तथा च ताद्दृशाशिवपजना
णादेवताद्दृशाशिवपजनस्य नादेवीरणे किमदृष्टाद्वारकत्वेन गुरुविशेषणेनेति तटस्थः शंकते । नन्वसाक्षादिति । अदृष्टाद्वारक
त्वविशेषणं विनैव स्येने बलवदनिष्टाननुबंधित्वमुपपादयतां मतमाह । केचित्विति । हिंसाफलमिति । साक्षान्मरणफलके
व्यापारः फलमित्यर्थः । तस्य । खड्गाभिघातादेः । पापजनकत्वमिति । अभिचारमहीनं चेत्यादिना अभिचारस्य पापजनकत्वबो
धना साक्षान्मरणजनकव्यापारस्यैवाभिचारपदार्थत्वादिति भावः । न च एवं न चेत्यादिना साक्षान्मरणजनकव्यापारस्यैव हिं
सात्वमित्याशंकितत्वात्तेन पौनरुक्त्यमिति वाच्यं । एवं साक्षान्मरणजनकस्य स्येनजन्या [illegible] एवं स्य [illegible]

मु.टि.गु.

हिंसात्वमाशंकितमिहचतथात्वं तस्य खड्गाभिघातादेरिति भेदात्। नचादिपदेन श्येनजन्यापूर्वस्य तथात्वं तस्य ग्रहणात् कथं भेद इति
वाच्यं। श्येनजन्यापूर्वस्यैतन्मते खड्गाभिघातं प्रत्येव व्यापारतया तस्य मरणजनकत्वाभावात्। नच साक्षान्मरणजनकस्य व्यापारस्य
हिंसात्वे खड्गघातेन ब्राह्मणे व्रणोत्पादकपरंपरया मृते हिंसात्वानुपपत्तिस्तत्र व्रणस्यैवेति वाच्यं। तत्र खड्गघातादुत्तरमेव सन्निपाता
दिदोषस्योत्पत्त्या मरणं प्रति तस्य व्यापारतया व्यापारेण व्यवधानसंभवात्। कुतस्तर्ह्यास्तिकानां श्येने न प्रवृत्तिरत आह। अपि
मेति। तथाच पापप्रयोजकत्वान्न तत्रास्तिकानां प्रवृत्तिरिति भावः। अत्र नव्याः। मारकश्येनस्य माहिंस्यादिनिषेधविषयत्वं तथा
प्यभिचारतया पापजनकत्वं सर्वसंमतं अभिचारस्योपपातकमध्ये मनुना परिगणितत्वादिति कथं तस्य बलवदनिष्टाननुबंधि
त्वं। यच्चोक्तं। श्येनजन्यखड्गाभिघातादेरेवाभिचारतया न पापजनकत्वं श्येनस्येति। तदपि न। अभिचारमहीनं चेत्यत्राभिचा
रपदेन तज्जनकश्येनादेर्ग्रहणादन्यथाप्रत्यभिचारेण यत्र न खड्गघातादयस्तत्र प्रायश्चित्तं न स्यात्। एवमपि श्येने पाप
प्रयोजकतया बलवदनिष्टाप्रयोजकत्वोपपादनस्यात्राशक्यत्वाच्च। प्रवृत्तिं प्रति बलवदनिष्टाप्रयोजकत्वज्ञानस्यैव जनक
तया तद्विषयस्यैव विध्यर्थत्वात्। तथाच श्येनस्य बलवदनिष्टाननुबंधित्वमुपपादयितुं विधेर्बलवदनिष्टाननुबंधित्वविशिष्टे
ष्टसाधनत्वविशिष्टकृतिसाध्यत्वे शक्तिरयुक्ता किंतु त्रिषु [illegible] शक्तित्रयं स्वीकृत्य कश्चित्कस्यचिदर्थस्य बोध इत्यंगीकरणी
यं। श्येनेनेत्यादौ तु बलवदनिष्टाननुबंधित्वस्य बोधो न भवत्येव परं त्विष्टसाधनत्वकृतिसाध्यत्वयोरेवेति। किंच विशे
षणविशेष्यभावविनिगमनाविरहेणापि विशिष्टे शक्तिर्न युक्ता। न च प्रत्येकं शक्तिमभ्युपेत्य कश्चित्कस्यचिदर्थस्य बोधो
पगमे नियामकाभाव इति वाच्यं। तात्पर्यस्यैव नियामकत्वात्। प्रत्येकं शक्तिपक्षे अगम्यां गच्छेदित्यादिवाक्यानामिष्टसाध
नत्वादिप्रमाजनकतया प्रामाण्यापत्तिरिति चेन्न। इष्टापत्तेः। तत्राप्रामाण्यव्यवहारस्तु कदाचित् बलवदनिष्टाननु
१त्रम१ बंधित्वजनकत्वनिबंधनः। ननु बलवदनिष्टाननुबंधित्वे सतीष्टसाधनत्वे सति कृतिसाध्यः पाक इत्येव बोधो न तु लो

बं४

साध्यत्वेत्यादिरूपश्रुतिविशिष्टेशक्तिपक्षेपिनविनिगमनाविरहइतिवाच्यं। तथैवबोधोनान्यथेत्यस्यशपथनिर्णेयत्वात्। त
स्माद्बलवदनिष्टाननुबंधित्वादिषुप्रत्येकंशक्तिरितिप्रथमकल्पएवयुक्तः। तत्रापिबलवदनिष्टाननुबंधित्वंनार्थः। याग
दिजन्यनांतरीयकदुःखस्यापियदाकदाचिधस्यकस्यचित्बलवद्द्वेषविषयतयायजेतेत्यादौनामप्रामाण्यापत्तेः। न
कलंजमित्यादिनिषेधविधिदंश्वमेधेनयजेतेत्यादौ[illegible]प्रामाण्यापत्तेश्च। अश्वमेधादौयदाय:पुरुषःप्रवर्तते त
त्कालीनतत्पुरुषीयबलवद्द्वेषविषयाजनकत्वमर्थइतिनसत्। कालभेदेनपुरुषभेदेनचविधिशक्तिकल्पनेगौरवात्।
कालविशेषपुरुषविशेषाणांविशिष्यज्ञातुमशक्यतयाकालविशेषपुरुषविशेषांतर्भावेनशक्तेर्दुर्ग्रहत्वात्। नाश्वमेधे
नयजेतेत्यादिनिषेधविधिवन्नकलंजंभक्षयेदितिनिषेधविधौनामप्रामाण्यापत्तेश्च। तत्रयदाय:पुरुषःप्रवर्ततेतत्का
लीनतत्पुरुषीयबलवद्द्वेषविषयाजनकत्वस्यतत्रापिसत्वात्। किंतुवैदिकविधेःपापाजनकत्वमर्थः तदभावएवनक
लंजंभक्षयेदित्यादौबोध्यते। शाकेनभुंजीतेत्यादिवाक्यस्यप्रामाण्यनिर्वाहायरोगाजनकत्वमप्यर्थः। एवंपुष्पेणोद्देनै
कः पर्वतमारोहेदित्यादावपितत्तदनिष्टजनकत्वमर्थोबोध्यः। नचैवंशक्त्यानंत्येनरकत्वरोगत्वादीनांद्वेषविषयतावच्छेदक
त्वेनोपलक्षणीभूतेनानुगमय्यतदवच्छिन्नप्रतियोगिताकाभावकूटएवशक्त्यभ्युपगमात्। रोगाद्यजनकत्वादौलौकि
कलिङ्गलक्षणाभ्युपगमाद्इतिवदंति। विध्यर्थश्चप्राचांत्वभिप्रायः। सचस्वेष्टसाधनतानुमापकः। इष्टसाधनत्वज्ञानंचप्र
वर्तकमित्युदयनाचार्यमतमाह। आचार्यास्त्विति। पाकंकुर्यामित्यादिनापाकंकुर्यामित्युत्तमपुरुषपरिग्रहः। आशीर्वाद
यादिनाअध्येषणादिपरिग्रहः। तथाचपाकंकुर्यामितिमध्यमोत्तमपुरुषयोराशीरध्येषणारूपेच्छावाचित्वंस्फुटंतत्दृष्टांते
नप्रथमपुरुषेपीच्छावाचित्वमनुमेयमितिभावः। लाघवादिति। बलवदनिष्टाननुबंधीष्टसाधनत्वाद्यपेक्षयेच्छा
त्वेनविधिशक्तौलाघवादित्यर्थः। इत्यर्थः। इतिबोधः। ननुप्रथमांतपदोपस्थाप्यस्यार्थेविशेष्यत्वनियमादाख्या ले१

पाकंकुर्या:२ टी॰सा॰४ ख्या१

मु.टि.गु.

तार्थस्यानुकूलत्वविषयित्वान्यतरसंबंधेन धात्वर्थविशेष्यत्वनियमाच्चकथंप्रथमांतपदोपस्थाप्यत्वस्य स्वर्गकामादेरा
ख्यातार्थस्य धात्वर्थे अन्वयः। अन्यथा चैत्रः पचतीत्यादावपि चैत्रवृत्तिकृतिसाध्यः पाक इत्यन्वयबोधापत्तिरिति चेदन्यत्र
तथानियमे पत्रयुत्सत्ते वैदिक्यादिति गृहाण। अतएवेष्टसाधनत्वविधिपक्षेपि प्राचीनाः स्वर्गकामकृतिसाध्यः स्वर्गसा
धनं याग इति बोधमंगीकुर्वंति। अनुमायेति। अत्र च यागो मम स्वर्गकामस्य बलवदनिष्टाननुबंधीष्टसाधनं मत्कृतिसा
ध्यतया आप्तेनेष्यमाणत्वात्। मन्मात्रकृतिसाध्यतयेष्यमाणमन्नं अनवदित्यनुमानमवधेयं। तदभावात्। आप्तेष्टत्वा
भावेन तद्धेतुकेष्टसाधनत्वज्ञानाभावात्। नच वेदवक्तुरभावात्कस्य च्छालिङ्गबोधनीयेत्यत आह। यस्त्विति। विधिरेवेति
वक्तृभिन्ने च्छाबोधने विधेः सामर्थ्याभावाद्विधिरेव वेदवक्तरि ईश्वरे मानमिति भावः। नच कर्तृस्मरणमिति। कर्तुर्वेदक
र्तुः स्मरणं स्मृतिभिरबोधनं तथा च वेदोऽपौरुषेयोऽस्मर्यमाणकर्तृकत्वादित्यनुमानं बाधकमित्यर्थः। कपिलकणा
दीति। कपिलकणादगौतमादिस्तच्छिष्यैश्च्यापर्यंतमित्यर्थः। कर्तृस्मरणस्य। सकर्तृकत्वबोधकस्मृतेरित्यर्थः। ननु ई
श्वरस्य वेदवक्तुः सर्गादौ केनचित्साक्षाददृष्टत्वादनुभवे स्मरणं तदभावे ऋषीणां स्मृतिप्रणयनं च न संभवतीति चेन्न।
पौरुषेयत्वानुमानेन वेदकर्तारमनुमाय तन्मूलकस्मृतिप्रणयनयोः संभवात्। अन्यथा। वेदे सकर्तृकत्वानंगीकारे।
तत्रैव। स्मृतिष्वेव। वेदस्य कर्तृसेतेकत्वे श्रुतिं प्रदर्श्य स्मृतिमपि प्रदर्शयति। एवमिति। ननु वेदस्य नित्यत्वबोधकं भारताद्युक्तत्व
तत्स्याकर्तृत्वे प्रमाणं भविष्यतीत्याशंकते। स्वयंभुवेरिति। नित्य इत्यर्थः। एष भगवान्नित्य इति वेदविशेषणं। स्तुतिमात्रमि
ति। तथा च सर्वोक्तश्रुतिस्मृतिविरोधेन अस्य भारतस्य न स्वार्थता सर्वमपितु स्तुतिपरत्वमिति भावः। भ्रमादिसंभवा
त्। पुरुषस्य भ्रमप्रमादोषसंभवादित्यर्थः। नित्यसर्वज्ञेति। नित्यसर्वविषयकज्ञानवत्त्वेनेत्यर्थः। निर्दोषात्। भ्रमादिशू
न्यत्वात्। अतएव। नित्यसर्वज्ञत्वाभावादेव। ननु नित्यसर्वज्ञपुरुषप्रणीतत्वापेक्षया नित्यानेदोषत्वं वेदस्यैवास्यतदेव वे

220

स्वप्रामाण्ये प्रयोजकमस्तु। तथा च सकर्तृकत्वानुबाधक इत्यतो वेदस्य नित्यत्वे बाधकमाह। किंचेति। तस्य दर्भस्येति। तन्निष्ठा
नुपूर्व्यविशिष्टस्येत्यर्थः। आनुपूर्व्या नित्यत्वे च नित्यसमवेतनित्यस्य जातित्वेन आनुपूर्व्या जातित्वापत्तेरिति भावः। अ
न्यत्राप्तेच्छाविषयत्वस्यैश्वरेच्छाविषयत्वरूपस्य केवलान्वयिनः कलंजभक्षणेपि सत्वाद्बलवदनिष्टाननुबंधित्वविशि
ष्टेष्टसाधनत्वरूपसाध्यस्य तत्राभावे न व्यभिचारात्कथं तस्य तदनुमापकत्वं बलवदनिष्टाननुबंधित्वविशिष्टेष्टसा
धनत्वे प्रकारके च्छायालिङर्थत्वे च लाघवाद्बलवदनिष्टाननुबंधीष्टसाधनत्वमेव लिङर्थोस्तु कृतमाप्तेच्छयेत्यस्वरस
आचार्योक्तिस्वरसेन सूचितः। ननु इष्टसाधनत्वस्य न विधितो बोधः संभवति स्वर्गत्वावच्छिन्नसाधनत्वस्य यागे बा
धात् गंगास्नानादिजन्यस्वर्गे व्यभिचारात्। स्वर्गनिष्ठवैजात्यावच्छिन्नसाधनत्वस्य यागे सत्वेपि तद्वैजात्यस्य विधिबोधि
तस्वर्गसाधनत्वान्यथानुपपत्त्या कल्पनीयस्य प्रागनुपस्थित्या तत्तद्घटितकारणत्वे विधिशक्तिग्रहायोगादिति चेन्न। स्व
रूपसंबंधरूपाया एव कारणताया विध्यर्थत्वोपगमादित्येके। अन्यथासिद्धिनिरूपकतानियतान्नरवर्त्तितावच्छेदकधर्म नवच्छेदक,
वत्स्वर्गकत्वमेव स्वर्गकारणत्वमित्यन्ये। वस्तुतस्तु। स्वर्गनिष्ठधर्मावच्छिन्नानिरूपितनियतपूर्ववर्त्तितावच्छेदकधर्मवत्वमे
व स्वर्गकारणत्वं तच्च यागे न बाधितं स्वर्गनिष्ठवैजात्यरूपस्वर्गधर्मावच्छिन्नप्रतियोगिकस्य व्यभिचाराभावात्। स्वर्गपदस्य
विजातीयस्वर्गलक्षणेति। तदसत्। ननु विधेरिष्टसाधनत्वे शक्तत्वेपि स्वर्गसाधनत्वस्य कथं ततो बोधः स्वर्गसाधनत्वादौ
विधिशक्तिकल्पने तु गौरवमानंत्यं। न च विधिप्रत्ययोपस्थापितस्वर्गस्यास्तदन्वयात्स्वर्गाभिन्नेष्टसाधनत्वस्य बोधः सं
भवतीति वाच्यं। स्वर्गपदस्य समासांतर्गततया तदर्थस्यान्यत्रान्वयासंभवादिति चेन्न। स्वर्गसाधनत्वादौ विधेः शक्तिक
ल्पनेन तथा बोधनिर्वाहात्। न चैकैकस्य बोधे विनिगमकाभावः स्वर्गादिपदसमभिव्याहाराधीनतत्तद्घटितसाधनत्वेतास

इष्टे स्वर्गपदोपस्थित २

मु॰१८॰मु॰

र्यग्रहस्यैव विनिगमकत्वात्। नन्वेवं विधिशक्त्यानंतस्वर्गत्वादिधर्मावच्छिन्नस्त्रिङ्निरूपितसाधनत्वेषु एकशक्त्युपगमात्। न च स्व
र्ग्यतावच्छेदकभेदाच्छक्तिभेदः। इष्टतावच्छेदकत्वेन स्वर्गत्वादेरन्यनुगतौ अयतद्वच्छिन्ननिरूपितसाधनत्वे एकशक्त्युपगमात्।
नन्वेष्टतावच्छेदकत्वेन शाब्दबोधे स्वर्गादीनां भानं स्यान्न तु स्वरूपत इति वाच्यं। इष्टतावच्छेदकत्वस्योपलक्षणतया शक्तिवि
षयत्वाद्विशेषणस्यैव शाब्दबोधे भानोपगमात्। उपलक्षणत्वं तत्तदज्ञन्यबोधविषयत्वेन शक्यविषयत्वं। तत्तदज्ञन्यबोधविषय
त्वेन शक्तिविषयत्वमेव च विशेषणत्वमित्यन्यत्र विस्तरः। समवायिकारणस्येति। तत्साध्यकप्रवृत्तिं प्रति तत्समवायिकारणा
त्मकतदुपादानगोचरलौकिकप्रत्यक्षस्य हेतुत्वं। न च शब्दसाध्यकप्रवृत्तिर्मृदंगादौ न स्यात् तदुपादानस्य गगनस्यातीन्द्रियत्वा
देयं ध्वंससाध्यकप्रवृत्तिनिरूपितसमवायिनो ऽप्रसिद्धेरिति वाच्यं। इष्टापत्तेः। शब्दसाक्षात्कारसाध्यकप्रवृत्तेरेव मृदंगादिगो
चरायाउपगमादिति प्राचीनमतानुसारेणेदं। नवीनमते त्वधिष्ठानमात्रमुपादानमिति बोध्यं। तेन यागादेर्हविः शब्दस्य मृ
दंगादेः प्राणसंचारादेश्च प्राणवहनाड्यादिरुपादानमिति बोध्यं। फले द्वेषादिति। फलगतो द्वेषो हि दृष्टसाधनताज्ञानं च निवृत्तिं प्र
ति कारणमित्यभिप्रायेणोक्तं। प्राणसंचारो हीति। आधिक्यश्वासादिरूपः। प्राणसंचारो यत्नसाध्यः प्रत्यक्षयत्नसाध्यतया दृष्टः।
धावतस्तत्र यत्नोत्कर्षेण श्वासक्रियोत्कर्षदर्शनादिति भावः। इत्थं चेति। दृष्टान्तसिद्धावित्यर्थः। सर्वस्येति। एकत्र यत्नसाध्यत्वस्यानुभा
विकत्वेन तत्र दृष्टान्तेन प्राणसंचारत्वावच्छेदेन प्रोक्तं यत्नजन्यत्वानुमानादिति भावः। स एव। प्राणसंचारहेतुत्वेनानुमीयमान एवान
व्यासक्तौ जीवनयोनियत्ने मानाभावः। प्राणक्रियाया अदृष्टविशेषप्रयोज्यात्मनोयोगरूपात् जीवनात् तत्प्रयोजको दृष्टश्च
संभवाद्युक्तो ऽनुमानस्य चाप्रयोजकत्वादन्यथा प्रयत्ने ज्ञानजन्यत्वदृष्टान्तेन जन्ययत्नत्वावच्छेदेन ज्ञानजन्यत्वकल्पनापत्त्या
सुषुप्तौ ज्ञानाद्यनुत्पत्तौ द्वयस्य कल्पनापत्तेरिति प्राहुः। पतनसमवायिभिन्नत्वरूपं पतनासमवायित्वरूपादावति व्याप्तमतो व्याप्ते
दे। असमवायिकारणत्वमिति। द्वितीयादिपतनस्य वेगासमवायिकारणत्वादाह। आद्येति। एवं च संयोगासमवधानकालीनक्रिया

गुणासमवायिकारणिकाक्रियात्वात्। संयोगजन्यक्रियावदित्यनुमानेन गुरुत्वसिद्धिरिति भावः। अग्निसंयोगजन्येति। अग्निसंयोग
समवायिकारणकमित्यर्थः। वक्ष्यमाणस्वरसादाह। स्नेहसहितमिति। तच्च सांसिद्धिकमिति। तथाच सांसिद्धिकद्रवत्वेन हेतुत्व
न्न सुवर्णादिद्रवत्वेन संग्रहइति भावः। न चास्य स्नेहहेतुत्वेनैवानतिप्रसंगे सांसिद्धिकद्रवत्वस्य संग्रहहेतुत्वे मानाभाव
इति वाच्यं। स्नेहत्वेन सांसिद्धिकद्रवत्वेन वा हेतुत्वमित्यत्र विनिगमनाविरहेणोभयस्यापि हेतुत्वात्। असौ तैलेप्रतीयमान
स्नेहः। जलीयः। तैलान्तर्गतजलभागनिष्ठः। तथासति। तैलान्तर्गतजलभागस्वीकारे। दहनप्रातिकूल्यप्रसंगात्। दहननाशप्र
संगात्। दहनना शंप्रति संयोगेन जलस्य हेतुत्वादिति भावः। वेगोऽन्यतरइति। वेगत्वं तु जातिविशेषः प्रत्यक्षसिद्धः। तेन चेति। क
र्मनाशकस्योत्तरसंयोगस्य तदानीमभावाद्वेगस्यैव कर्मनाशकत्वं कल्प्यतइति भावः। ततइति। पूर्वकर्मनाशानंतरमित्यर्थः। एव
मग्रेपि। उत्तरकर्मणापि पूर्ववेगनाशस्ततो वेगांतरोत्पत्तिरित्येषा पद्धतिरित्यर्थः। विनाच वेगमिति। वेगं विना कर्मनाशोन स्यादित्यन्वय
नाशकांतराभावादिति भावः। ननु पूर्वकर्मणो नाशाभावे काक्षतिरत आह। कर्मोत्पत्तिश्च न स्यादिति। अत्र हेतुः कर्मणः प्रति
बंधकत्वादिति। अत्र केचित्। उत्तरसंयोगेनैव पूर्वकर्मनाशो तरकर्मणोः संभवेत्तत्पूर्वकर्मनाशकर्मोत्पत्तिस्वीकारे प्रयोजनाभा
वादलं वेगेन तस्माद्वेगेन गच्छतीति कर्मजनकतया प्रत्यक्षमेव वेगप्रमाणमित्याहुः। पुनर्गमनस्येति। यथापूर्वसंयोगजनकक्रियाया
इत्यर्थः। स्थितिस्थापकस्याप्यत्वादिति। वेगस्य तु उत्तरदेशसंयोगजनकक्रियाजनकत्वं न तु यथापूर्वसंयोगजनकक्रियाजनकत्व
मिति न वेगेन स्थितिस्थापकस्यान्यथासिद्धिरिति भावः। स्थितिस्थापकत्वं तु जातिविशेषः क्रियाविशेषजनकतावच्छेदकतया सि
द्धः। स्थितिस्थापकस्य क्रियाविशेषजन्यक्रियाजनकः स्वजन्यक्रियानाश्यो तीदृशश्चेति मूलेउक्तप्रायोदृष्टं च। उक्तप्रकारेणापे
क्षाज्ञाना स्मरतिवारणेच। वस्तुतः संस्कारं प्रत्येवोपेक्षात्वनिश्चयत्वेन हेतुत्वएव विनिगमकमस्तीत्याह। केचेति। संस्कारकल्प

223

मु॰दि॰मु॰

नायां गुरुत्वादेश्च स्मृतिं प्रत्येवोपेक्षा नानिश्चयत्वेन हेतुत्वे इत्यादिः। सिद्धत्वादि यदि मस्त्यापि पंचम्यं तस्य नेत्यने त्यनेनान्वयः उ
द्देश्यवाचकपदस्य प्रागपेक्षितत्वात् तथान्वयदर्शनार्थमुदीच्यस्यापत्सात्विसस्य प्राक् धारणमित्यपि बोध्यं। तत्र। संस्कारे। अतः
संस्कारः कल्प्यत इति। अथानुभवध्वंस एव व्यापारोऽस्तु प्रतियोग्यभावयोरेकजनकत्वनियमस्याप्रयोजकत्वात्। न चानुभव
स्य स्मृतिप्रतिबंधकत्वापत्तिरिति वाच्यं। संसर्गाभावत्वावच्छिन्नकारणताश्रयीभूताभावप्रतियोगित्वस्यैव प्रतिबंधकपदार्थत्वा
दित्थं संसर्गाभावत्वेनाजनकत्वात्। न चानुभवद्वितीयक्षणे सत्त्व संस्कारेण तृतीयक्षणे स्मरणसंभवात् ध्वंसस्य व्यापारत्वं
न संभवति। फलस्य साक्षात्काले अनुभवध्वंसस्याभावादिति वाच्यं। तत्रापि क्षणविलंबेनैव स्मरणाभ्युपगमादिति चेन्न। संस्का
रानंगीकारे कदाचिदनुभूतस्य सर्वदा स्मरणापत्तेः। अनुभवध्वंसात्मकव्यापारस्य सर्वदा सत्त्वात्। न चोद्बोधकत्वाभावादस्म
रणमिति वाच्यं। यत्र विस्तुविशेषज्ञानात्मकोद्बोधकेन दशपंचवा घटादेः स्मरणानि जातानि न तु अधिकानि तत्र घटादिस्मृतौ
तद्रूपज्ञानस्यैव नियतोद्बोधकतया तत्सत्त्वे उद्बोधकाभावस्य वक्तुमशक्यत्वात्। वस्तुतस्त्वनुपदं वक्ष्यमाणप्रत्वेसाधकयु
क्त्या संस्कारसिद्धिर्निराबाधेति ध्येयं। स्वस्वव्यापारान्यतराभावे। कार्यसत्यव्यवहितपूर्वक्षणे स्वस्वव्यापारान्यतराभावे। स्मरण
स्यासंभवादिति। कार्याव्यवहितप्राक्क्षणवृत्ति स्वस्वव्यापारान्यतरत्वस्यैव कारणतापदार्थत्वादिति भावः। अप्रयोजकत्वा
दिति। संस्कारजन्यस्य स्मृतित्वे प्रयोजकत्वाभावादित्यर्थः। मणिकारमतं प्रदर्शयति। परे त्विति। तन्मते तत्तत्कल्पनीयस्मृति
व्यक्तावुद्बुद्धसंस्कारस्य हेतुत्वकल्पनमस्मन्मते तु प्रत्यभिज्ञायां तद्धेतुत्वकल्पनमिति समानमंतरा स्मृतिव्यक्तिकल्पने प्रत्यभि
ज्ञायां तद्धेतुत्वकल्पने च तत्वाधिक्येन गौरवमित्याकुर्वन्नेनास्वरसः सूचितः। स्वर्गादी सत्र स्वर्गपदेन सुखमात्रस्यादिपदेन
शरीरेंद्रियादेः परिग्रह इति प्रदर्शयति। स्वर्गादि समकाले साध्ये ना। अपनेनरकादीनामिस्यत्राप्येवं। तत्र। धर्मे। यागादीति। आ
दिना होमदानप्रग्रहः। यागत्वं च देवतोद्देश्यकस्वस्वत्वध्वंसवत् द्रव्यविशेषणकेच्छात्वं। देवतोद्देश्यकत्वं देवतास्वत्ववद्विशेष्यकत्वं
शब्दमयी देवतेति पक्षे तु तस्य दमि सारोपशानविषयत्वमुद्देश्यत्वं। होमत्वं चाग्निसंयोगानुकूलघृतादित्यागत्वं दानादिव्यापारत्वं

224

दानत्वं चमस्य ग्रहणे विना स्वस्वत्वध्वंसपरस्वत्वजनकत्यागत्वमिति संप्रदायः। यागत्वहोमत्वादयो मानसप्रत्यक्षगम्या जाति
विशेषा इत्यन्ये। श्राद्धस्यापि च पक्षे यागत्वेन ब्राह्मणापेक्षया दानत्वेन तत्र सांकर्यात् तन्नेदं युक्तमित्यपरे। अन्यथा। धर्माभावे। चिर
विनष्टस्याप्यनुभवस्य स्मृतिजनकत्वादाह। निर्धारितयेति। चिरध्वस्तमिति। चिरकालेन एकमोतिशयमपूर्वं विनाप्रत्य
फलजनना … यनालं न समर्थमित्यर्थः। तथात्वे। ध्वंसप्रतियोगिनोरेकत्रजनकत्वाभावे। एकमेवापूर्वं कल्प्यत इति। वस्तुत
स्तु। यागे … पि ध्वंसो न व्यापारः तथात्वे कीर्तितयागास्वर्गोत्सादवारणाय स्वर्गजनकतावच्छेदककोटौ कीर्तितभेदो निवेशनीयस्त
त्र च कीर्तितस्यैकस्याभावेन कीर्तितत्वावच्छिन्न … प्रतियोगिताकभेदनिवेशनमशक्यमतः कीर्तितव्यक्तीनां तत्तद्व्यक्ति
त्वावच्छिन्नप्रतियोगिताका एव भेदा निवेशनीयाः। एवं च दशाकीर्तितयागस्थले परस्परं तत्तद्व्यक्तिभेदसत्त्वेन स्वर्गोत्पादवार
णाय भेदकूटस्यैव कारणतावच्छेदकत्वमुपगन्तव्यं। तच्चैवं विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावानंत्य
मपूर्वस्वीकारे तु क्षणिकतया कीर्तितयागानामेकैकनाशसत्त्वेन भेदानामेकत्र निवेशप्रयोजनाभावः। यादृशकीर्तितयागादपू
र्वमापादनीयं तद्भेदावच्छिन्न यागव्यक्तेस्तदानीमभावात्। न चापूर्वसंबंधेन कीर्तितयागव्यक्तीनामेकत्र संभवत्येवेति स्वर्गज
नकतावच्छेदककोटौ कीर्तितभेदानामेकत्र निवेश आवश्यक इति वाच्यं। अपूर्वानुसरणे वा स्वर्गसंभवे स्वर्गजनकतावच्छेदक
कोटौ कीर्तितभेदानाम निवेशात्। कीर्तितयागात् ध्वंसोत्पादेन ध्वंसजनकतावच्छेदककोटौ कीर्तितभेदनिवेशस्यासंभवाद
स्यान्यैरपरिशीलितः पंथाः। कारणत्वमिति। घटकत्वं सत्त्वमित्यर्थः। एवमग्रेपि। कार्यकालवृत्तित्वमिवेति। यथा समवायिकारण
स्य कारणत्वे कार्यकालवृत्तित्वं घटकं न तु समवायिकारणस्य कारणत्वे तथेत्यर्थः। तेन। कर्मनाशाजलस्पर्शादिना। तस्य।
यागादेः। पूर्वं। कर्मनाशाजलस्पर्शादितः पूर्वं। उत्पन्नत्वादिति। नष्टत्वाच्चेत्यर्थः। योग्यविभुविशेषगुणानां स्व
तरोत्पन्नगुणनाश्यत्वाद् द्विक्षणात्मकयागस्य तृतीयक्षणे एव नष्टत्वादिति भावः। एवमग्रेपि। धर्मः क्षरत। यस्य धर्मो यागादिः

पा॰
स्या

मु॰पृ॰

र्स्वर्गत्वावच्छिन्नं प्रति तत्कीर्तनत्वेन प्रतिबंधकत्वान्नाश्वमेधांतरात्स्वर्गानुदयप्रसंग इति वाच्यं यदश्वमेधस्य कीर्तनं कृतं तदश्वमेधजन्य २

क्षरति फलभाक्त्वं न भवतीत्यर्थकतया कर्मनाशाजलस्पर्शादेः स्वध्वंससंबंधेन स्वर्गादिफलं प्रति प्रतिबंधकत्वमेव युक्तमित्य
न्यसत् । एकाश्वमेधानंतरमश्वमेधः कृत इति कीर्तनेन तदुत्तरं पुनरश्वमेधकरणेपि स्वर्गानुदयापत्तेः । न च तदश्वमेधजन्यस्वर्ग
प्राप्तिध्यातादृशप्रतिबध्यप्रतिबंधकभावस्य कल्पयितुमशक्यत्वात् । तच्चापूर्वं दर्शपूर्णमासयोर्द्विविधं । परमापूर्वं कलिकाप
र्वं चेति । तथाहि । यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति उपांशुयागमंतरा यजति ताभ्यामेतमग्नीषोमी
यमेकादशकपालं पूर्णमासे प्रायच्छत् ऐंद्रं दध्यमावास्यायामैंद्रं पयोमावास्यायामिति पंचभिर्वाक्यैर्विहितेभ्यः षड्भ्यः आग्ने
यादिभ्यः षडुत्पन्नान्यपूर्वाणि तान्येव कलिकापूर्वाण्युच्यंते तेभ्यश्च परमापूर्वमिति । ननु षडपूर्वाणि आवश्यकानि साक्षादेव स्वर्ग
हेतवः संतु किं परमापूर्वेणेति चेन्न । दर्शपूर्णमासाभ्यां यजेतेत्यनेनोभयत्वावच्छिन्नस्य स्वर्गसाधनत्वावगमादुभयत्वावच्छि
न्नस्यैवैकव्यापारकल्पनादुत्पत्त्यपूर्वाणामुभयत्वावच्छिन्नाजन्यत्वात् । दर्शपूर्णमासाभ्यामिति विधिप्रवृत्तिसमये चरविन
ष्टस्य दर्शपूर्णमासस्य व्यापारतयैकस्यैवापूर्वस्यैव कल्पनाच्च । न चैवमनंतरं षण्णां यागानामेकैकजन्यषडपूर्वकल्पनागौरवं । न च
पंचभिः पंचापूर्वद्वारा षष्ठेन च साक्षादेव परमापूर्वजन्यतामिति वा षष्ठेन कलिकापूर्वेणैवेति वाच्यं षष्ठेनाप्युत्तरांगदक्षिणासहका
रेणैव परमापूर्वजननात् तावत्कालं षष्ठस्य यागस्यानवस्थितत्वात् तज्जन्यापूर्वस्यावश्यकत्वात् । अत्र परमापूर्वं प्रति स्वर्गं
प्रति च दर्शत्वपूर्णमासत्वव्यापकत्वेन दर्शपूर्णमासोभयसाधारणवैजात्येन कारणत्वमित्येके । दर्शत्वेन पूर्णमासत्वेन च का
रणत्वं दंडचक्रवत् मिलितानां फलोपधानमित्यपरे । अत्र त्रयाणां दर्शस्य जन्यमपूर्वमेव कलिकापूर्वं तत्र व्यापारकरवत्र (?)
यागत्रयपूर्णमासजन्यमेकमपूर्वं कलिकापूर्वं तत्र व्यापारकं ताभ्यां स्वर्गजनकापूर्वोत्पत्तिस्तत्र परमापूर्वं फलकृत्स्थापूर्वमित्युच्य
ते इति नवापूर्वपक्षस्त्वेके । तत्रैव फलसंस्काराद्यपूर्वमानाभावात् शब्दवर्णयसन्ये (?) । कलिकापूर्वशब्देन परमापूर्वसंभवात् व्यापारी
भूतापूर्वद्वयमानाभावात् पूर्वोक्तासप्तापूर्व्येवेति युक्तेति चेन्नेति नव्याः ॥ इदं चापूर्वं जातेष्टिपित्र्ययज्ञादौ वा ते निष्कमुपघातइत्ये

के। भोगे निवृत्तिरिति तु संप्रदायः। प्राभाकरास्तु। यागक्रियासर्वात्मना नैव भवति। किंतु सूक्ष्मरूपेण स्वर्गदेहारंभेषु यागसं
बंधिद्व्यारंभकेषु यागकर्त्रीयात्मसु निवावस्थायफलमारभ्यत इत्याहुः। तन्न। ज्ञानेच्छारूपस्य यागस्यात्मनो योग्यविशेषगुणत
या क्षणचतुष्टया नैव स्थायित्वनियमात्। ज्ञानेच्छादीनां सदानुभवेन समानाधिकरणस्वोत्तरवर्त्तिगुणनाश्यत्वस्वीका
रात्। अन्यथा एवं रीत्या जगत एव सूक्ष्मरूपतया सर्वदावस्थानप्रसंगादित्यलं विस्तरेण। ननु गंगागंगादर्शनादिना ईश्वरे
कृतो न धर्मादेरुत्पत्तिरित्यत आह। मूले इमौ तु वासनाजन्याविति। ईश्वरे मिथ्याज्ञानजन्यवासनाविरहान्न धर्मादेरुत्पत्तिरि
ति भावः। ननु धर्माधर्मौ प्रति वासनाया हेतुत्वे मानाभाव इत्यत आह। मुक्तावल्यां मत एवेति। ज्ञानिनां। तत्त्वज्ञानवतां। वचन
विरोधादिति तेनाहरहनाशमात्रे भोगस्य हेतुत्वप्रतिपादनादिति भावः। इत्थं चेति। कर्मणां भोगैकनाश्यत्वे चेत्यर्थः। अन्य
था। उपलक्षणत्वाभावे। सर्वकर्माणीति। सर्वकर्मजन्यादृष्टानीत्यर्थः। भस्मसात्कुरुते। नाशयति। स्मृतिं दर्शयित्वा श्रुतिं दर्श
यति। क्षीयंते चेति। तदभिप्रायमेव। प्रारब्धकर्मभिन्नाभिप्रायमेव। गौरवादिति। द्व्यारब्धानां तत्तद्भागभावानां तत्तद्धेतुहेतुमद्भावानां च
कल्पने गौरवमित्यर्थः। [illegible]। उत्पन्नप्रतीतिविरोधादिति। उत्पादविनाशशालिप्रत्ययविरोधादित्यर्थः। इत्थं चेति। प्रत्यभिज्ञान
स्य सजातीयविषयत्वेनेत्यर्थः। द्वयोरिति। उत्पादप्रतीतिप्रत्यभिज्ञयोरित्यर्थः। अत्र मीमांसकाः। स एवायं गकार इति प्रत्यभिज्ञया
गकारादेस्तावत्कालावस्थानस्य विषयीकृतत्वेनांतराभूतशब्दादिना नाशेनानुत्पादाभावाद्वर्णनित्यत्वसिद्धिः। न च प्रत्यभिज्ञात
ज्जातीयविषयिणी बाधकाभावात्। अन्यथा सर्वत्रापि तथाभावे अभेदाच्छेदापत्तिः। न च तारत्वमंदत्वरूपविरुद्धधर्माध्यासो बा
धकः। प्रत्यभिज्ञानबलेन तस्य नित्यत्वसिद्धौ तारत्वादेर्व्यंजकवायुधर्मत्वस्य कल्पनात्। श्रोत्रेण वायुधर्मतारत्वादेरपरिग्र
हणासंभवादिति। एवं तारस्स एवायोपेक्षया मंदः प्रतीतेस्तारत्वमंदत्वयोर्विरोधाद्येयाहुः। तन्न। तथा सति कत्वादेर
पि व्यंजकवायुधर्मत्वापत्त्या ककारगकारयोरपि भेदो न सिध्येदिति वर्णभेदस्यापत्तेः। वस्तुतस्तु। वर्णनित्यत्वपक्षे कंठताल्वाभि

मु॰दि॰गु॰

घटानां कत्वादिकमेव कार्यतावच्छेदकं वर्णनियतानुपेक्षे कसाक्षात्कारस्य गौरवात्। न च नियमे सति पित्रोः किं विषयकत्वप
कत्वमेव अन्यतावच्छेदकमिति न गौरवावकाश इति वाच्यं। कोलाहलप्रत्यक्षस्यासंग्रहप्रसंगात्। नहि कोलाहलप्रत्यक्षक
त्वादिविषयकं अन्यथा तुल्ययुक्त्या घटाद्युत्पादकस्यापि घटप्रत्यक्षादिकमेव कार्यतावच्छेदकमपि तदपि नियमे वस्यादपि
न चानि सत्त्वमत प्रत्यभिज्ञायास्तज्जातीयोऽयमिति स्यान्नतु सोऽयमिति वाच्यम्। यत्र प्रत्यभिज्ञायां जातित्वेन गत्वादेर्भानं तत्रै
व तज्जातीयोऽयमित्याकारः यत्र तु स्वरूपतो भानं तत्र सोऽयमित्याकार इत्यस्युपगमात् इति। अत्रेदं बोध्यं। शब्दो द्विविधः ध्व
न्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मकसंयोगजन्याद्यशब्दं प्रति गगनं समवायिकारणं भेर्याकाशसंयोगोऽसमवायिकारणं। भे
रीदंडसंयोगादिर्निमित्तकारणं। विभागजन्याद्यशब्दं प्रति वंशादलकाशविभागोऽसमवायिकारणं। वंशदलद्वयविभागो नि
मित्तकारणं। वर्णात्मकाद्यशब्दं प्रति तु कंठताल्वादिनाकाशसंयोगोऽसमवायिकारणं। कंठताल्वादिना वाय्वादिसंयोगो निमित्तका
रणं। द्वितीयादिशब्दं प्रति तु आद्यशब्दोऽसमवायिकारणं। न च भेर्याकाशसंयोगकंठाद्याकाशसंयोगादीनां शब्दं प्रति कारणत्वेम
नाभाव इति वाच्यं। भावकार्यस्यासमवायिकारणजन्यत्वनियमेन तत्कारणत्वस्वीकारात्। तादृशनियमे मानाभावे तु मास्तु तेषां
कारणत्वं। भेरीदंडसंयोगादिनिमित्तकारणसत्त्वेनाकाशे नैव शब्दोत्पत्तिसंभवादिति। शब्दानां च स्वकार्यशब्देनैव नाश।
चरमस्य तु पांत्यशब्देन नाशो वा नाश इति। न्यस्तेतदेवोपधमित्यादावादिशब्देन सर्वेषां दीपकलिकेत्यादेः संग्रहः। ननु तत्रापि व्य
क्त्यभेदएव विषयोऽतो भावार्थं प्रकाशयति। यदेव धर्मयारुत मित्यादिना। अत्र च स्वकर्तृकं च स्वभिन्नकर्तृकत्वरूपविरुद्धधर्म
ध्यासाहितभेदप्रत्ययस्य प्रतिबंधकस्य सत्त्वान्न व्यक्त्यभेदो विषयः किं तु तत्सजातीयाभेदो विषय इति भावः। इति श्रीभारद्वाजो
पनामकदिनकरभट्टविरचिता मुक्तावलीप्रकाशः समाप्तिमगमत्॥ ॥छ॥ ॥छ॥ भानुश्रेणस्यपरिभाव्य चेशास्त्रसारं मु
क्तावली किरण एव पिपतव्यो दिशः। सद्युक्तिभिर्दिनकरेण सोऽयं नीतः प्रकाशपदवीं सुधियां मुदेस्तु॥छ॥ ॥छ॥

[OrderDescription]
,CREATED=18.09.20 14:04
,TRANSFERRED=2020/09/18 at 14:36:09
,PAGES=228
,TYPE=STD
,NAME=S0003627
,Book Name=M-1754-MUKTAVALI PRAKASH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,